भूमिष्ठानां दिविष्ठानां मिलनार्थं हि वाक्पथः[७] ।
निरुद्धोस्ति तथाधारवन्निराधारवस्तुनोः ॥५५॥

कः संबन्धः ॥ तथा—

रजोरेणोरेकदेशो रजोमध्योपवेशितः[८] ।
अहमस्मि दिनेशेन संबन्धो मम को भवेत् ॥५५॥

---

१ यो स्तवः सोयम्— क । २ दुःकरे— ल, चं परयदाष्ट्यमुत्कं दां दुःकरेर्थें— क ।
३ वर्णोस्तीन्तत्वं मावधारय— क । ४ भौमं— क । ५ सामान्यतोभिधाना भ०— क ।
६ अशक्ती उपायनी०— क । ७ वाक्यशः— क । ८ मध्योपवेशिता— ल, क ।

जगत्प्रकाशकेनातिपवित्रेण महात्मना
संसारकारागृहमध्यवर्त्तिनो नित्यत्वसत्ते परमेश्वरस्य ये ।
ते एव तत्प्रान्तरमस्य मापने[1] का शक्तिरार्त्तस्य ममत्वपाशकैः[2] ॥५६॥

शिरश्चरणरहितस्य भ्रमणशीलस्य तेजस्त्रसरेणोर्जगत्प्रकाशक-
सूर्यतेजःपुञ्जे प्रीतिकरणं विना को लाभः ।

तथा–

अवश्यायबिन्दोरुद्वेलेन जलनिधिना बहलेन जलदजलेन च
समं शुष्कप्रलपेन को लाभः ॥अतिदूरमिदम्॥

यद्यपि त्रसरेणुर्हि संसारात्मकसंसदः ।
प्रकाशकेन सूर्येण करोति सह संकथाम् ॥५७॥

यद्यप्येनं[3] न जानाति न करोत्यस्य संकथाम् ।
परं तदीयं वृत्तान्तं कथयत्येनमिच्छति ॥५८॥

परिचेतुमतिज्योतीरूपवेश्माङ्गनस्य हि ।
तमःसंकटमार्गेण[4] कः सम्बन्धो भविष्यति ॥५९॥

शुद्धाभावस्य सर्वत्र व्यवहारस्य सत्तया ।
विषयेणाखिलेशेन[5] कः सम्बन्धो भविष्यति ॥६०॥

समुत्पन्नोपि यत्रैकः समुत्पन्ना परेण हि ।
कर्त्तुं परिचयं पूर्णकामो नैवोपजायते ॥६१॥

यदि कदाचिज्जायेत[6]
तदा समीचीनजनैर्गूढस्येश्वरसेविनः ।
श्वासान् मुञ्चेद्धि कियतः स्तुतिप्रीतिप्रकाशकान् ॥६२॥

अथवा ॥

---

१ त एवत्प्रांतर— क। २ In क the stanza···" पाशकैः is numbered as 57 and the following stanza begins with यद्यपि··· that is marked as No. 59. ३ यद्यत्येनं — क। ४ In ल is written गल्ली above तमःसंकट—···; in क तमः संकल्लीटमार्गेण — क। ५ विषयेणाखिलेशेन—क। ६ कदाचित्तु— क।

जगदीशेन रचिताः कोशागारवदद्भुताः[1] ।
तद्बोधप्रान्तरे[2] कांश्चित् पादन्यासान् समाचरेत् ॥६३॥
किंच संसारजनकस्तवनस्थलमध्यतः ।
कथमागमने योग्यः स भवेद्धीनचेतनः ॥६४॥
सुरत्राणविविक्तान्तर्गेहेलब्धप्रवेशनः[3] ।
यस्तत्स्थलीयवृत्तान्तं वदति स्वं नयत्यसौ ॥६५॥
विश्वहासपदे[4] किञ्चातिनीचजनसंसदि ।
विदूषकः स भवतीत्येतच्चित्तेवधारय[5] ॥६६॥
यद्यपि वचनं स्थूलं जीवानां पोषकं यदपि ।
त्वदमत्रे पतितं सज्जगदीश तथापि दुर्बलं भवति ॥६७॥
अये ज्ञानसमूहात्मकपादपीठादुच्चैस्तरस्तथाज्ञानशक्तिसमूहात्मक-[6]
पादपीठतोप्युच्चैस्तर०ए०महाभूताज्ञनतोप्युच्च० यत् त्वया ॥६८॥
स्वासाधारणधर्माणां[7] स्वरूपस्य निजस्य च[8] ।
नैव दत्तः परिचयस्तेन विज्ञायते त्विदम्[9] ॥६९॥
उत्साहस्योपरि स्तोत्रकरणं नः कृतं त्वया ।
नावश्यकं तथा यच्च दत्ता नः संपदोमिताः ॥७०॥
तेनापि ज्ञायतेस्माकं ग्रीवाया उपरि त्वया[10] ।
प्रतिग्रहीतुमुदभिव्यक्तिर्नावश्यकीकृता[11] ॥७१॥
जगदीश तथा वार्त्ताद्वारं दृष्टं हि मुद्रितम् ।
कर्त्तव्यताकपाटं[12] च दृष्टमुद्घाटितं मया ॥७२॥
जीवद्दशातो भिन्नेन भूत्वा स्वेन समं मया ।
इदमुक्तं कथाः कर्तुं यत्ते शक्तिर्न विद्यते ॥७२॥
न वायुमापनं कर्तुं शक्नोष्येतेन दुःखिताम् ।
मा भजस्वेत्ययं मार्गोतिमिष्टबहुभाषिणाम् ॥७३॥
अत्यन्तरिक्तहस्तानां यद्वचोर्थस्य मूल्यतः ।
क्रेतृविक्रेतृघटना प्रतारणबलादिह ॥७४॥

१ कोणगा एव हृद्गतः—क । २ तद्बोधशान्तरे—क । ३ विविक्तांतगोहेल[illegible]— क । ४ ह्रासपरे— क । ५ भवतीत्येतच्चित्तावधारय— क । ६ पीठदुच्चरतथायाज्ञान— क । ७ स्त्वासाधारण— क । ८ स्वरूपस्याग्निज— क । ९ न्विदम्— क । १० ग्रीवाया तु परि त्वया— क । ११ प्रतिग्रहीतृमु— ल । १२ कर्त्तत्यता— क ।

विक्रीणन्ति तथा सैव स्तुतिर्या[1] बुद्धिरूपिणः ।
सुरत्राणस्य जगतो[2] मान्याज्ञावशतो बुधैः ॥७४॥८३

सकलसंसाररूपमहाभवनसमूहस्य ग्रीवोपरि आवश्यकत्वेन गण्यते ।

सेयं स्तुतिः । यत् बहुप्रदजगदादिपरमेश्वरस्य बहुतरदानमध्येत्यन्तोत्कृष्ट-दानरूपबुद्धिरत्नस्य ज्ञानदीपेन नैर्मल्यं प्रसाध्य बाह्याभ्यन्तरविमलतायामाग्रहः क्रियते । किंच जगदीशतः प्रतिनियतरूपसृष्टिमध्ये यथोचितसंनिवेशकरैर्बहुलतरमनुजसृष्ट्यन्तराले य एकाकिताकिंचनताद्वयमात्रपरिग्रहवान् रचितः सोध्यवसायरूपरसनां[3] कटितटे बद्ध्वा स्वात्मानं सकलकार्यकरणक्षमं कृत्वान्येषामपि तथाभावं सम्पादयेत् ॥ यश्चोत्पत्ति-विनाशप्रवाहमध्यपाती[4] ममतामहानगरनायको निखिलजनैरवनतशिरोभिः प्रमाणीकृताज्ञः स निजविमलीकरणतः प्रथममेव परकीयनिर्मलतासम्पादनमाचरेत्, यतः पशुपालस्य हीदमेव परमप्रयोजनं यत् पशुसमुदायनिवासस्थलस्य[5] परितो रक्षणम्[6] ॥ यदि चैतादृशोपि महासुरत्राणनिदेशवर्त्ती तदा तदाज्ञासमूहानामग्रे भूत्वा शिरसि धारयिता भवेत् ॥ ततश्च निजहृदयमन्दिरं कामक्रोधरूपरजोपसारणेन परमविमलं कुर्यात् ॥ अनन्तरञ्च-रागद्वेषविनिर्मुक्तः सकलपालकनिरञ्जनजगदीशस्तुतिधर्मान् सर्वात्मना स्वनिष्ठान् कुर्यात् ॥

मनसैव समं मया विचारितमेतावत्कालपर्य्यन्तम् ॥ अत्रान्तरेस्थिरतया विषीदन्त्यां[7] बुद्धौ मार्गनिवासस्थलेन[8] दूरादृर्शने दत्ते चिन्तासमयेपि बभूव स्वल्पतरसुखलाभः ॥ यद्यपि मनः काद्दिशीकताभिभूतं गन्तव्यमार्गस्यातिदैर्घ्येण वैषम्येण च दुःखितमासीत् तथापि मार्गशम्बलबहुलतया सुखकरवार्त्ताश्रवणेन च समयस्य सामीचीन्यमन्वभवत् । तदानीमेव च दूरदर्शिनो मनसो विचाररूपचरणः प्रस्तरमध्यपतित इवाभवत् । न भवति च परमेश्वरस्तुतेस्तदीयोत्कृष्टासाधारणधर्माणां परिचयमात्रं फलम्, न वा तेषां तदीयतया सम्बन्धप्रदर्शनम् । न वा तदीया-नामत्युत्कृष्टानन्तवस्तुप्राप्तीनां[9] गणनायामानयनम् । न वा तद्दत्तवस्तुप्राप्तीनां प्रतिनिधितया स्वयंसमुत्पादितस्तुतेरग्रेवस्थापनम् । न वा परमेश्वरप्रदत्तानन्तसंपदेकदेशरूपस्तुते-रीश्वरोपायनीकरणम्[10] ॥ भवति चेदं स्तुतेः प्रयोजनं यत् अतिदुष्टकार्यकारिणीमात्म-स्ताविकां[11] स्तुतिप्रियामात्मालङ्करिणीमन्तःकरणवृत्तिमात्मसाक्षात्कारप्रवणां[12] रचयेत्,

---

१ स्थातिर्या— क । २ न गतो— क । ३ ०रूपसारसनं—ल । ४ प्रवाहपाती--ल । ५ पदयश्रुसमुदायनिवासस्तुल० — क । ६ रक्षणां— क । ७ विषीदत्यां—ल, क । ८ स्तुलेन— क । ९ ०त्युक्रुष्टानां भवस्तु—क । १० प्रज्ञानन्तसं— क । ११ ०मातमस्था-विमां— क । १२ ०प्रवणं— ल ;

तदा पारतन्त्र्यं प्रकटं[१] भवति[२], तथा तदन्तर्बहिःप्रदेशं विनयाकिञ्चनताभ्यामलंकुर्यात्, तदा हि प्रयोजनक्रोडीकरणयोग्यो भवति, सकलसंसारनिर्मातुर्जगदीशस्य स्तुतिमध्ये आयाति। स्तुतिकरणसामग्री हि मनुष्यमूलमध्ये बहुतरास्त्येव[३]। तन्मध्येपि कर्त्तव्यतास्थलमध्येस्य[४] लेखकस्यागणितास्ति ॥ एवं सति किमिति जगदीशस्तुतेर्निवृत्तो भवेयम्[५]। तथा सन्तोषाभिव्यञ्जकचेष्टाविशेषान्[६] सर्वदाकुर्वाण एवावतिष्ठेयम् ॥ इदमेवास्ति[७] सम्यक् ॥ यदात्मस्तावकस्य दुष्टान्तःकरणविशेषस्य कपटतारूपापदः स्वात्मानं समुत्तार्योच्चमूलस्तुतिकरणोद्यतं कुर्याम्। परन्तु प्रयोजनस्यातिदूरतया दुर्लभत्वेनान्तःकरणं वचननिदानरसनां[८] नाज्ञापयत् स्थितमिति[९] यद्यपि, तथापि स्तुतिमित्रतामापन्नः उत्साहविशेष[१०] इदं नाङ्गीकरोति, यत् स्वल्पोत्साहपण्डिततुल्यतयान्तःकरणं स्तुतिकरणतः[११] परावृत्यौष्ठमुद्रणं[१२] विदध्याम्। वचनं हि मनोगतार्थं बहिः प्राकाशयत्[१३]। अनिष्पन्नमिवान्यादृशं मार्गं बिभर्त्ति[१४]। तेन सममार्त्ततां प्रदर्शयित्वा स्वात्मानं सम्यग्विचारकाणां सत्यवक्तॄणां मध्ये मनोगतार्थसमर्पकवचनप्रतिपादनेन प्रकटयामि ॥

बहुकालपर्य्यन्तं चैवमादिविचारमध्ये स्थितोहम्। तारतरस्वरकरणे[१५] मौनकरणे च शक्तिर्नासीत्। अत्रान्तरे परमेश्वरास्तिताप्रकाशरूपबुद्धिविशेषतो[१६] विमलताकपाटमुद्घाटितमभवत्। विनापि प्रयोजनं परिश्रमतोन्तःकरणस्य प्राप्तिप्रत्याशारूपग्रीवा[१७] प्रयोजनरज्ज्वा बद्धा बभूव। वार्त्ताप्राप्तिसंदेशः कार्यशक्तिकर्णे निपपात—"यत् अर्थशालाचित्रकर, न त्वं ग्रन्थग्रथनं करोषि येन ग्रन्थादिभागं स्तुत्यालंकुर्याः। किन्तु सकलदेशकालयोरखिलजनैरवनतशिरोभिः शिरसि निहितनिदेशस्य निखिलसुरत्राणमुकुटमणेश्चरितानि लिखसि[१८]। भवति चेयं[१९] वस्तुतः परमेश्वरस्तुतिरेव लिखिता। सैव च चित्रे निवेशिता। स्तुतेश्च स्तुतिरपेक्षिता नास्ति। विविधविचित्रोत्पन्नपदार्था एव सकलजनविधातुः स्तुतिर्जिह्वा, भावजिह्वातः परमपवित्रपरमेश्वरत एव प्रकटीभूता। प्रकटीभूत्वा चैतद्बोधवतः परमसुबुद्धीनेकरसतापन्नमहसो लुण्टकान् करोति, परमेश्वरमात्रसाध्यैतन्माहात्म्यपर्य्यन्तं प्रविष्टांश्च करोति"।

---

१ पारतं आं प्रकटं— क। २ भावंति— क। ३ बहुतरास्येव— क।
म
४ ०स्तुलमध्येस्थले८— क। ५ भावयन्त— क। ६ ०विसेषात्— क। ७ इदमेवाभिस०— क।
८ दुर्षमत्त्वेनान्तःकरणवचनानि दातृरसनान्तराज्ञा····क। ९ स्थित इति— क। स्थितं इति।
१० तुत्साह०— क। ११ ०न्तःकरणस्तुति०— क। १२ मुद्धरणं— ल। १३ बहिरप्रकाशयत्— ल, क। १४ विमति— क, विभर्त्ति — ल। १५ तारस्वर०— क; ल।
१६ परमेश्वरास्थिता०— क। १७ ०प्रत्याशारूपं ग्रीवा०— क। १८ लिखति— क।
१९ चैवं— क।

"अन्यच्च। प्रकटमस्तीदं[1] यद्देहवतां सृष्टिमध्ये पातिशाहानां निर्माणतोन्यन्महद्रत्नं किमपि नास्ति, यतो विश्वस्य यथोचितसंनिवेशेनावस्थापनमेतेषामेवाधीनम्। निश्चितमेतत् यत् सकलसंसारकार्य्यं[2] जगदीश एकपुरुषाधीनं[3] करोति, मन्ये अर्थसंसारं तच्छरीरान्तर्निवेशयति। तन्मध्येपि योर्थवसन्तपुष्पाणि सर्वदा प्रार्थयिता एवं बाह्याभ्यन्तरपदार्थद्वयं प्राप्य सिंहासनमलंकृत्यावाप्तसकलकामः तस्यैव बाह्याभ्यन्तरपदार्थयो राज्यप्राप्तिः। यथास्मदीयातिसभाग्यसमयवर्त्ती[4] अयं पातिशाहः, यो बुद्धिचित्रकरसारसंग्रहो नाद्यनन्तकार्य्यकरसृष्टेरुत्कर्षरूपः। एवं स्तवनसामग्रीबाहुल्येपि किमिति काद्विशीकोसि"।

इत्याद्यन्तरात्मपोषकसंदेशश्रवणतो भाग्योदयरूपप्रभातसमय आविरासीत्[5]॥ सार्वदिकभाग्यवत्तामूलधनं[6] हस्ते पतितम्। प्रत्याशानेत्रे विकसिते। प्रयोजनमुखं दृष्टिगोचरीभूतम्॥

हा नारायण, अत्यद्भुतमिदं यत् सकलपुस्तकेषु पवित्रपरमेश्वरस्तुतिं पुस्तकालंकारार्थं रचयन्ति। प्रकृते तु स्तुत्यर्थमेव पुस्तकरचनम्। प्राचीनरीतौ हि स्तुतिर्वाङ्मात्रमासीत्। इदानीन्तनसुबुद्धिमते[7] हि अर्थ एव सा। पूर्वकवयो हि स्तुतिकरणार्थं वच एव शरण्यं चक्रुः। प्रकृते तु सर्वगुणगणविराजमानो महाप्रभुरेव शरणम्[8]॥ यस्य परमेश्वरजिज्ञासा तत्प्राप्तिप्रसादतो बाह्याभ्यन्तरपदार्थयोर्जवनिकापसृता। अकिंचनानां ममतावतां च परस्परं प्रीतिरुदभूत्। अज्ञानं नष्टम्। गतानुगतिकतापगमेन वास्तवतत्त्वं परिचितम्। आत्मपूजायामपगतायामीश्वरपूजनं मनस्सु निविष्टम्॥ परोत्कर्षासहिष्णुता निजवातुलतयातिविज्ञातिसमर्थजगदीश्वरेण समं कलहं[9] कुर्वन्ती स्थिता सा मार्गप्रदर्शकबुद्धिं प्राप्याज्ञावशा[10] जाता*।

---

१ प्रकटयतीदम्—ल। २ ०कार्य—ल। ३ एव—ल। ४ यथास्मदीयानिस०—क। ५ आवीरासीत्—क। ६ सार्वदिकम् क। ७ सुबुद्धिमतो—क। ८ महाप्रभुं स्वशरणं यस्य—क। ९ बलहं—क। १० प्राथानावना नाभि सु—क।

* The London MS. has, at fol. 12b......मनस्सु निविष्टं followed by परोत्कर्षणसहिष्णु.......... प्राप्याज्ञावशाजाता. Here the words परो...............जाता are written in a different hand. There are only three lines written on it and more than half of the writing space is left blank.

The next folio, that is numbered as 13 on the reverse side, begins with तिसुखंच बहुतरं भवति।

In the Calcutta MS. we find the following—मनस्सु निविष्टं परोत्कर्षसहिष्णुता

रिक्तहस्तोहं* स्तुतिकरणे मूलधनं धारयन् न स्थितः। स एवाहं जगदीस्तुतिसंकल्पमात्रात् तत्कोशवान्[1] जातः यद्व्ययेनाप्यायवृद्धिकरः। ततश्च पुस्तकरचनार्थमुद्योगवानभवम्[2]।

तत्र च स्वस्वपुस्तकेषु प्राचीनाः परमेश्वरस्तुतिं विधाय तदनुयायिनां महतां स्तुतिमाचरन्ति। तथा चेदहं कुर्याम् तदा यथा कश्चिन्महासुरत्राणद्वारि यथाकथञ्चिल्लब्धप्रवेशः सेनापतिनायकानामप्यनुग्राहयिता सकलजनमध्ये मन्दमतित्वेन गण्यते तथाहमपि मन्दमतिः स्याम्। अतोस्माद्विचारान्निवृत्तो भूत्वात्र सज्जो जातः। यत् ममोत्साहश्चेत् सहायतामाचरति, तदा महासुरत्राणस्य कर्माणि वर्णयामि। यतः शिष्यत्वदासत्वयोरपरिमितसंपल्लाभस्य चानृण्यमाप्नुयाम्। परेषामुमकारकश्च स्याम्।

यद्यप्येतेषु चतुर्षु निमित्तेष्वेकैकमपि तत्कर्मवर्णनस्यावश्यकतामावहति तथापि कर्त्तुमशक्यत्वात् सत्यपि रागे (तन्न) एतावन्तं[3] कालमकरवम्। तथापि मम मनसि मतिरुदभूत् यत् सुरत्राणानृण्यमिव जगदीशानृण्यमपि तद्वर्णनेन भवतीति। अतो दैनंदिनमिच्छाभिवृद्धिरभूत्। तदैव च सुरत्राणानुग्रहद्वारतो मुवारखसुतस्य अबलफजलेर्मम "मत्कर्मकलापवर्णनं कुरु"––इति बभूवाज्ञा। ततश्च तच्चरितज्ञानाय यत्नमारब्धवान्।

यत् एतदीयेभ्यो बहुकालीनेभ्यः सत्यवादिभ्यः। सेवकेभ्यश्चिराय पृष्ट्वा पृष्ट्वा तानि लिखितवान्। किञ्च नानादेशगतैस्तादृशैः सेवकैः सुरत्राणाज्ञातो लिखित्वा प्रेषितानि तान्यवगतवान्। ततश्च लेखितुमारब्धवान्[4] सर्वशः। तन्मध्य एव सुरत्राणराज्यैकोनविंशतिमे वर्षे स एव प्रात्यहिककर्मकलापलिखनरीतिमाविश्चकार[5] यां बाकानबीशी[6] इति जना व्याहरन्ति। ततः प्रभृति तत एव लेखनमकरवं यतितवांश्च राज्यारम्भदिनतः प्रभृति सुरत्राणाज्ञापत्राणि[7] नानादेश्यानि तत्प्रतिपत्राणि[8]

निजवातुलतयातिविज्ञानिसमयं जगदीश्वरेण समबलहं कुर्वतो स्थिता सा मार्गप्रदर्शकबुद्धि प्राथानावशानानाभिमुखं च वहतेरं भवति··· ··· ।

It is hence clear that both the manuscripts are copies of the same MS.

* रिक्तहस्तोहम् is continued at the folio that is numbered as 212 in the London MS.

१ तत्कोशवज्जातः—ल। २ ०योगवानभवन्— ल। ३ रागेनैता०—ल।

४ लिखितुम्— ल। ५ The folio No. 212 ends with प्रात्यहिक), and कर्मकलाप begins the folio No. 15.

६ वाकानिवीशी—ल, क। ७ सुरत्राणातायत्राणि— क। ८ ०प्रतियत्रापि—क।

तद्विज्ञप्तिपत्राणि व्रज्याश्च संग्रहीतुम् । संगृह्य च तेभ्यो लिखितवान् । अनाश्वासेन[1] वान्येषु जन्मतः प्रथमवर्षोत्तरं स्वीयसकलचरितप्रणिधातारं महासुरत्राणमापृच्छ्यापृच्छ्य निर्णीय लिखामि । वर्त्तते च मम प्रत्याशा सुरत्राणभक्तितो निर्व्यूढमेतद् भविष्यतीति ।

अस्मिन् ग्रन्थेस्य महाप्रभोः नाम हजरति शाहनिशाह इति परिभाष्य लिखिष्ये । एतज्जनकस्य जन्नताशयानी इति । पितामहस्य फिरदौसमकानी इति । मातुः मरयम्मकानी इति ।

१ ०खितवाश्च आनाश्वासेन— क ।

(Chapter II)

सुरत्राणसुरत्राणे गर्भस्थे पावनाद्भुताः ।
या या वार्त्ताः समभवंस्ताः काश्चिदिह वर्ण्यये[१] ॥

अवधानवतां निर्मलान्तःकरणानां च हृदि नैतद्गुप्तमस्ति ॥ तदिदम् । यदा जगदीश्वरस्त्रैलोक्यस्य[२] पालनार्थं विश्रामार्थं च स्वप्रतिनिधिभूतमेकं निर्मातुमिच्छति तदा तादृशस्य[३] प्रकटनात् पूर्वमेव जाग्रदन्तःकरणानां भाग्यवतां च हृदि अग्रे[४] किञ्चित् समीचीनं भविष्यति इति प्रतिसन्धानं प्रयच्छति ॥ कुतः । सर्वशुभकरतारकोदयचिन्तोत्तरं तल्लाभे[५] पूर्णमनोरथा भवन्त्विति ॥

अत्रार्थे एकः साक्षी यत् चक्रवर्त्तिचूडामणिजन्नताशयान्य[६]: श्रीमहाप्रभोराविर्भावं प्राप्य परमेश्वरस्य सर्वदैतादृशमुख्यरत्नप्राप्तयेञ्जलिं विधाय प्रार्थनां कृतवन्तः ।

"अये जगदीश ! भवत्स्वरूपप्रदीपप्रकाशस्य स्वासाधारणधर्म्मरत्नस्य च प्रसादात् एतत्प्रार्थकोहं सर्वदा तिष्ठामि मृत्युसहस्रागमनेपि यथा न म्रियै[७] तथा कुरु इति । इदमेव सत्यं यत् जीवनस्य विनिमयो नास्ति । यदा कदाचिद् भवेत् कुलप्रदीपः[८] पुत्र एव ॥ तत्रापि अवाप्तसकलकामः परमेश्वरपरिचेता सर्वेषामप्यवाप्तकामतासम्पादकः" ।

तदानीं च रबिअलअव्वलमासस्य[१०] चतुर्थतिथौ चान्द्रमानेन सप्तचत्वारिंशदधिकशतनवकेतीते परमेश्वरप्रपन्नतानन्तरं कस्मिंश्चित्समये सुखशयिता बभूवुः । तदनन्तरं स्वप्नान्तरे केनचिदुक्तम्—यत् तव सुपुत्रो भविष्यति, यस्य वर्द्धमानलक्ष्म्या ललाटे माहात्म्यप्रकाशोतिचमत्कृतो भवति । न्यायप्रकाशेन यस्य संसारोतिनिर्मलो भवति । तस्य च शुभकरतारकारूपस्य नामापि विख्यातमेव प्रचरदवस्थं[११] निवेदितम् ।

ततश्च यदा जन्नताशयान्यो जाग्रदवस्था जातास्तदा परमेश्वरं शिरसा प्रणिपत्य निजनिकटवर्त्तिभ्यः स्वप्नवार्त्तां निवेदितवन्तः ॥

अपरा[१२] च वार्त्ता ॥

---

१ वर्ण्यते— क । २ ०करणानां चैतद्दिनैतद्भुतमस्तितदिदं यदा स गदोच्चरस्त्रैलोक्य०— क । ३ तद तादृशस्य— क । ४ ०वतां चाग्रे— क । ५ चेतोत्तर लाभे— क । ६ ०वर्त्तिप्रमणितन्नता०— क । ७ म्रियेत तथा— क । ८ विनमयी नास्ति— यदि भवेत्कुलप्रदीपः— क । १० अच्चलमास०— क । ११ प्रचर इवस्थं— क । १२ परा— क ।

शमसदी महमदखां अतग्जहसहोदरात् शरीफखानात्[1] श्रुतं यत् मम बन्धुना द्वाविंशतिवार्षिकेन गजनीदेशे स्वप्नो दृष्टः यत् सकलकलापरिपूर्णश्चन्द्रः स्वाङ्के प्रविष्टः। ततश्च स इमं स्वप्नं निजजनकाय मीरयारमुहम्मदगजनबीकाय[2] विषयेष्वनासक्तावपि गार्हस्थ्यकारिणे सविनयमभिगम्य निवेदयामास। स चैतदाकर्ण्यानन्दभरपूरिपूरितहृदयः कथितवान् अस्यार्थम्॥ वत्स, दास्यति जगदीश्वरस्तां संपदं यया सकलमस्मत्कुलं निखिलजनवन्दनीयतामासादयिष्यति। तथ्यञ्च जातमस्य वचनम्।

अन्यच्च। सत्यवादिभ्योवगतमेतत् यद्यस्मिन् समये तत्रभवती मरयम्मकानी सुरत्राणजननी इदमनर्घ्यं[3] रत्नमुदरे धारयन्ती स्थिता तदा महत् ज्योतिरस्या ललाटे प्रकटमभूत्, यथैतद्दर्शिनो ललाटे आदर्शो निबद्ध इति मन्यन्ते स्म।

ततश्च कदाचिदत्रभवत्या मरयम्मकान्या गजोपवाह्ययाननिविष्टाया निपपात दृष्टिः सरसरसालोपवने[4]। ततश्च दोहदतो निजभ्रातरं ख्वाजहमुआज्जिमसंज्ञकं समाज्ञापयामास—कियन्त्याम्रफलान्युपनय इति। तेन चानीय दत्तान्येतद्धस्ते। तदवसरे चास्य निपपात दृष्टिरस्या भाग्यवति ललाटे। ततश्च सोपृच्छदेताम्[5]—किं भवत्या ललाटे आदर्शो बद्धोस्ति इति। ततश्च समाज्ञप्तमनया[6]—न मयादर्शो निबद्धोस्तीति। कुतो भवन्तो वदन्ति इति। श्रुत्वा चैतत् खोजाकेन किंचित्स्थगितेन भूत्वा निपुणतरमुपलभ्यैतस्या[7] ललाटपट्टे पारमेश्वरं तेजश्चमत्करोतीत्यवधार्य विस्मितेन बभूवे, निजनिकटवर्त्तिभ्यः कतिपयेभ्यश्च कथितम्। अतिप्रकाशतः प्रतिहतदृष्टिना पृष्टमिति[8]॥

अन्यच्च। खानि आजममातुः श्रीमहाप्रभोरुपमातुः[9] पयोमृतदायाः श्रुतं यत् एतादृशभाग्योदयप्राक्कालमेव यामावशेषायां निशायामकस्मादेव महन्महो मत्समक्षमागत्य ममाङ्के प्रविष्टम्। किं बहुना श्रीसूर्य एव[10] मदुत्सङ्गे प्रविष्ट इत्यवधार्य विस्मितायाः मे रोमाञ्चो जातः प्रत्यङ्गम्। इदानीमपि तमानन्दमनुभवामि इति। ततश्च सा समीचीनैतद्दशाफलं समीहमाना नातिचिरमतिष्ठत् तावत् यावज्जगदीशकृपाकटाक्षतः[11] श्रीप्रभुसेवाप्रसादतश्च कुलयुगलेन समं सकलमहीमण्डले महतीं प्रसिद्धिमलभत।[12]

अपरश्च। मवुलाना नूरदीतरखाँसकाशादन्येभ्योपि[13] बहुभ्योवगतमेतत् यत् कदाचित् जन्नताशयान्यस्सन्निहिते प्रसवसमये स गवाक्षसौधान्तस्सन्निविष्टाः प्रसववार्त्तामेव कथयन्त-

---

१ शब्दोफखानात्—क। २ मारम्भमुहम्मदगजनबीकाय—क। ३ दमनर्घरित्नं—क। ४ सरसारोपवने—क। ५ सोपच्छदेतां—क। ६ समाजसमनया क। ७ निपुरान्तरम्—क। ८ दृष्टम्-इति साधीयान् पाठः। ९ ०उपमातः—क। १० श्रीःस्वयमेव—क। ११ समीहमानानां तिच्चिर मनिष्टत्ता वद्या च जगदीशकृपा०—क। १२ ०मलभत्—का; ल०। १३ नूरदांतरावासका०—क।

अकस्मादेव वातायनपथसमागतं ज्योतिरनुपममतिबहलं[1] सहावस्थायिभिर्लोकैः सममपश्यन् । ततश्च प्रश्नकरणसमर्थैः कतिपयजनैः जन्नताशयान्यः किमेतत् इति पृष्टास्समाज्ञापितवन्तः साम्राज्यविटपतोतिनवीनं[2] सकलजनहृदयानन्ददमद्भुतं किमपि पुष्पमाविर्भविष्यति इति ॥

अपरञ्च । मीरअब्दुलहैयुसदरमहाकुलीनः[3] कथयति स्म । ततश्च मया श्रुतम्[4]—यत् कदाचिन्निशायामल्पावशेषायां जाग्रत्सुषुप्त्यन्तरालवर्त्तिनो जन्नताशयान्यः शिरो (अव)नमय्य परमेश्वरप्रार्थनां कृतवन्तः साम्राज्यलक्ष्मीकुलप्रदीपोतिनिर्मलो जात इति मनसिकृत्य ॥ ततश्च मया पृष्टं किमिति प्रार्थना क्रियते इति । ततश्च तैराज्ञप्तम्—यन्मया दृष्टं यस्यां दिशि महाप्रभोरुत्पत्तिरभूत् तां दिशं लक्ष्यीकृत्य[5] यदस्यां दिशि महातारका[6] काचिन्निजवपुषा तेजसा च समं परां वृद्धिमगमत्, आकाशं व्यापयामास, यत्प्रकाशेन भूरिमहीतलं व्याप्तम् । मया च कश्चित् स्वच्छान्तःकरणः पृष्टः – का वा इयं तारका इति । ततश्च तेनोक्तम् – भवतामयं सुपुत्र इति । एतस्य च तेजसा यावन्महीतलं व्याप्तं तावतोयं महाराजो भविष्यतीति । दिनद्वये चातीतेस्या वार्त्तया महाप्रभोरुत्पत्तिवार्त्ताहरः समागच्छत् । तदानीञ्च तैर्विचार्यावधृतम्[7]—यस्मिन् समये मया तारकोदयो दृष्टस्तस्मिन् समये पुत्रोत्पत्तिरभवदिति । यस्य महापुरुषस्यैतादृशसुपुत्रोत्पत्तिर्भाविनी[8] तस्य किमिति नैतादृशी भाव्यर्थसूचिका[9] सिद्धिर्भविष्यति ॥

किञ्च । समीचीनवार्त्ताभिज्ञानां दूरदर्शिनाञ्च नैतदज्ञानविषयः । इदं च तत् । यद्यपि मुल्लाशरफुद्दीं अलीनाम्ना[10] यज्ददेश्येन[11] जफरनामाख्यपुस्तकमध्ये काचोलीबहादुरस्वप्नस्य[12] तोमिनहखांकेन कृतोर्थ एवं लिखितोस्ति – यत् काचोलीबहादुरेण याः प्रकटाः सप्त तारका दृष्टास्तास्तत एव सप्त पुरुषास्तत्सन्ततिः[13], या च निजवक्षसोतिमहती जाज्वल्यमानाष्टमी तारका निर्यान्ती[14] दृष्टा–सा साहिबकिरानी मीरतिमिरापरपर्यायः, य एतस्य महाप्रभोः पूर्वजोष्टम इति । तथापि यैः साम्राज्यलक्ष्मीर्नानुभूता, ते सप्त पुरुषाः तारकोदयतोवधेया इति न सहृदयहृदयमध्यास्ते[15] । किन्तु ये सम्राजः[16] सप्त पुरुषाः साहिबकिरानीतः सप्त ते सप्त तारकाः[17] । या च महती तारका सा शाहनिशाहीक इति ॥

---

१ ०त्तिबहुलं— क । २ साम्राज्ये विटूपतो०— क । ३ मीर अबुल० हैपुसलुमहाकुलीनः— क । ४ मग्नाश्रुतम्— क । ५ लक्षीकृत्य— क । ६ यदस्यां महातारका— क । ७ तौ विचार्य०— क । ८ महापुरुष स्थिता दशासु०— क । ९ सूचिकी— ल, क । १० मुल्ल शोरफुद्दोअली०— क । ११ यज्दश्येन०— क । १२ स्वप्नस्य— क । १३ दृष्टास्नात एव स पुरुषास्ततस्संज्ञति०— क । १४ नियाति०— क । १५ इति न सम्पदहृदयमध्यस्थे०— क । १६ ये सस्माता०— क । १७ सप्तमे सप्ततारका०— क ।

(Chapter III)

अथेदानीं भाग्यवती सम्राज[1]: शाहनिशाहस्योत्पत्तिवार्ता निरूप्यते ॥

परमेश्वरसंरक्षणरूपावरणपटायाः पातिव्रत्यरूपलज्जानिवारकमुखवस्त्रायाः[2] महादेव्या मरयम्मकान्या हमीदहबानूबेगिमसंज्ञकाया तन्माहात्म्यच्छायायाः[3] सर्वदा संरक्षणं करोतु जगदीश्वरस्तस्याः। यः सकलसिद्धाग्रणीः सिद्धरूपताराचक्रध्रुवतुल्यः, जिंदहपीलअहमदिजामः, तस्य वंश्यायाः एतस्य महाप्रभोर्जन्म। अस्मिन् समये विंशतिघटिकासु विंशतिपलयुतासु व्यतीतासु जलालीआबांमासस्याष्टमरात्रेः चतुःषष्ट्यधिकशतचतुष्टयेतीते जलालराज्यात् कदीमी इतिप्रसिद्धसंवत्सराणाम् एकादशाधिकशतनवकेतीते इस्फिंदारमुजस्यैकोनविंशतिमे[4] दिने एकोनपञ्चाशदधिकशतनवकेतीते चान्द्रमानस्य रजबमासस्य पञ्चमरात्रौ रविवासरे नवनवत्यधिकपञ्चदशशतेष्वतीतेषु विक्रमार्कराज्यात् कार्तिके मासि षष्ठ्यां तिथौ तशरीनुल्औव्वल्मासे रूमदेश्ये चतुःपञ्चाशदधिकषोडशशतेष्वतीतेषु रूमराज्यात् षोडश्यां तिथौ द्वाविंशतिपलाधिकदशघटिकावशेषायां रजन्यां सिद्धिक्षेत्रस्य अमरकोटनगरस्य भाग्यप्राकारे द्वितीयइक्लीमस्य मरयम्मकानीमासन्नप्रसवां प्रसवनिमित्तं संस्थाप्य यदा जन्नताशयान्यो ठट्ठादेशग्रहणार्थं चलिताः स्थिताः ॥

अत्रान्तरेऽद्भुतमिदं यदासन्नप्रसववेदना मरयम्मकानी जाता तदा जन्नताशयानीभिः जन्मग्रहविचारार्थं स्थापितो मुल्लाँचाँदनामा श्रुत्वा तस्य मुहूर्त्तस्य[5] दुष्टत्वेन वदतिस्म। यदि कश्चिदुपायो भवति तदा एतन्मुहूर्त्तातिक्रमेतिसमीचीने[6] नेदीयसि मुहूर्त्तान्तरे जन्म शिशोःस्यात्। श्रुत्वा च तदीयां वार्त्तां हसत्स्वन्येषु पुनरपि तेन वार्त्ता श्रुता—यत् प्रसववेदनाल्पीयसी जातेति। तन्निवृत्तौ च बीजमिदम्—यत् अतिबीभत्सप्रसवार्थानीतस्त्रीदर्शनेन विचिकित्सया उद्विग्नचित्तता। ततश्च मरयम्मकानी सुखसुप्ता बभूव। ततश्च समीचीने समये प्राप्ते ताञ्च सुप्तां श्रुत्वा मुल्लाचाँदोतिव्याकुलो जातः। तदा चान्तःपुरजना वदन्ति स्म—किमिति व्याकुलता क्रियते, यत् परमेश्वरेणाज्ञप्तमस्ति तदेव भविष्यति। अतिवेदनां प्राप्य सुखशयिताया निद्राभङ्गोनुचित इति।

ततश्च तदानीमेवातिमहत्या प्रसववेदनया तन्निद्रा व्यरंसीत्। तदानीं चातिसुमुहूर्त्ते एकस्य पुरुषरत्नस्यास्याविर्भावो बभूव। तदानीं च दिशां प्रसन्नताभवत्, ववुः सुखा समीरणाः, अनाहतोपि[7] दुन्दुभिर्दिवौकसां हि दध्वने।

१ सस्नातः०—क। २ पातिवत्य०—क। ३ यन्माहात्म्य०—ल, क। ४ ०चतुष्टयातीते० इस्फिंदारमुजस्य०—क। ५ महर्त्तस्य—क। ६ एतन्मुहूर्त्तातिक्रमः प्रतिसमीचीने—क। ७ अनाहन्तोपि—क।

*परमेश्वरसंरक्षणरूपप्राकारमध्ये सुखास्तरणानि[१] प्रसारितानि। सुखजनकं सर्वं[२] तस्मिन् समये जातम् ॥ तादृशी सभा जाता या गीर्वाणपरिषदमप्युपहसति निजविभवेन। तदानीं च माहात्म्यतारकारूपस्यास्योत्पत्तिसमनन्तरमेव दूराध्वगामी कश्चिदश्ववारः प्रस्थापितः। स च द्वादशक्रोशपर्यन्तं यदा गच्छति तदैव जन्नताशयान्यो निवासान्तराय[३] प्रचलिताः स्थिताः। ततः स दिनं[४] तदतीत्य प्रचलितः॥ द्वितीय दिने च मध्येमार्गं विश्रामार्थं जन्नताशयान्योतिसमीचीनप्रदेशे उपविष्टाः स्वल्पपरिवाराः॥ तदानीं च मेहत्तरिसंबुल् इति दासोतिप्राचीनो यस्मै श्रीमदकबरशाहेन सफ्दरखाँ-पदवी दत्ता। स विज्ञापयामास[५]—कश्चिदश्ववारः समायातीति। ततश्च तैराज्ञप्तं—यद्ययं शाहजात-स्योत्पत्तिं[६] निवेदयिष्यति तदा त्वां[७] सहस्रजनाधिपं करिष्यामीति॥ इत्युक्त्वा च स्वयमपि तदभिमुखमश्ववारान् प्रस्थापयामासुः॥ ते च गत्वा तत उपलभ्य वार्त्तामानन्द-भरपूरितचेतसो दूरादेवोच्चैः सुखवार्त्तां निवेदितवन्तः। श्रुत्वैव जन्नताशयान्यो जगदीश्वरं शिरो निधाय भूमौ प्रणेमुः[८]। ततश्च निवासस्थलमागत्य तत्समयोचितनिरतिशयानन्द-मेदुरास्सभासन्निवेशमकुर्वन्॥ यादृशी सभा न लोकपालैरपि दृष्टपूर्वा॥ ततश्च सेनापतयोगणिताः कृतसेनासंनिवेशाः समागत्य प्रणम्यैतज्जन्मना श्रीमतामधिकाधिक-सकलसंपदवाप्तिरस्तु इत्यादि "मुबारखीं" दत्तवन्तः। पण्डितसमाजाश्चागत्याशिषो ददुः॥ ज्योतिर्विदोपि जन्मसमयमाकलय्य जन्मलग्नग्रहाणां दीर्घायुःशंसिनां सामीचीन्यं निवेदयामासुः॥ तां च जन्मपत्रिकां प्रदर्शयिष्यामि॥ जन्नताशयानीभिरपि ज्योतिः-शास्त्रतत्त्ववेदिभिः स्वयमपि यद्विचारितं तदन्येषामुक्तेन संवादमगमत्॥ सभापूर्ण-तानन्तरं च यत् स्वप्नान्तरे नाम श्रुतमासीत् तदेव नाम चक्रुः॥ पूर्वं सत्यो यः स्वप्नो दृष्टः स्थितस्तस्य मासचतुष्टयाधिकवर्षद्वयेतीते फलं प्राप्तम्॥ धन्यमिदं नाम। धन्यश्चायं पुरुषो यस्य प्रतापेनोदयाचलमारभ्यास्ताचलपर्य्यन्तं भुवनमिदं परिपूरितमस्ति॥

---

१ सुखास्तरणः निप्र०—क। २ सुखेन नकं सर्वें—क। ३ निवासान्तरात्प्रच-लिताः—क। ४ ततस्नद्दिनं—क। ५ स विज्ञाय यान्य स कश्चि०—क। ६ शहिजाहस्यो०—क। ७ तदावां—क। ८ प्रणनामुः—ल, क।

*In the London MS. the fol. numbered as 20 ends at निद्राभङ्गोनुचितः; the fol. numbered as 21 begins with एकविंशतिः......, that forms a part of Chapter XIV. In the Calcutta MS. (p. 32) we find also......निद्राभङ्गोनुचितइति एकविंशतिः ......and the figure 27 is written above चाइमो (Chapter XIV). This proves that even the original Calcutta MS. was of the some source as the London MS. Any way the folio No. 20 of the London MS. is misplaced.

किञ्चास्य महतो नाम्नोन्यायं समीचीनतास्ति यद् वर्णपदनिरुक्त्यभिज्ञैः पारसीवर्णा अष्टाविंशतिः चतुर्णां भूतानां सप्त सप्तेतिक्रमेण निरुक्ताः । तत्र अकारस्तैजसत्वेन ककार आप्यत्वेन बकारो वायवीयत्वेन रकारः पार्थिवत्वेन निरुक्तोसि[1]* । तदेतैश्चतुर्भिर्वर्णैर्न्यूनाधिकभावानापन्नैर्यस्य नामास्ति तस्य कर्मशरीरं भूवलयञ्च सुखयुक्तमेव भविष्यति दीर्घमायुश्च भविष्यति ॥ अपरञ्च । आप्यवर्णवायवीयवर्णयोर्मध्यवर्तित्वेन तैजसपार्थिववर्णयोराद्यन्तवर्त्तित्वेन तदुपलक्षितान् शत्रून् जलमग्निमिव शमयेत् । वायुर्धूलिमिवान्यत उड्डीयापसारयेत् ।

इतो जन्मपत्री लिख्यते[2] ।

१ नियुक्तोस्ति— क ।

*The four letters are *alif* (fire), *kāf* (water), *bā* (air) and *rā* (earth).

2. Here ends the folio marked as no. 23 in the London MS.

There is "31" written in red above या in उड्डीया पसारयेत in the Calcutta MS. This seems to suggest that the fol. No. 31 ended there in the original MS.

The horroscope is given in neither of the MSS. In the original Akbarnāmā the positions of the planets and constellations at the time of birth of Akbar are described in detail in Chapter VII. The following table represents the horroscope in Th. Bloch's English translation of the Akbarnāmā :

II Mercury Jupiter LIBRA III Sun Saturn SCORPIO	I Venus-VIRGO	Tail of Dragon LEO XII CANCER XI
IV SAGITTARIUS	Natus Sunday, 5 Rajab, 949 A.H.=15th October, 1542 O.S., Circa 2 a.m.	X GEMINI
V Mars CAPRICORNUS Moon VI AQUARIUS Head of Dragon	VII PISCES	IX TAURUS VIII ARIES

(Chapter IX)

अथ सकलमङ्गलनिधानस्य महाप्रभोर्धात्रीणां नामानि लिख्यन्ते ॥

तद्यथा—कान्यकुब्जदेशे शम्सदीमुहम्मद्-अतग्‌जहखानेन जन्नताशयानीनां महत्कार्यमनुष्ठितम् । ततश्च सन्तुष्टैस्तैरभिहितं यदेतस्य कार्यस्य फलमिदमेव भविष्यति यदव्यवधानेन योस्माकं पुत्रो भविष्यति तद्धात्री भवद्भार्येति । तस्मात् कारणात् जीजी-अनगामाहूय मरयम्मकान्या शिशुरयं तदुत्सङ्गे समर्पितः । परन्तु तया स्वप्रसवस्यासन्नतया कियन्ति दिनानि न स्तनपानं[1] कारितम् । ततः प्रथमं मरयम्मकान्या अतिपवित्रया स्वयमेव स्तनपानं[2] कारितम् । पुनश्च नदीमकोका-संज्ञकस्य भार्यया फरवृनिशासंज्ञकया[3] ततश्च अनगाभावल-संज्ञका पूर्ण—मनोरथाभवत् । ततश्च कोकी-अनगह-संज्ञकया तोगबेगी-महिलया[4] दुग्धपानं कारितम् । ततश्च बीबीरूपया, ततश्च खालदार-अनगह संज्ञकया सा'आ'दतियारकोका-मात्रा, ततश्च बीचहजाँ-अनगह-संज्ञकया जैन-खाँकोका-जनन्या अतिभाग्यवत्या, एवमन्याभिरपि बहुभिर्दुग्धपानं कारितम् ॥

अत्र यद्यपि अस्य महाप्रभोर्जगदीशेन* बहूनां दुग्धं भोज्यत्वेन निर्मितं तत्कुतः ॥

१ स्नानपानं— क । २ स्नानपानं— क । ३ फरवनिशा— क । ४ महीलया— क ।

* The folio numbered as 24 in the London MS. ends with जगदीशेन and the following one begins with हुकालपर्यन्तं—that forms the subject matter of Chapter IV, and is obviously continuation of the text ending with the folio No. 21 that ends with सच व·

At the folio marked as 24 in it we find the following as cancelled after दुग्धपानं कारितं ।

"बहुभिर्नात्युच्चस्वाभावाभिरस्य कारितत्वेन दुग्धपानकारणस्वाभाव्यानुरोधेन तादृशस्वभावता भवितुमर्हति । तथाप्यवधानवतां चेतस्यतदु—सति यदयं जगदीशस्य बहुतरस्वरूपपरिचेतो भविष्यति ॥ जगदीशस्यासाधारणश्चायं यं तदयंपालनादेवबृद्धिमुपगत इति तत्तुल्यस्वभावे ॥"
It is followed by "अत्र यद्यपि अस्य महाप्रभोर्जगदीशेन with which the folio comes to an end. The words following जगदीशेन in the text are at the folio marked as 1.

The Calcutta MS. too (P. 34) has र्जगदीशेन हुकालपर्यन्तम्.

This MS. seems to break here till upto chapter XIV.

Here the text has been reconstructed on the basis of the English translation of the Akbarnāmā (pp. 131-132), where we have—"Many other fortunate eupolas of chastity were exalted by the excellence of this

यदयं बहूनां जगदीश्वरस्वरूपाणां परिचेता भवत्विति[१] ॥ अवधानवतां दूरदर्शिनां च हृदि प्रकटमेतद् यत् वर्द्धमानलक्ष्म्या[२] नूतनविटपस्यास्य वृद्धिर्जगदीशकृपाजलसमूहत इति । यतो नानाविधानां नात्युच्चस्वभावानां बहूनां दुग्धपानस्य कृतत्वेपि कारणस्वाभाव्यानुरोधेन नात्र तत्स्वभावगन्धोपि । किं बहुना अत्युत्कृष्ट एव स्वभाव इति ॥

अपरमद्भुतमिदं यदयं महाप्रभुरितरशिशुवैलक्षण्येन जननसमय एव स्मयतिस्म । ततोपि ज्ञानिनो वदन्तिस्म यदेतस्य जन्मतः प्रभृति निरतिशयसुखानां वर्द्धमानसंपदां च चिह्नमिदमिति ॥ ततश्चायमनुपमहिन्दोलायामारोपितः ॥

(Chapter X)

अथ शाहनशाहीकस्य अमरकोटतो निर्गत्य जन्नताशयानीनां कटकं प्रति गमनवार्ता लिख्यते ॥

हजरति-जन्नताशयानीभिः ख्वाजमुअज्जिम-नदीमकोका-शम्सदी-अतग्जहखाँ-प्रभृतयः मरयम्मकानीनामानयनार्थं प्रस्थापिताः ॥ ततश्च शा'आ'वानमासस्यैकादश्यां तिथौ मनुष्य-वाह्यचतुरस्रयानमारुह्य* मरयम्मकान्यः शाहनशाहीकं प्रतिपालनरूपोत्सङ्गे निधाय प्रस्थिताः॥ यदा च दिनद्वयगम्ये मार्गे एते समागतास्तदा जन्नताशयानीभिर्निजनिकटवर्तिनो महान्तो महत्या सेनया वृताः[३] प्रत्युद्गमनार्थं स्थापिताः । पूर्वोक्तमासस्य चरमदिने यस्मिन् दिने तन्मिलनं भविष्यति तदा जन्नताशयान्यो वदन्तिस्म । यन्महाभाग्यवान् अयं पुत्रो यदेतस्य निकटागमनेनास्माकं सकलचिन्तापगच्छति[४] । सुखं च बहुतरं[५]

---

service. It was as if there were Divine wisdom in thus implanting varied temperaments by this series of developments (i.e. the wet nurses) so that the pure entity, advancing by gradations, might become familiar with the diverse methods of Divine manifestations. Or it might be designed that the acute and discerning should perceive that this nursling of fortune belonged to the limpid streams of Divine bounty and was not such as to make spiritual nature of this company (of nurses), it is evident to all of what kind that was, as also are the lofty degrees of the stages of this chosen one".

१ परिचेतो भविष्यति—क । २ वर्धिमान०—ल । ३ वृतः—क । ४ ० पगछ—ल । ५ बहुतेरं—क ।

*In the English translation the name of the conveyance is given as *takht-i-rawān* and in ल is written तखरवाँ above मनुष्य.

भवति* । कथमेते[१] स्वच्छान्तःकरणाः[२] परमेश्वरबोधनप्रकारं नावगच्छेयुः । सुमुहूर्त्ते च जन्नताशयानीनां[3] देदीप्यमाने चरणकमलयुगे शाहनशाहीकस्य[४] महाभाग्यवतः[५] शिरः प्रणतमकारि । ते चैनमङ्के निधायास्य सुभाग्यं शिरश्चुचुम्बुः[६] ॥ परमेश्वरतोतिसुखं प्राप्य वारंवारं शिरो भूमौ निदधुः । परमेश्वरद्वारसंरक्षकैरेतेषां हस्ते निक्षेपः समर्पितः । समर्प्येदमुक्तम्—अयं स निधिः यद्यद्भवतामपेक्षितं तदस्माद् गृह्यताम् ॥ सामुद्रिकैश्चास्य ललाटे साम्राज्यलक्ष्मी-तेजःपुञ्जप्रकाशा दृष्टाः । हस्तरेखाभ्यश्चावगतम्—परमेश्वरच्छाया सम्राट् जात इति† ॥

(Chapter XIII)

अथ वंशावली लिख्यते ॥

एतस्य[७] हजरतिशाहनशाहीकस्य पूर्वजाः सर्वेपि सम्राजो बभूवुः । श्री-अबुल-मुजप्फरजल्लालदीमुहम्मदअकबरपातिशाहः[१] । स नसीरुद्दींमुहम्मदहुमायूँपातिशाहात्[२] । स जहीरुद्दींमुहम्मदबाबुरपातिशाहात्[3] । स उमरशयेखमिर्जातः[४] । स सुल्ताँ अबूसअीदमिर्जातः[५] स सुल्ताँमुहम्मदमिर्जातः[६] । स मीराशाहात्[७] । स साहिबकिराँ अमीरतिमुरकुरगाँतः[८] । स अमीरतरागायितः[९] स अमीरवरकुलात्[१०] । स अलंगिरबहादुरतः[११] । स इचिल्नोयाँतः[१२] । स कराचारनोयाँतः[१३] । स सोगोहेजे-जनतः[१४] । स इर्दामजीवरलासतः[१५] । स काचोलीबहादुरतः[१६] । स तोमीन-हखाँतः[१७] । स वायसंगुरखाँतः[१८] । स कायदूँखाँतः[१९] । स जूमिननखाँतः[२०] । स‡ बूकाकाआँतः[२१], स बूजञ्जरकाआँतः[२२], स अलंकुवातः[२३], सा च चोवीन-

१ कस्य मेने—क । २ स्वान्तःकरणाः । ३ तन्नताशयोनोना—क । ४ देदीप्यमाने चरणक्रमलपुरेशहन साहीकस्य—क । ५ महाभाग्यवत् शिरः—ल । ६ शिरद्चुवुवुः । †In ल the word भविष्यति is cancelled between जात and इति. ७ एतत्स हजर०—क ।

* The fol. numbered as 1 in the London MS. ends with सकलचिन्ताप गछ, and the fol. marked as 13 begins with तिसुखं भवति । In the Calcutta MS. (p. 18) we find...सामार्गप्रदर्शकबुद्धिं साथानावराजानाभिंसुख च······ Above "सुखं च" is written 15 a. So in its original the fol. No. 14 ended with—नाभि (see above, p. 11, footnote 10).

‡स बू ends the folio marked as 13b and काका आँतः begins the folio

बहादुरतः[२४], स युल्दुजतः[२५], स मंगलीख्वाजहतः[२६], स तिमिरुताशतः[२७], स च कयावंश्यः[२८]। स चइलखाँतः[२९], स तँगिजखाँतः[३०], स मँगलीखाँतः[३१], स युल्दुज्-खाँतः[३२], स आयखाँतः[३३], स गुनखाँतः[३४], स उगुरुखाँतः[३५], स कराखाँतः[३६], स मुगुल्खाँतः[३७], स अलंजहखाँतः[३८] स गिवक्खाँतः[३९], स देववाक्आतः[४०], स अलँजह-खाँतः[४१], स तुरुकतः[४२], स याफिसतः[४३], स नूहतः[४४], स मुतवश्लिखतः[४५], स अखनू-कतः[४६], स वरदतः[४७], स महलाइल्तः[४८], स कैनानतः[४९], स अनूशतः[५०], स शीसतः[५१], स आदमात्[५२]—इत्येष वंशः।

शाहनशाहीतः युल्दुजः पञ्चविंशतिमः पुरुषोस्ति तावत्पर्यन्तं सर्वेषां कर्माणि ग्रन्थेषु निर्णीय लिखितानि सन्ति। मँगलीख्वाजहतः इलखाँ-पर्यन्तं प्रायशः वर्षसहस्रद्वयं जातं भविष्यतीति तत्कर्माणि ग्रन्थेषु न दृष्टानि। तद्बीजं चाग्रे कथयिष्यते।

इलखाँतः आदमपर्य्यन्तं पञ्चविंशतिः पुरुषाः। तेषां कर्माणि च पञ्जीकरैर्लिखितानि सन्ति, तानि न मया लिखनीयानि।

सुबुद्धयो न्याययुक्तान्तःकरणाः परमेश्वरपरिचयतो निर्मत्सराः प्राचीनवार्त्तानां परिच्छेदकर्त्तारः। तेषामग्रे इदमाच्छन्नं नास्ति—यत् प्रसिद्धमस्ति यवनानां मनुष्योत्पत्तेः आद्यायाः सप्तसहस्रवर्षाणि जातानि। अग्रे न स्थिता इयं सृष्टिः। एनमर्थं बुद्धिर्न स्वीकरोति न वा दूरीकरोति। एवमन्यान्यप्यर्थान्। उक्तं च—युक्तियुक्त-मुपादेयं वचनं बालकादपि। अन्यत् तृणमिव त्याज्यमप्युक्तं पद्मयोनिना॥ चातुर्वर्ण्यविभागवतां† हिन्दूकानां यानि पुस्तकानि खिता-पुस्तकानि च यानि येषु ग्रहगतिविचारः तन्मर्यादाश्च या उक्ताः सन्ति, तत् सर्वं प्रत्यक्षसंवादि भवति। तेभ्यः मध्यदेशपण्डितैस्तथान्यैश्च पण्डितैर्युक्तिसिद्धार्थग्राहिभिर्नैय्यायिकैः सकलकालीनचरितवर्णकैः कृताभ्य आख्यायिकाभ्यश्च इदं ज्ञायते अस्य संसारस्यानादितैवास्ति। यदि कथंचिदादिः तदापि न कालसंख्यानियमः कर्तुं शक्यते इति अनादितुल्यतैव। उक्तं चेदमस्ति तत्तद्दर्शनकारैः॥ किंच तपस्यया वैराग्येण[१] शास्त्राध्ययनेन च मध्यदेशे प्रसिद्धानां क्षपणकाणां[२] श्वेताम्बराणां पुस्तकेभ्यः तद्वचनेभ्यश्चेदं ज्ञायते यदस्य संसारस्यादिशून्यता

marked 227, that ends at उक्तंच ॥ दुक्ति is continued at folio marked 222, that begins with युक्तमुपादेय।

१ वैराग्येन। २ क्षपणकानां। † हिंदुकानां is written above चातुर्वर्ण्य in ल।

अन्तशून्यता च। तद्विचारश्च तद्ग्रन्थेष्वेव विस्तीर्णं इति ततोवगन्तव्यः।

येषां वचने कर्त्तव्यतायां सेवायां च सर्वं हिन्दुस्थानं तत्परमस्ति तेषां ब्राह्मणानां मते कालः चतुर्युगरूपः प्रसिद्धः। ततोपि संसारानादितैवाभाति।

अन्यच्च शेष इबिनि अरबी तथा शेखसएदुद्दीं हमूयह-नाम्नोः सिद्धयोः कालदेशव्यवहितार्थग्राहकमध्यवर्त्तिनोः पुस्तकमध्यवर्त्ती इलाही-दिनरब्बानीदिनयोः[१] विस्तारः सोप्येवमेव।

नफायसुअलफुनूँन-नामकग्रन्थस्वामिना कथितम्—चरितवर्णनपुस्तक* खितायीमध्ये एवमस्ति यत् आदम-समयतोस्मत्कालपर्य्यन्तं सप्तशतं पञ्चत्रिंशत् हिजरी-मुहमदी अतीताः सन्ति। अष्टौ† (सहस्राणि अष्टौ) शतानि त्रयःषष्टिः वनाः नवसहस्राणि अष्टशताधिकानि शरदामतीतानि। वनसंख्या चायुतं वर्षाणाम्।

एवं चान्याभ्योपि बहुतराभ्यो वार्त्ताभ्यो ज्ञायते। परमेश्वरशक्तिविशालततया नगरे बहवः आदमाः संभाव्यन्ते। यथा इमामजाफरेणाप्येवमेवोक्तम्। अस्माकं पिता य आदमस्ततः पूर्वं सहस्रसहस्रम् आदमाः जाताः तिष्ठन्ति। शेखअिबिनि-अरबी कथयति स्म—दूरं नास्ति इदम् रब्बानीदिनानां[१] पारमेश्वरीयाणां सहस्रवर्षात्मकानां प्रतिसप्तकं सप्तग्रहाणां राज्यं भवति। तत्र सप्तके एकस्य आदमस्य संततिरुच्छिद्यते। आदमान्तरं च भवति।

प्रसंगादेतदुक्तम्। प्रकृतमनुसरामः।

(Chapter XIV)

आदमतः हजरतिशाहनशाहीकं यावत् द्विपञ्चाशदधिकपुरुषाणां चरितं महाप्रभु-चरितमेव भवतीति किंचित् किंचिदुपवर्णयामि।

प्रसिद्धमेतत्। इतः किंचिदधिकसप्तसहस्रवर्षेभ्यः पूर्वं केवलपरमेश्वरशक्तेः शुक्रशोणितसंनिपातं विना महाभौतिकं शरीरमुत्पन्नम्। एतच्छरीरयोग्यं जीवं प्राप्य तत् आदम इति नाम प्रापत्। स च दीर्घशरीरः गोधूमवर्णः कुञ्चितकेशः

---

१ रब्बानी = Divine week *आख्यायिका is written above पुस्तक in ल।

†The folio marked as No. 222 ends with अष्टौ शता, that is continued at the folio marked 215, that begins with निन्नयः।

शोभनमुखः। तद्दीर्घतायां विप्रतिपन्ना भूयांसः। तथापि बहुभिर्निर्णीतमिदं यत् षष्टिगजपरिमिता तस्योच्चता। तस्य च वामपार्श्वतः हवानाम्नी प्रादुरभूत्। तौ मिथुनीभावं जग्मतुः। तयोश्च सन्ततिर्जाता। स च यदा परलोकमगमत् तदा तस्य चत्वारिंशत्सहस्रपरिमितान्यपत्यानि तद्वंश्यान्यासन्। तस्य पुत्रा *एकविंशतिः विंशतिः कन्याः एकोनविंशतिरित्येके। तेषां च शीसो ज्येष्ठः। श्रूयते चादमो मध्यदेशे मृत इति दक्षिणदिशि शरद्वीपे[1]† निखातः तिष्ठति।

इदानीञ्च तत्स्थानम् आदमस्य[2] चरणस्थलमिति प्रसिद्धम्। एकविंशतिदिनानि असुरथ[3] आसीत्। तत्पत्नी च हवा पतिमरणानन्तरं त्रिभिर्दिनैः एकेन वर्षेण सप्तभिर्वर्षैर्वा मृतेति त्रेधा वदन्ति।

शीसो ज्येष्ठः[4] सुतः तत्स्थानाभिषिक्तः। तेन हवा आदमनिकटे निखाता। एवं यवनपुस्तकेषु तिष्ठति – यत् तुफानाख्यजलवृद्धिसमये नूहपैगम्बरेण आदमशवं हवाशवं चास्थिनिक्षेपपात्रमध्यवर्त्ति अबूकुवयसपर्वते वा वैतुलमकूदिसनगरे[5]‡ वा कूफहदेशस्य[6] नजफनगरे वा नौकामध्ये संस्थाप्य नीत्वा निखातमिति।

शीशः।

शीसस्तु आदमस्यौरसः सुतः तत्सुतेषु प्रवरः हाविलस्याग्रजस्य नाशानन्तरमुत्पन्नः। एवमनुश्रूयते—यदा हवा गर्भवती भवति तदा मिथुनमेव जनयति विना शीसम्। अक्लिमिया काविलस्याग्रजस्य सहोत्पन्ना शीसस्य भार्याभवत्।

यदा च आदमस्य वर्षसहस्रमायुरतीतं तदा तेन यौवराज्ये शीसोभिषिक्तः सर्वेषां च एतदाज्ञायां स्थातव्यमित्याज्ञा दत्ता। ततश्च आदमे सिद्धिं गते स्वधर्मलोकयोः परिपालनं च शीसत एवाभवत्। नूहकालीनजलसमुद्रवृद्धौ शीससन्ततिं विना कोपि नावशिष्टः। तं च मुअल्लिमि-औव्वलं कथयन्ति। अस्यार्थः। आद्याध्यापकं

*एकविंशतिः begins the folio marked as 21 in the London MS. †In the London MS. रंदीवे is written over the word शरद्वीपे. ‡Below नगरे occurs स्थले in the London MS.

१ शररंदीविद्विपे— क। २ आरमस्य— क। ३ दिनानि असुरथ असुरथ— क। ४ सोनोष्टः— क। ५ वैतुलमकादिसन स्थले गरे वा— क। ६ कफफहदेशस्य— क।

कथयन्ति । स च बहुकालपर्य्यन्तं† शामदेशे स्थितः । तस्य च बहवः पुत्राः तपस्विनो विरक्ता बभूवुः । यदा च द्वादशाधिकनवशतं वर्षाणि जातानि तदा सिद्धिं गतः ।

॥ अनूश (:) ॥

अनूशस्तु शीसे षट्शतवार्षिके जाते ततो बभूव । तस्य च मातायोनिजेति केचिद् वदन्ति । स च पितर्युपरते तत्पदं पालयामास । स एव च राज्यकरण-रीतिमाद्यामाविश्चकार । षट् शतानि च वर्षाणां स राज्यं चकार । द्वीपान्तरवर्त्तिनो[१] लोकाः फिरङ्गीति प्रसिद्धाः पञ्चषष्ट्यधिकनवशतं वर्षाणि राज्यं कृतवानिति वदन्ति । इब्निजौजी कथयति स्म—नवशतं पञ्चाशद्वर्षाणि । काजीबैजावी षट्शतं वर्षाण्यायुरिति वदतिस्म । एतस्य भूयसी सन्ततिर्बभूव ।

कैनाननामा अनूशतनयेषु स्वच्छान्तःकरणो बभूव । स च पितुः पश्चाद् राज्यं चकार । पितामहादिभिस्तुल्यमेव धर्मं चकार । वाविले स्थले गृहं निर्ममे । सूसनगरञ्च[२] निवेशयामास । उद्यानानि गृहसंनिवेशाश्च तेनैव निर्मिता इति वदन्ति । तत्समये च बहवो मनुष्या जाताः । ततो बहुतरेषु मनुष्येषु जातेषु ते यत्र तत्र स्थापिताः । स्वयं च शीससन्तत्या समं बाविले निवसति स्म । नवशतं षड्विंशतिः वर्षाणि तस्यायुः । अथवा चत्वारिंशदधिकषट्शतं वर्षाणि । केचिद्वदन्ति किञ्चिदूनशतं वर्षाणि पितृपदे स्थितः ॥

महलाइलः ।

कैनानपुत्रेषु श्रेष्ठः कैनानेन (न)वशतवर्षेषु गतेषु स्वपदेभिषिक्तः । तेन वर्षशतत्रयं राज्यं कृतम् । षड्विंशत्यधिकषट्शतं वर्षाणि तस्यायुः । अथवा चत्वारिंशदधिकाष्टशतं वर्षाणि । अथवाष्टशतं पञ्चनवतिः ।

वरदस्तु महलाइल-सुतेषु श्रेष्ठः पित्रा स्वपदेभिषिक्तः । तेनैव कुल्याः

---

१ द्वयान्तरवर्त्तिनो — क । २ स्वस स्तस नगरं च— क ।

†In the London MS हुकालपर्यन्तं occurs at the folio marked as No 25.

कृताः । नवशतं द्विषष्टिरथवा सप्तषष्टिर्वर्षाणि[1] तस्यायुः । एते च ये गणिताः वरदं यावत् ते सर्वे आदमे जीवत्येवोत्पन्नाः ।

अखनूख इदरीश इति प्रसिद्धः वरदतो बभूव आदमे सिद्धिं गते जातः । स यद्यपि तत्तनयेषु कनिष्ठस्तथापि गुणैर्भाग्येन च ज्येष्ठो बभूव । केचिद्वदन्ति आदमे जीवत्येव शतवार्षिकः स्थितः केचिच्च षष्ट्यधिकशतत्रयवार्षिकः स्थितः इति । स च राज्यरीतिषु[2] परमेश्वरपरिचायकशास्त्रेषु एकः स्थितः । ज्योतिःशास्त्राणि लिपिकर्त्तनवयनसीवनानां[3] शास्त्राणि च तत एव प्रवृत्तानि । येन च गाजीमूनमिश्रीतो[4] द्वितीयाध्यापक इति प्रसिद्धात् सर्वविद्याः प्राप्ताः ।

एनञ्च तृतीयोध्यापक इति वदन्ति । (तेन) परमेश्वरपरिचर्येतिशयितमहत्तरत्वं प्राप्तमासीत् । तेन च द्विसप्ततिभाषाभिः परमेश्वरपूजायां विश्वमानीतं नगरशतं च निर्मितम् । तेषु चाल्पं जहानाम-नगरं समुद्रद्वीपे निर्मितम् । तच्च हलांकूखाँ-समयं यावत् जनैः परिपूर्णमासीत् ।

तेन च सर्वे मनुष्यकूटा[5] यथाज्ञानयोग्यत्वं परमेश्वरपरिचयमार्गेषु निवेशिताः । एवमनुश्रूयते तेनैव श्रीसूर्योपासनाया महत्याः प्रकारः सर्वेषामुपदिष्टः । स च धर्मवृद्धिकरं प्रतिसंक्रान्ति उत्सवं कृतवान् । विशेषतश्च मेषसंक्रान्तिसमये समीचीनमुत्सवं चकार । यदा चान्येपि ग्रहाः स्वोच्चस्थले आयान्ति तदापि परमेश्वराराधनां कृतवान् । संक्रान्त्यादिसमयान् परमेश्वरीयसंपदवाप्तिस्थलमिति जानन् स्थितः । तस्य च देवताराधन एव सर्वः समयो गच्छन् स्थितः[6] ।

अहराममिस्रीकस्य गुम्मजाः यान् "गुम्मज-हरमा" इति वदन्ति ते तेनैव निर्मिताः । तेषु च सकलशिल्पशास्त्राणि लिखितानि सन्ति । यानि दृष्ट्वा सर्वेषां तत्परिज्ञानं भवति । केषुचित् पुस्तकेषु एवं तिष्ठति तदाज्ञयातिसम्पन्नेन केनचित् कृतानीति । स सकलभूमण्डलं परिभ्रम्य पुनरपि मिसिरदेशं समागतः ।

मिस्र-देश्ये मनीफनगरे मनूफ[7] इति प्रसिद्धे उत्पन्नः । पारशीकाः एवं वदन्ति स कयूमरसस्य[8] पौत्र इति । तेन चेदमुक्तम् – समीचीनाधर्मास्त्रयः[9] – क्रोधसमयेपि सत्यानुष्ठानम्

---

१ सप्तषष्टिवर्षाणि— क; द्विषष्टिरथवा सप्तषष्टिर्वं०— ल० । २ स च रापरी०— क० । ३ ०वपन०– क० । ४ ० मिश्रीति–क० । ५ मनुष्यकठां– क । ६ समयोग उपस्थितः— क । ७ मनूक— क । ८ कयमरसस्य— क । ९ समीचीनाधमस्त्रियः— ल ।

अन्यायाकरणम्, अकिञ्चनतायामपि दानम्, शक्तौ सत्यामपि क्षमा इति। तस्य च मिसिरदेशतः परलोकगमनवार्त्ता यादृशी ग्रन्थेषु दृश्यते अनेनैव[1] शरीरेण सूर्यलोके तिष्ठतीति। सा न बुद्धिविषयतामारोहति। स च यदा इतो गतस्तदा पञ्चषष्ट्यधिकाष्ट-शतवार्षिकः[2] पञ्चाधिकशतचतुष्टयवार्षिकः पञ्चषष्ट्यधिकशतत्रयवार्षिकः स्थित इति केचित् केचिद्वदन्ति।

मुतबश्लिखस्ततोजायत[3]। तस्य च बहून्यपत्यान्यासन्[4]। यानि न गणयितुं शक्यन्ते। स च पितरि परलोकं गते परमेश्वरपूजां विश्वस्योपदिश्याकारयत्। तस्य च नवशतवार्षिकस्य लमकनामा[5] पुत्रो बभूव। जाते च तस्मिन् शतद्वयं वर्षाणि पुनरपि जीवतिस्म। लमकश्च पितर्युपरते तत्सिंहासनं प्राप्य अशीत्यधिक-सप्तशतवर्षाणि जीवितमधारयत्।

नूहश्च[6] तस्मादजायत आदमे—सिद्धिं गते षड्विंशत्यधिकशतवर्षेष्वतीतेषु। परमेश्वरपूजाकरणस्य नवं मूलमनेन कृतम्। इयं तस्य वार्त्ता बहुभिर्लोकैस्तदीया परमेश्वरपूजनाज्ञानकृता तत्समये च तूफानाख्या जलवृद्धिर्जातेत्यादि सर्वजनेषु बहुलीभूतमस्ति†। तारीखाख्यकाव्यकर्तृभिस्तूफानाख्यजलवृद्धयः तिस्रो गणिताः। एकास्माद् आदमात् पूर्वम् एका च नूहसमये अपरा च मूसापैगम्बरसमये। नूहकालीनजलवृद्धिः षण्मासपर्यन्तं[7] स्थिता। आशीतिर्मनुष्यास्तदीयां नावमारुह्य स्थिताः। ते च[8] नौकाया अवतीर्याल्पेनैव कालेन क्रमशः सिद्धिं[9] गताः। सप्तावशिष्टाः। तत्रैको नूहस्तस्य च त्रयः पुत्राः याफिससामहामनामानः[10]। तिस्रश्च पुत्रवध्वः। तदा च नूहेन सामनाम्ने[11] सुताय शामदेशः जजीराख्याः[12] केचन द्वीपाः इराकपारस-खुरासानदेशा(श्च) दत्ताः। हामाय च अस्ताचलदेशहबशह-हिन्दुस्तान-सिन्धुदेशा दत्ताः। याफिसाय च चीन-सकूलावतुरुकदेशा[13] दत्ताः। आख्यायिकाकारा एवं वदन्ति—येन

---

१ दृश्यते तेनैव— क। २ ०काष्ट— ल। ३ तेमुतवश्लि इव— क। ४ ०पत्या-न्यास रूपातित गण०— क। ५ स्थलमकनामा— क। ६ ऊहश्च— क। ७ परा-मास०— क। ८ ति च— क। ९ अमशसिद्धिं— क। १० सामहामनाधान०— क। ११ सामनास्त्रे— क। १२ तजीराख्याः— क। १३ ०तुरुष्क०— क।

† In the English translation the relevant line reads "The story of his calling mankind to the worship of God, the disobedience of his people etc. are well known." It seems we should have for तदीया something like तदीयावज्ञाकारिता.

यो देशः प्राप्तः तद्देशीयास्तत्सन्ततिरिति । जलवृद्धेः पश्चात् इयं बनी-आदमसंज्ञका सृष्टिः एतेभ्यः त्रिभ्य एव जातेति वदन्ति । आयुरेतस्य षोडशशतं वर्षाणि वा त्रयोदशशतं वर्षाणि वा । जलवृद्धेः पश्चात् सार्द्धद्वयशतं वर्षाणि सार्द्ध-त्रयशतं वर्षाणि वा जीवन्स्थितः[१] । सार्द्धनवशतं वर्षाणि जगदीशपूजनमार्गप्रदर्शन-मनेन कृतं लोकेभ्यः ।

सामहामयोश्च नव नव पुत्रा आसन्* । याफिसश्च तेषां प्रवरो बभूव । शाहनशाहीकस्य परम्परा तत एव । प्राच्यमहानगराधिपास्तुरुकस्थानाधिपाश्च तस्यैव सन्ततिः । तञ्च—"अबूअल्तुरुक" इति कथयन्ति । यदा च पित्रायं सकुटुम्बः पूर्वोत्तरदेशयोः प्रस्थापितस्तदानेन पिता प्रार्थितो यत् यथाकामी पर्जन्यो[२] येन भवति तत्किञ्चिदुपदिशन्त्विति । तदा च पित्रास्मै वृष्ट्यु-त्पादकस्वभाव एव वा अभिमन्त्र्य वा कश्चित् प्रस्तरो दत्तः । स च तुरुकदेशे अद्याप्यस्ति यं "संगियदह" इति कथयन्ति । ततश्च स याफिसस्तं देशं प्राप्य नगराद् बहिरेव निवासमरोचयत्[३] । कृषियोग्यायां च भूमौ स्थिते तस्मिन् तन्मनोरथसमकालमेव तत्प्रस्तराङ्गीकारेण जगदीशो[४] निजकृपाकटाक्षमेघं ववर्ष । तस्य च सन्ततिर्बभूव । तेन च समीचीना रीतयो भूयस्य आविष्कृताः याः समीचीनैः साधारणैश्च जनैः स्वीकृताः ॥

तस्य चैकादशसुतेषु तुरुकः प्रवरो बभूव । अवहितहृदयः कार्यकर्त्ता च (स) पितर्युपरते सिंहासनमारुरोह । तेन च समीचीनायां भूमौ शीतोष्णनिर्झरवत्यां[५] निवासः कृतः । तृणकाष्ठगृहाः स्वबुद्ध्यैव स्वार्थं निर्मिताः । काष्ठगृहविशेषाः "खरगाह" इति यवनप्रसिद्धाः तेनैव निर्मिताः । चतुष्पदचर्मणा च परिधानार्थं वस्त्राणि तेनैव निर्मितानि । लवणं च तत्समये एव संजातम् । तेन च रीतिरिय-माविष्कृता यत् पितुरनन्तरं पुत्राय विना तरवारिं न किञ्चित् धनं देयम् किन्तु सर्वं कन्यायै दातव्यमिति । कथयन्त्येवं कयूमरसः तत्समकालीन इति । यथा च

---

१ जीवरूपस्थितः— क । २ यत्पथकामीपर्जंन्यो— क । ३ निवासमरोचयते—क । ४ तत्प्रस्तराङ्गीकरणजगदीशी — क । ५ ०निभर्भर० ल, भूमौ भीतोदप्रतिइर्सरवत्यां— क० ।

*In the London MS. the fol. No. 28 ends with लोकेभ्यः । सा ; the fol. No. 29 is wrongly brought here. : the fol. No. 30 begins with महामयोश्च ।

कयूमरस अजमपातिशाहानामाद्यः तथा याफिसः तुरुकस्थानपातिशाहानामाद्य इति। चत्वारिंशदधिकशतद्वयं वर्षाण्यस्यायुः।

अलंजहखाँ तत्तनयेषु मुख्यो बभूव। तुरुकेण च स्वस्य चरमे वयसि मन्त्रिमन्त्रतो निजपदे (स) स्थापितः। तेन च नीतिः पुरोवर्तिनी कृता। स च वार्द्धके एकान्तशीलो बभूव॥

ततश्च तत्तनयस्तदाज्ञयैव देववाक्कआनामा तत्पदमध्यारुरोह। गिवक्खाँ तत्पुत्रः पित्रा स्वोपरतिकाले सिंहासने उपवेशितः।

अलंजहखाँ (तस्य) पुत्रेषु प्रवरस्स बभूव। स च पितरि वृद्धे यौवराज्यमवाप। दानन्याययोश्च तेन यथावदवस्थापनं कृतम्। तद्राज्ये च तुरुकाः संपदुन्मादेन अन्यायसक्ता अभवन्। तस्य च भूयसि कालेतीते यमलं[1] पुत्रद्वयं बभूव। तयोर्ज्येष्ठो मुगुलखाँनामा तातारनामा[2] यवीयान्। तयोश्च द्वयोः पित्रा राज्यं विभज्य दत्तम्। पितरि सिद्धिं गते तौ द्वावपि परस्परं प्रीत्यैव राज्यं चक्रतुः।

मुगुलखाँ अलङ्घनीयशासनो ज्ञानी स्थितः लोकैः सार्द्धं सम्यगाचरणः अतो लोकसेव्यः आसीत्। मुगुलखानमारभ्य एलखाँपर्यन्तं नव पुरुषाः सकल शुभप्रदा जाताः। अतो नवसंख्या सर्वत्र शुभदेति मत्वा "नुक्कसं" कल्याणप्रदं ज्ञातं[3] मुगुलैः। तस्य चत्वारः पुत्राः कराखाँ–आजरखाँ–गरखाँ–उजखाँ–प्रभृतयः। तन्मध्ये (कराखाँ) वयसा राज्यकरणात् ज्येष्ठः श्रेष्ठः आसीत्। (स) पित्रनन्तरं सिंहासनमारूढः।

तस्य पुत्रः तुगुरुखाँ पितू राज्यसमये[4] महाकुलीनातो जातः बुद्धिप्रियः सम्राट् परमेश्वरपूजको न्याययुतः परस्परविरुद्धविरोधनिवारकमिलनप्रवर्त्तकरीतिप्रदर्शकः। भूयांसो देशा अनेन गृहीताः। तुरुकसमूहानां यथायोग्यम्[5] अल्लसमाख्योपनामकरः। तस्य षट् सुताः—गन–आय–युलदुज–कोक–ताक–तिङ्गिराः। एतत्सन्ततेः[6] पुत्रनप्तृप्रभेदतः चतुर्विंशतिर्वंशाः जाताः[7]। सर्वे तुरुकमानाः एतद्वंश्याः।— एवं हि कथयन्ति। तुगुरुखाँ दिग्विजयं कृत्वा स्वदेशमागत्य सभां कृतवान्।

---

१ यमलजं— ल, क। २ नानातारनामा— क। ३ ज्ञानं— क। ४ राज्यस०— ल। ५ तुरुकसमूहानां यथायोग्यं अल्लासमाख्योपनामं करः— क। ६ एतत्संतेः— ल। ७ वंशा नामा— क।

पुत्राः सेनापतयः अन्ये शस्त्रधराश्च राजयोग्यप्रसादैरनुगृहीताः[1] संशिक्षिताश्च। अयं निश्चयः कृतः—दक्षिणपार्श्वस्य संज्ञां तुरुकमानाः "बरङ्गार"इति व्याचक्षते, "बरङ्गारः" युवराजश्च ज्यायान्[2] सुतः, तत्सुताश्च। वामपार्श्वस्य[3] संज्ञां "युङ्गार" इति आहुः। "युङ्गारः" राजाज्ञाया आज्ञापकश्च कनीयान् तत्सन्ततिश्च। मद्वंश्यानां सर्वेषामियं रीतिरिति निश्चयः। इदानीमपि चतुर्विंशतिवंशानामर्द्धं दक्षिणपार्श्वपक्षपाति अर्द्धं वामपार्श्वपक्षपाति वर्त्तते। त्रिसप्ततिः द्विसप्ततिर्वा वर्षाणि राज्यं कृत्वा सिद्धिं गतः।

ततः। गनखानः पितृस्थानं लब्धवान् पितृवचनात्, यतो विना पितुराज्ञां राज्यं न लभ्यते। दूरार्थविषयकज्ञानेन पितृमन्त्रिणः कबलखोजाकस्योपायैश्च स राज्येवाप्तकामोभवत्। भ्रातृभिः समं स्वपुत्रैः भातृव्यैश्च समं स तादृशं व्यवहारमकरोद् येन ते सर्वे तस्य राज्यकरणे सहाया बभूवुः। सप्ततिवर्षाणि राज्यं कृत्वा आयखाँकं युवराजं कृतवान् ततश्च सिद्धिं गतः।

ततश्च आयखाँ जाग्रद्भाग्येन पितुः रीतिं धारयामास न्यायकर्त्ता सुखजनकस्वभावश्च बभूव। ज्ञानं समीचीनकर्त्तव्यतया समं योजयामास।

युल्दुजखाँ महान् सुतः तत्पदे सिंहासने उपविष्टो बभूव। राज्यभारे महत् माहात्म्यं तस्य बभूव।

मङ्गलीखाँ प्रियः तस्य सुतो बभूव पितुरनन्तरञ्च राज्यमवाप्तवान्। परमेश्वरकृपाकटाक्षतोतिमहान् बभूव॥

तिङ्गिज्खाँ तत्सुतः पितरि सिद्धिं गते एकशतं दश वर्षाणि राज्यमकरोत् मुद्गलदेशे[4]।

एलखाँ तत्तनयः। तस्मै च पित्रा स्ववार्द्धके[5] राज्यभारः समर्पितः। स्वयं च राज्यकरणसमये कृतानां दुश्चरितानां विशोधनार्थमेकान्तवासशीलो बभूव। कयाँनामा हृदयंगमः[6] तस्य सुतो बभूव। स च परमेश्वरेच्छावशाद् भूयसीनां दुरवस्थानां भाजनं बभूव। यदा हि जगदीश्वरः स्वीयपरिचयरूपाणां माहात्म्यानां सम्पूर्णभाजनं

---

१ शास्त्रधरा अराजयोग्यप्रसादै०— क। २ यायान्सुतः— क। ३ वामपाश्वस्य— क। ४ मुहुल०— क। ५ सर्वार्द्धके— क। ६ हृदयं गमसस्य— क।

कर्तुमिच्छति तदा तदीयकियन्मनोरथान् दुःखेषु प्रदर्शयति तदीयानतिमहतः तदर्थे बलिं दत्त्वा तमुत्पादयति। एतद्वार्तायाः साक्षिणी एलखाँ-कथा वर्त्तते येन स्वराज्ये[1] सबाह्याभ्यन्तरसंसारयोर्यथायथं सन्निवेशः कृतः। सर्वत्र भ्रमचित्तसमाधानकर्त्ता तावत्पर्यन्तं यावत्पर्यन्तं तूरनामा फरीदूं-पुत्रः स्वबलेन तदुपरि युद्धार्थमागतः। तेन तस्माद् युद्धात् पलायनं कृत्वा छलेनावशिष्टायां रात्रौ तदुपरिपतितेन कयाँ तन्मातुलपुत्रः तगुजः तयोर्भार्याद्वयं विहाय* सर्वे मारिताः। तदनन्तरं कयां अतिदुःखितस्ततो निर्गत्य जलमूलफलादिमति वनदेशे स्थितः। तत्स्थलस्य नाम अर्किनहकुं इति तुरुष्कैः कृतमस्ति। एवं लोकैरुच्यते यदयं वृत्तान्तः तुगुरुखाँ अनन्तरं[2] सहस्रवर्षोत्तरं जात इति।

एतादृशाद्भुतवृत्तान्तेन ज्ञानिभिरेवं ज्ञायते - शाहनशाहीकस्योत्पादे अयमुपाय इति। एतदुपायकरणेन बलिदानदुःखसर्वस्वहान्यनाथतादिदुःखं प्रागेव निराकृतम्। तेन च पित्रादिपरंपरोत्पादनप्रयोजनभूतो यः हजरतिशाहनिशाहीकस्य देहः सकलसंसार-रीतिसमुदायाभिज्ञो भूत्वा आर्त्तानामार्त्तिज्ञो भूत्वा बाह्याभ्यन्तरप्रपञ्चपालकोभवत्, मनोरथाप्राप्तिर्यन्निकटमीषदपि नाभिसरतीति॥

प्रकृतमनुसरामः॥

ततः कयांखाकेन मातुलपुत्रतगुजस्त्रीद्वयसहितेन बहवो दिवसा अतिवाहिताः[3] भूयसी सन्ततिश्चोत्पादिता, यत्रानेकेवान्तरभेदा आसन्। ततः कयाँ-सन्ततेः कयात इति संज्ञा जाता। तगुजसन्ततेः दुर्ल्लकीं इति संज्ञा जाता। तत्र कयाँसन्ततिः तद्भूमौ सहस्रद्वयवर्षपर्यन्तं स्थिता। तस्याश्चरित्रं नास्माभिः क्वचिद् दृष्टम्। प्रायशः तत्र लिखनरीतिर्न स्थिता। नोशरिवानसुरत्राणस्यान्तसमये तेषामवस्थितये सा भूमिर्न पर्याप्ता। तदनन्तरं तेषां निर्गमनेच्छा जाता। ततः अयःपर्वतावरुद्धे मार्गे ज्ञानिभिर्विचारयित्वा द्वादशशृङ्गाख्यमृगचर्मनिर्मितभस्त्रैः[4] तं धमयित्वा मार्गः कृतः। ततः स्वपूर्वजार्जितो देशः उपायखङ्गबलेन शत्रुभ्यो गृहीतः। आख्यायिका-कारकैरेवमुच्यते†—यत् सहस्रवर्षद्वयमध्ये प्रायशः पञ्चविंशतिः पुरुषाः अतीता

---

१ सराज्ये क। २ MS तुगुरुखाँनतरं। ३ MS कयांखाकोमाबुतुलतगुजपुत्रस्त्रीद्वयनमा। ४ MS. ०श्रुङ्गाख्य०।

* The fol. 33 b ends at—द्वयं विहा, and य सर्वे मारिताः is continued at the fol. No. 70 a. †The fol. 70 b ends at अख्यायि; Fol. 191a begins with कारैरेवमुच्यते।

भविष्यन्तीति । प्रसिद्धेयं वार्त्ता – यत् मुद्गलभूमिः पूर्वा दिक् जनाकीर्णस्थलाद् दूरे तिष्ठति यस्याः परिधिः सप्तभिरष्टभिर्वा मासैः परिभ्रमणेन ज्ञायते । तस्य पूर्वदिगवधिः खितादेशः तस्य पश्चिमदिगवधिः अयगुरदेशः यस्योत्तरावधिः किरगिजदेशः यस्य दक्षिणदिगवधिः तिब्बतदेशः । तद्देशवासिनां भक्ष्यं मृगयार्जितं मांसं तेषां परिधानं भक्ष्यमृगाणां मृगादीनां[1] च चर्म ॥

तिमुरुताश-नामा कयाँ-वंशे जातः । स च साम्राज्यलक्ष्म्या उन्नतशिरा अभूत् ॥

मंगलीखोजह-नामा तस्य समीचीनस्तनयः सिंहासनमारुरोह ॥

तस्मिन् सिद्धिं गते युलदुजखाँ तस्य महान् सुतः । कयात-दुर्लकीं-वंशययोरागमनसमयेपि तेषां मध्ये महान् स्थितः । स च दैवयोगेन क्रमशः सकलैश्वर्ययुक्तो बभूव । स च मुद्गलवंश्यान् यथोचितदेशे स्थापयित्वा पालयामास । महासुरत्राणो बभूव । मुद्गलानां मध्ये स एव सत्यो मुद्गलजातीयः स एव च साम्राज्यश्रीयोग्यः यस्य परंपरा युलदुजखाँकेन सम्बध्यते ॥

चोवीनहबहादुरः तस्य गुणैः पृथग्भूतः सुतो बभूव । (स) पितुरनन्तरं राज्यश्रियं पालयामास ॥

(Chapter XV)

ततश्च सिद्धिरिव योगिनां मूर्त्तिमत् पातिव्रत्यमिव परमेश्वर-संरक्षणरूपजवनिकाभ्यन्तरवासिनी हजरतिआलंकुआ-नाम्नी पुत्री तस्य बभूव । कयात-वंशे जाता बरलास-कुलनन्दिनी च सा च प्रतिपच्चन्द्रकलेव दिने दिने सौन्दर्यश्रियाभिवर्द्धमाना[2] अन्तरेण च ज्ञानादिना *समृद्ध्यमाना बभूव । सा महत्या समीचीनयोत्पत्त्यातिमहता[3] दानसमरोत्साहेनाद्वितीयाभवत् । सकलैकवाक्यतयातिसुबुद्धिः परमेश्वरपूजिकासीत् परमेश्वरपरिचयगुप्तवार्त्तासमूहानामीश्वरीयतेजसां च मुखेनैव ज्ञापिकाभवत् । ततश्च सा यदा यौवनवती जाता तदा महतां रीत्यनुसारेण जूबूबयाँसंज्ञको[4] यो मुद्गलस्थान-पातिशाहः तस्याश्च पितृव्यपुत्रस्तेन समं (तां) संयोजयामास जनकः । स च तस्या

१ MS. मृगादानां । २ MS वर्धमानांऽतरेण । ३ ०चीनत्वाति०— क । ४ रीत्यनुसारेण भूववणं सज्ञकोयो— क ।

* The fol. No. 191 ends at ज्ञाना; दिना begins the fol. No. 35.

नानुरूप इति विनाशपदमवाप । ततश्च हजरति–आलंकुआ[1] निजपतिकुलसिंहासनं सकलजनपरिपालनस्यावश्यकर्त्तव्यतया विभूषयामास ॥

ततश्च जगदीशतेजःपरिपालिता[2] सा कदाचित् सुखशयिता बभूव रजन्याम् । तदानीञ्चाकस्मादेवातिमहज्ज्योतिः "खरगाह" इति प्रसिद्धं दारुभवनविशेषं निजचन्द्रिकयाधवलयत्[3] तन्मुखकमलोदरमाविवेश । ततश्च सा अिमरानतनया[4] मरयम्मनाम्नी यथा दधार गर्भं तथा गर्भवती बभूव तस्मात् ज्योतिष एव ॥

यदा हि परमेश्वरेणेदृशमपेक्षितं यत् हजरतिशाहनशाहीकस्य बाह्याभ्यन्तर-साम्राज्यश्रीसिंहासनालंकारकस्य[5] देहरूपं ज्योतिः कयाँवंशपरम्परायाः पवित्रायाः प्रकटं भवतु तदा स कयाँसंज्ञकां[6] ममताविलसितात् नगराद्बहिर्निष्कास्य अकिञ्चनां तां[7]-प्रान्तरे पालयित्वा कियतः पितृपितामहांस्तदीयान् वर्षसहस्रद्वयं यावत् तत्पर्वतस्थले आन्तरनिर्मलीकरणेन पारमेश्वरीयपावित्र्य× विश्वस्य[8] मित्रभूतान् कुर्वन् स्थितः । * ततश्च युलदुजखाँसंज्ञकं पर्वतप्रदेशात् नगरमध्ये आनीय साम्राज्य-श्रीपालकमकरोत् । ततश्च हजरति-आलंकुवा-नाम्न्या[9] अस्याः परम्परायाः राज्यश्रीसमय आगतः । ततश्च तत्तेजः बहुतरैस्तादृशपुरुषपरम्परया विना पुरुषसम्बन्धमस्यां प्रकटमभूत् । शाहनशाहीक-प्रकटीभवनस्यारम्भः तं कयाँसमयमारभ्य[10] स्थितः । परन्तु हिजरति[11]-मरयम्मकानीतः बाह्याभ्यन्तरविश्वस्य सामग्रीसम्पादनार्थमस्मिन् समये प्रकटो जातः । अफलातूंवत् योकिञ्चनतामूलवान् सोवधानताकर्णाभ्यामिमा वार्त्ताः श्रुत्वा परमेश्वरस्य गुप्तवार्त्तासमूहान् जगदीश्वरशक्तितो दूरे न जानीयात् । परन्तु नैतादृशो जातिस्वभावसिद्धार्थ-

---

१ हहरति— ल, क । २ ०दीशपरिपालिता— क । ३ धवलयन्— क । ४ अभिराततनया— क । ५ सिंहासनालंकारस्य— क । ६ संज्ञकं । ७ अकिंचनतां— क, ०नता— ल । ८ पारमेश्वरीययापि अविश्वस्य— क । ९ आलकुवा०— क । १० MS तं कयाँ समय । ११ ह तरतिमर०— क, आखिर हजरति— ल ।

× पावित्र्येण—इति साधीयान् पाठः ।

* The relevant lines in the English transl. read :—Before this holy light made its fortunate alighting from high heaven, Qiyān was withdrawn from the association of climates and cities and supported in a solitary wilderness, and many ancestors were given to her (Alanguwā), generation after generation for two thous and yearsin these Highlands, thereby purifying her and familiarising her with the land of holiness and concerting the human element in a collection of all degrees. Divine and earthly.

पूजको यो मानुषधर्मस्वभावगर्त्तात् उपरि पादनिक्षेपाकारकः । यत्र अपत्यं विना मातापितरौ जातौ यथा आदमः अपरञ्च विना मातरं यथा हवा एतत् यथाङ्गीक्रियते तथापत्यं विनैकं पितरं कुतो न स्वीकर्त्तव्यम्[१] । यथा मरयम्बीबीतः ईसा-पैगंबरो[२] जातः ॥

यदा चेयं वार्त्ता प्रकटाभवत् तदाल्पदर्शिनो[3] बहून् यादृशतादृशविचारान् कुर्वन्ति स्म । ततश्चासूर्यंपश्यया तया एते लोकाः पापमग्नाः सन्तः तथैव तिष्ठन्तु इति नापेक्षितम् । तेन स्वनिकटवर्त्तिभ्यो महद्भ्यो लोकेभ्योयं वृत्तान्तः सर्वोपि प्रकटीकृतः । कथितञ्च यदेते मन्दमतय इमां वार्त्तां जगदीशशक्तितो दूरे जानन्ति तदा भवतामिदमावश्यकं यत् समीचीनविचारका विश्वसनीयाः पुरुषास्ते मदीयस्यास्य "खरगाह"—इति प्रसिद्धस्य दारुभवनस्य[४] संरक्षका भवन्तु । तदैतद्वार्त्तातत्त्वमेतेषां विदितं भविष्यति । ततश्च कियद्दिनावधि बुद्धिमन्तो जाग्रदन्तःकरणा दूरदर्शिनस्तद्वासभवनस्य[५] पार्श्ववर्त्तिनो भूत्वा कियत्यो रजन्यो जागरांबभूवुः । अकस्मादेकस्मिन्नर्द्धरात्रे चन्द्र-सदृशमेकं ज्योतिर्यथा तयासूर्यंपश्यया कथितमासीत् तादृशमुपरितनप्रदेशादवतीर्यास्या वासभवने प्रविष्टम् । ततश्च रक्षकाणां[६] हाहाकार उदतिष्ठत्[७] दुष्टो विचारस्तादृशः संशयश्चान्तःकरणाद् दूरीभूतः ॥

ततश्च पूर्णेषु गर्भमासेषु पुत्रत्रयमसूत । बूकूंकत्की-नामा प्रथमः । कत्की-वंशस्तत एव । द्वितीयो बूस्कोसालजो । सालजोयूतकुलं तत एव । तृतीयो बूजंजरका-आँ । एतेषां सन्ततिं नेरूँ - नूरं तेजस्तत्सम्बन्धिनीम् - इति कथयन्ति[८] समीचीनं कुलमिति वदन्ति ॥

बूजंजरकाआँ चिंगिजखाँ-कराचारनोयाँ-संज्ञकयोर्नवमः पूर्वजः चतुर्दशश्च साहिबकिरानीकस्य शाहनशाहीकस्य द्वाविंशतिमः पुरुषः अस्ति । स च यदा व्यवहारा-भिज्ञानयोग्यवार्षिको जातस्तदा तूराँ-देशसाम्राज्यश्रीसिंहासनोपरि उपविष्टोभवत् । ततश्च तुरुक-तातारयोर्विविधकुलश्रेष्ठाः सामन्ता अन्येपि सामन्तास्तत्सेवायां तत्परा अभवन् ॥ न्यायलोकसामीचीन्ययोः'दादी'[९] इति प्रसिद्ध'[१०] समाधानं तेन कृतं ।

---

१ नास्ती वक्तव्यं— क । २ मरयमबीचीतईसायैमंवरो— क । ३ तदा ग्यदर्शिनी— क । ४ पुरुषा क्षेमदीसस्य खरगाहेतिप्रसिद्धस्यस्तदानुभवनस्य— क । ५ दासभवनस्य— ल । ६ रक्षकानां— ल । ७ उदतिष्ठन्— क, ल । ८ नेरू इति कथयंति— क । ९ हादीति— क । १० प्रसीद्धं— ल ।

निजशौर्येणायं कालोलंकृतः कृतः ॥

स च यदा सिद्धिं गतस्तदा तस्य पुत्रद्वयं स्थितम् बूका-बूकिया-संज्ञकम्। तत्र च ज्येष्ठः सुतो बूकाखाँ पितृपदे उपविष्टः। तेन च संरक्षणरीतयो नवीना भूयस्य[1] उत्पादिताः। या अन्येषां सुरत्राणानां करनिबन्धाः "दस्तूरुल्अमलाख्याः"[2] जाताः। उच्चावचैर्जनैस्तदीयसमीचीनाचरणतो विश्रामः प्राप्तः ॥

जूतमनुनखाँ[3] सुपुत्रोस्य पित्रा च निजवार्द्धके युवराजः कृतः। तेन च निजपराक्रमेण परराष्ट्राणि गृहीत्वा स्वराज्यवृद्धिः कृता। तस्य च नव[4] पुत्रा आसन्। ततश्च तस्मिन् परलोकगते तत्पत्नी मनोलूनाम्नी निजतनयान् एकान्ते कुत्रचित् नीत्वा पालयामास। ततश्चैकस्मिन् दिने दुल्लर्कीवंश्या जलाइराः प्रच्छन्ना गत्वा मनोलू-नाम्नीमष्टपुत्रसहितां निजघ्नुः[5]।

कायिदूँखाँ-नामा नवमः सुतो निजपितृव्यपुत्रस्य माची-नाम्नः सुहृदो निकटे[6] गतः स्थितः। स एवावशिष्टः। ततश्च माचींसाहाय्येन जलाइरः मयेदमज्ञानतः कृतमित्यपलापं कृत्वा तन्मारणप्रविष्टान् सप्ततिमनुष्यान् जघान। तेषां पुत्र-दारांश्च बद्ध्वा कायिदूँखाँ-निकटे प्रेषयामास। खाँकेन च ते सर्वे दास्याभिव्यञ्जकं दाहचिह्नं कृत्वा विमुच्य बहुकालपर्य्यन्तं दास्ये स्थापिताः ॥

कायिदूँखाँ महत्योः[7] दुरवस्था भुक्त्वा माचीं-प्रयत्नतो राज्यसिंहासनमारुरोह। तेन च बहवो जनपदा निवेशिताः। जलाइरैः समं तेन बहवो महान्तः संग्रामाः कृताः। राज्यं स्वपौरुषेणैव कृतम्। तस्य त्रयः पुत्राः स्थिताः ॥

वायसंगुरूखाँ ज्येष्ठः सुतोस्य तत्पदं पालयामास*। तोमिनहखाँ तस्य प्रवरः सुतः। पित्रा च स्वावसानसमये सिंहासने उपवेशितः शौर्यसौबुद्ध्याभ्यामलंकृत आसीत्। तेन बहवो मुद्गलस्थानदेशास्तुरूकस्थानदेशाश्च यत्नबाहुबलेन वर्द्धमानलक्ष्मी च पेटाद्याः तेन† च निजपूर्वजदेशानामुपरिवर्द्धिताः। माहात्म्यदर्पौ यथा तस्य

१ भूपस्य— क। २ दसनूलूं अम०— क। ३ भूतमनुनखा— क। ४ चतुरः— क। ५ निजेघ्नुः— क। ६ सुहृन्निकटे— क, ल। ७ महतीः इति साधीयान् पाठः।

*The fol. No. 38b ends with पालया and मास is continued at the fol. No. 49a.

†I do not understand the meaning of पेटाद्या तेन च. The sentence has been translated as "By strength of arm and vigour of mind, he increased his hereditary kingdom by adding to it, much of Mongolia (Mughulistan) and Turkistan."

तथा कोपि न स्थितः। तस्य च द्वे भार्ये बभूवतुः। तत्र चैका सप्त तनयान् जनयामास। अपरा च यमलजं पुत्रद्वयम्। यमलजयोश्चैकः कबिलनामा यः तृतीयः पूर्वजः चिंगिज्खाँकस्य। अपरः काचोली नामा॥

काचोलीबहादुरः यः साहिबकिरानीकस्याष्टमः पूर्वजः॥ यन्मुखदर्शनादेव माहात्म्यतेजोभिव्यज्यते। तेन च वारत्रयं स्वप्नो दृष्टः—यत् कबिलखांकस्य वक्षःस्थलगतकञ्चुकग्रैवेयकतः तारा निर्गत्याकाशमुपेत्य शान्तेति। चतुर्थवारं च पुनरपि तथैव काचित् तारा बहुप्रकाशा[1] निर्गता। तत्तेजसा च सकलं गगनतलमतिप्रकाशं जातं तारकाणां[2] च कियतीनां तत्तेजःसम्बन्धो जातः। ततश्च ताभिरपि सकलदिगन्तानामतिप्रकाशता सम्पादिता। ततश्च सा तारकान्तर्हिता जाता परन्तु तत्प्रकाशस्तथैव जाज्वल्यमानः स्थितः। ततश्च काचोलीबहादुरो जाग्रद् भूत्वा स्वप्नार्थं विचिन्तयन् स्थितः। ततश्च[3] पुनरपि सुप्तः स्वप्नं दृष्टवान्—यत् स्वस्य कञ्चुकग्रैवेयकतः क्रमशः सप्त तारकाः अतिप्रकाशा निर्गत्य शान्ता जाताः। ततश्चाष्टमवारमतिमहती प्रकाशरूपा तारका निर्गता* यत्तेजसा सकलविश्वं जाज्वल्यमानं जातम्। तत्तारकाया अपि कियत्यस्तारका निर्गताः। ताभिरपि[4] प्रत्येकमेकैका दिगतिर्निर्मलीकृता। यदा च महती तारकान्तर्हिता तदा तत्प्रकाशस्तथैव स्थितः। तन्निर्गताश्च तारकास्तथैव जाज्वल्यमानाः स्थिताः। ततश्च प्रभाते तेनायं स्वप्नः पित्रे तोमिनहखाँकाय[5] निवेदितः। तेन च स्वप्नार्थ उपवर्णितः - यत् कबिलखाँकस्य त्रयः पुत्राः सुरत्राणा भविष्यन्ति चतुर्थश्च महासुरत्राणो भविष्यति यः[6] स्वाग्रजावसाने बहुदेशाधिपो भविष्यति। तस्यापि पुत्रा नानादेशाधिपा भविष्यन्ति[7]। तव च सन्ततौ सप्त पुरुषाः सुरत्राणा भविष्यन्ति अष्टमश्च पुरुषः सकलमहीमण्डलचक्रवर्त्ती भविष्यति। तत्पुत्रपौत्रादयोपि पृथक् पृथक् नानादेशसुरत्राणा भविष्यन्ति।

यदा च तोमिनहखाँकेन पित्रा एतादृशः स्वप्नार्थ उपवर्णितः तदा ताभ्यां भ्रातृभ्यां समयबन्धः कृतः - यत् कबिलखाँकस्य राज्यं काचोलीबहादुरस्य च

१ MS तारकबहु०। २ MS तारकानां। ३ MS त ततश्च। ४ अल्पाभिरपि— क। ५ तोमिनहवाय— क। ६ यतः— क। ७ तस्यापि······भविष्यन्ति— is wanting in क।

* The fol. No. 49b ends with निर्ग, and the fol. No. 40a begins with तायत्तेसा।

मन्त्रिपदवी सकलसेनानीनामग्रणीत्वञ्च। परस्परसन्तत्यापि अनयैव मर्यादया स्थातव्यमिति। शासनपत्रमप्यस्मिन्नर्थे लिखितम्। उभाभ्यां च तत्पत्रोपरि स्वस्वनाममुद्रापि कृता। आदममारभ्य तोमिनहखाँपर्यन्तं हजरतिशाहनशाहीकस्य पितामहाः साम्राज्यसिंहासनमलंकुर्वन्तः स्थिताः। कियन्तश्च तेष्वेव पितामहा आन्तरज्ञानसाम्राज्यश्रियमप्यनुभवन्तः स्थिताः। आख्यायिकाभ्यश्चायमर्थः× प्राप्यते॥

किञ्च परमेश्वरस्य चिकीर्षा स्थिता — यत् बाह्याभ्यन्तरपदार्थानामेकः सुरत्राणो भवतु यः सकलविश्वमनोरथसम्पादनभोगवान् तदर्थं चैतत् पूर्वजाननन्तरान्[1] कृत्वा तादृशसुरत्राणोत्पादनसामग्रीं कुर्वन् स्थितः। यद्यपि काचोलीबहादुरः साम्राज्यकरणोचितशौर्यज्ञानादिसद्भावेपि[2] ज्यायासो* युवराज एव जातः। ज्येष्ठकनिष्ठभावस्योचितमेवेदम्। परन्त्वन्यदेवफलमस्य यदेतत्सन्ततौ भाविनो बाह्याभ्यन्तरसुरत्राणस्य सकलविश्वमनोरथसम्पादनभोगः सम्पद्यताम्। तदर्थं च तत्पूर्वजानामपि स प्रविष्टो भवतु इति॥

प्रकृतमनुसरामः॥

ततः तोमिनहखाँके सिद्धिं गते कबिलखाँ सिंहासनमध्यारुरोह। काचोलीबहादुरश्च सार्वदिकमहाभाग्योदयमूलधनरूपसमयबन्धपरिपालनाय तदेकीभावेनावस्थानरीत्यनुसारेण तत्प्रियाचरणानुसारेण च सेनापतीनामग्रयायित्वं मन्त्रित्वं चकार राज्यभारं च बभार। कबिलखाँके परलोकगते कूबिलहखाँनामा तदीयेषु षट्पुत्रेषु प्रवरो राज्यभारग्रहणयोग्यश्च स तत्पदं पालयामास। काचोलीबहादुरश्च तथैव स्वाधिकारं पालयामास। ततश्च कूबिलहखाँकेन दयालोः परमेश्वरपरिचायकबुद्धिमतः सकलमहीमण्डलग्रहणयोग्यखड्गस्य काचोलीबहादुरस्य पार्श्वरक्षया ऊर्कींवरकाकनाम्नो निजज्यायसस्तातारवंश्यहस्तंगतस्य खितायिदेशसुरत्राणेन अल्तांखाँकेन हतस्य तेन समं वैरनिर्यातनं कृतम्॥

अयं भावः—बहूनि महायुद्धानि कृत्वा अल्तांखाँसैन्यानि भग्नानि कृतानि। इयं च वार्ता विस्तरत अख्यायिकापुस्तकेषु लिखितास्ति॥

तस्मिंश्च कालेन सिद्धिं गते तद्भ्राता वरतांबहादुरः तत्पदे समुपविष्टो बभूव। शासति चैतस्मिन् राज्यं काचोलीबहादुरः परलोकं जगाम॥

× In the MS above आख्यायिका is written तारीख; it is so also in क।

१ पूर्णजानंतरा कृत्वा— ल, पूर्वज्ञानंतरा कृत्वा— क। २ सत्वेपि—।

इरदमजीबरलासः समीचीनोस्ति पुत्रः काचोलीबहादुरस्य। शौर्येण समरभूमौ अद्वितीयः बुद्ध्यातिमहान् पितुरनन्तरं सेनापतीनामग्रणीर्बभूव। स च पिता यथा कृतवान् तथैव देशकार्यसाम्राज्यकार्ययोस्सम्पादने महान्तं यत्नमातिष्ठत्। प्रथमं बरलासपदवी या प्राप्ता सानेनैव। नामार्थश्च यत् शूरः महाकुलीनश्च। बरलासाः सर्वे तत एव॥

बरताँबहादुरस्य जीवनेतीते तदीयेषु चतुर्षु सुतेषु तृतीयः सुतः वेसूकाबहादुरः यश्चिंगिज्खाँकस्य पिता स राज्यं पालयामास। तत्समये च इरदमजीबरलासः परलोकं जगाम। तदा च तस्यैकोनत्रिंशत्सुताः स्थिताः॥

तत्र सूगूजेजन्नामा तदीयेषु सुतेषु मध्ये शौर्योत्साहविश्वपरिपालनदयालु-ताभिरुच्चशिराः स्थितः। वयसापि ज्येष्ठः स्थितः। स च पितृपदं पालयामास। लोकमध्ये सेनानीनामग्रयायी अर्थगत्या सम्राडेव स्थितः। ततश्च वेसूकाबहादुरेण सूगुजेजन् मन्त्रतस्तातारदेशग्रहणार्थं प्रस्थानं कृतम्। गत्वा च तदीयगृहादिलुण्टनं कृतम्। जित्वा च तातारान् देलूंयलूदक्सम्मुखं[1] प्रस्थितः। यदा च तत्स्थलं प्राप्तं तदा चान्द्रमानस्यैकोनपञ्चाशदधिकशतपञ्चकेतीते जिलकादहमासस्य विंशतिमे दिने ऊलूँअनगह–संज्ञका तत्पत्नी पुत्ररत्नमजीजनत्। तस्य च वेसुकाबहादुरेण तमोचीं इति नाम धृतम्। तदा च अतिज्ञानवता सूगूजेजन्-नाम्ना इदमुक्तम्-एतस्य जन्मसमयत इदं ज्ञायते यत् कबिलखाँकस्य कञ्चुकग्रैवेयकतः चतुर्थवारं या तारका निर्गता सैवेयं महाभाग्योदयतारकेति॥

यद्यप्येतस्य सन्ततौ शाहनशाहीकस्य नोत्पत्तिरस्तीति एतद्वर्णनविस्तरे न प्रयोजनम्। तथापि कराचारनोयाँवर्णनप्रसंगेन एतस्यापि विस्तरतो वर्णनं करोमि॥

कराचारनोयाँ सूगूजेजन्-नाम्नोतिमहान्तनयः चक्रवर्तिलक्षणोपेतोस्ति। चान्द्रमानेन द्विषष्ट्यधिकपञ्चशतवर्षेष्वतीतेषु वेसूकाबहादुरः सिद्धिं गतस्तदा च तमोचीं-नामा—त्रयोदशवार्षिकः स्थितः। किं च राज्यभारग्राहकः सैन्यकार्यनिर्वाहकः सूगूजेजन्नामा[2] तेष्वेव कियत्सु दिनेषु परलोकमगमत्। कराचारनोयां[3] अल्पवयस्क एव स्थितः। ततश्च नेरूं-कुलीनाः सर्वे एतस्य व्यूथ्या भूत्वा तालजूतैः[4] समं सन्धिं कृतवन्तः। ततश्च

१ संन्मुखं—ल, क। २ सुगुजेजन—क। ३ कराचोदनोयां—क। ४ तालजतैः—क।

तमोचींनामा बहूनि दुखान्यनुभूतवान् बन्दिग्राहं गृहीतश्च अन्ते गत्वा परमेश्वर-साहाय्येन बन्दिमोक्षमवाप। यदा च त्रिंशद्वार्षिको[1] जातस्तदा निजदेशाधिपोभवत्। तदा च तुरुकस्थानसुरत्राणास्तेन समं वैरमारभन्ते स्म। यावत् स चत्वारिंशद्वार्षिको जातस्तदा स कराचारनोयां-मन्त्रतो निजजनकमित्रेण करायतकुलसुरत्राणेन आवंगखांकेन[2], समं सन्धिं मनसि कृत्वा तन्मिलनार्थं प्रचलितः मिलितश्च। गत्वा च महान्ति कार्याणि चकार तदग्रे च महतीं प्रतिष्ठामवाप॥

ततश्च आवंगखांक-सुहृद्भिर्मत्सरग्रस्तै-रावंगखां एतद्विषये विमनस्कः कृतः, दुष्टभावे च निवेशितः। ततश्च कराचारनोयाँप्रयत्नतः कुशली निर्गत्य तैर्लोकैस्समं वारद्वयं युद्धं कृत्वा जयमवाप॥

यदा च ऊनपञ्चाशद्वार्षिकः पञ्चाशद्वार्षिको वा तदा चान्द्रमानस्य पञ्चशतवर्षेषु नवनवत्यधिकेषु गतेषु रमजानमासे साम्राज्यलक्ष्मीमवाप। साम्राज्यकरणस्य वर्षत्रयेतीते तिंगिरीनाम्न्या देवतामूर्त्या तस्य मनस्येतादृशं निवेशितं यत्तव चिंगिज्खाँ-पदवी मिलितास्ति। तदर्थश्च सुरत्राणसुरत्राणः। दिने दिने च तन्माहात्म्यतारकाप्रकाशोतिवर्द्ध-मानो बभूव। यावत् स खिताथि-खुतन्-चीन-माचीन-दश्तिकिविचाक-सकीन-बुलगार-आस-रूस-आलां-देशानामन्येषां च देशानां सुरत्राणो बभूव। तस्य चत्वारः पुत्राः बभूवुः—जूजी-चगताइ-उकूदायि तूली-नामानः[3]। तत्र सभा संनिवेशमृगययोः सामग्री-सम्पादनं जूजी[4]नाम्ने आदिष्टम्। चगताइनाम्ने च[5] न्यायकरणं दण्डधारणञ्च उकूदायिकाय च देशपरिपालनं तूलीनाम्ने च सेवकानां कार्यकरणं तत्समाधानं च सेनासंरक्षणं[6] तत्सम्बन्धि कार्यजातं च समर्पितम्॥

ततश्च चिंगिज्खाँ चान्द्रमानस्य षट्शतेषु पञ्चदशवर्षाधिकेषु गतेषु सुल्तां-मुहम्मदख्वारज़म-शाहनाम्नो जयाय[7] मावराउन्नहर-देशं प्रति प्रस्थितः तद्देश्याश्च सर्वे जना निगृह्य वशे* कृताः। तत्कार्यसम्पादनेन निश्चिन्तो भूत्वा बलखनगरं प्रस्थितः। तूलीखाँकश्च खुरासानं प्रति प्रस्थापितः॥

---

१ ०वार्षिको—क। २ आवाशाखां—क। ३ भूंजी—क। ४ रूजी—क। ५ व—क। ६ सिना०—क। ७ ब्रह्मसमावरा।

* The fol. No. 44b ends at वशे, and कृता; ...is continued at fol. No. 46a.

ततश्च तद्देशद्वयं वशे कृत्वा बल्खनगरात्[१] तालिकां-नगरं प्राप्तः। ततश्च सुल्तां-जलालुद्दीं-मुंगविरनीपराजयाय प्रचलितः[२]। षट्शतोत्तरचतुर्विंशतिमे वर्षे रमजानमासे सुल्तां-जलालुद्दीं-संज्ञकं पलायमानं सिन्धुपर्यन्तमन्वगात्। पुनरपि मावराउन्नहरमागत्य निजराजधानीं प्रचलितः। ततश्च षट्शतोत्तरपञ्चविंशतिमे वर्षे सफरमासस्य चतुर्थतिथौ तंगकूत-देशे परलोकं जगाम। आयुर्दायश्च तस्य द्विसप्ततिवर्षाणि कियन्तश्च मासाः। तन्मध्ये च पञ्चविंशतिवर्षाणि राज्यकरणे परदेशग्रहणे च व्यतीतानि॥

स च यावज्जीवं कराचारनोयाँ—मन्त्रेणैव कार्यमात्रं चकार। युक्तञ्चैतत् यदीदृशो महासुरत्राणो यस्येदृशो भ्राता मार्गप्रदर्शकः स नानाजनपदान् कुतो न वशे कुर्यात्। कराचारः चिंगिजश्च पितृव्यतनयौ मिथः तथैव देशग्रहणे परेषां[३] बहूनामन्यदेशानां ग्रहणे तुल्यतां गतौ[४]। तेन च स्वावसानसमये उकूदायिनामा[५] तनयो निजसिंहासने उपवेशितः॥

संक्षेपतस्तु—यदा च चिंगिजखां खितायिदेशग्रहणार्थं प्रस्थितः तदा कस्याञ्चिद्रात्रौ एवं विचारयति स्म—यत् मम परलोकगमनसमयो निकटेऽस्ति[६]। ततश्च पुत्रान् कराचारनोयाक-मन्यांश्च निकटवर्त्तिन आहूय अतिसमीचीना योग्याः शिक्षा अदात्। साम्राज्यञ्च उकूदायिनाम्ने निश्चितमकरोत्। अहदिनामाख्यं च काचोलीकबिलखांकयोः* समयबन्धपत्रं तोमिनहखाँ—सन्ततौ क्रमागतं सर्वैश्च महद्भिः स्वस्वमुद्राङ्कितं तत्को-शागारत आनाय्य लोकसमक्षं वाचितम्। कथितं च सर्वेभ्यः यन्मया कराचारनोयाँकेन सममेतत्पत्रानुरोधेनैव व्यवहृतमस्ति भवद्भिरपि एवमेव व्यवहर्तव्यम्। स्वयमपि अन्यत्समयबन्धपत्रम् उकूदायि-नाम्नः पुत्रस्य तत्पुत्राणां सुहृदां च व्यवहारप्रतिपादकं लिखित्वा उकूदायि-नाम्ने समर्पितवान्॥

अन्यच्च मावराउन्नहरं तुरुष्क-स्थानं रब्बारजम-देशैकदेशः अयगुर-नगराणि काशगर-नगराणि बदख्शां-बलख-गजनी-देशाः सिन्धुं मर्यादीकृत्य चगतायिनाम्ने दत्ताः। कबिलखाँ—काचोलीबहादुरयोः समयबन्धपत्रं च दत्तम्। कथितं च कराचारनोयां-

१. वलवन० —क। २ विरनिय राजयायत्र चलितः —क। ३. परवान् —क। ४. तुल्यतामानौ —क। ५. कदापि मा — क। ६. निकटे स्थितश्च — क।

*The fol. No. 46 ends at काचो, and लीकविलखाँ…is continued at the fol. No. 226

वचनं नातिक्रमणीयम् । अयं च वो धनदेशयोर्विभागीत्यवधेयम् । पितापुत्रसम्बन्ध-व्यवस्था च परस्परं कृता । इत एव शाहनिशाहीक-परंपरां चगतायि इति वदन्ति ॥

ततश्च चिंगिज़्खांसुतैः अन्यैश्च महद्भिः चिंगिज़्खां-वचनानुसारेण व्यवहारः कृतः । यद्यपि चिंगिज़्खांतः समयबन्धभङ्गो जातः तथापि काचोलीबहादुरस्य सन्ततौ न तस्य भङ्गसम्भावनापि । ईश्वरेणैतदर्थं तद्भङ्गो न कारितः यदेतत्संततौ स्वगुणेन यः सुरत्राणो भविष्यति तत्पूर्वजान् समयबन्धभङ्गकतया कोपि मा निन्दतु इति ॥

एवं मन्ये यत् इयं वार्त्तानिदानमस्ति । वर्द्धमानलक्ष्मीतारकारूपसाहिबकिरानीको-दयस्य । साहिबकिरानी च ‡शाहनशाहीक-लक्ष्मीमूलम् । चगताइखाँक-पिता यदा परलोकं गतस्तदा चगताइखाँकेन वेशवालिर-संज्ञकं स्थलं राजधानी कृता । ततश्च सर्वं सैन्यकार्यं च कराचारनोयाँकाधीनं कृतम् । स्वयं च सर्वदा उकूदायिखाँनिकट एव कालं यापयन् स्थितः । यद्यपि स कनिष्ठः स्थितः तथापि चगतायिखाँ तन्मर्यादारक्षणे तदाज्ञापरिपालने न सूक्ष्ममप्यन्तरं चकार – पितुराज्ञानुरोधेनैव व्यवहरति स्म । यदा च चगतायिखांकस्य परलोकगमनासन्नता जाता तदा तेन कराचारनोयाँकमाहूय सर्वोपि निजस्तदधीनः कृतः । अपत्यान्यपि तदधीनानि कृतानि । षट्शतोत्तराष्टत्रिंशत्तमे वर्षे जिल्कादहमासे उकूदायि-नाम्नः सप्तमासेभ्यः पूर्वं लोकान्तरं जगाम । कराचारनोयां तथैव देशकार्यादिकं चकार ॥

कियत्समये च गते चगतायिखां-पौत्रं मुवातगाँ-पुत्रं कराहलाकूखां-नामानं तत्पदे निवेशयामास । ततश्च कियद्भिर्वर्षैरुकूदायिखाँकस्य पुत्रः गिवकूखां-नामा सिंहासन उपविश्य कराहलाकूखाँकं तत्पदाच्च्यावयित्वा तत्पदे तत्पितृव्यं चगतायिखाँ-पुत्रं येसूमंगा—नामानं स्थापयामास । एवमनुश्रूयते यत् उकूदायिखाँकेन स्वराज्यसमये निजज्येष्ठतनयो गोचू-नामा युवराजः कृतः स्थितः । स च तत्समक्षमेव मृत इति ॥ ततश्च तत्सुताय शेरामू-नाम्ने निजपौत्राय यौवराज्यं दत्तं स्थितम् । परंत्वनेन पितामहमरणोत्तरं राज्यं न प्राप्तम् गिवकूखांकेनैव प्राप्तम् । तन्मरणसमयेप्ययं देशान्तरे †रोस-चरकस-बुल्गार-संज्ञके स्थितः । ततश्च त्रिभिश्चतुर्भिर्वा वर्षैरागत्य शेरामूकः साम्राज्य-

‡The fol. No. 226 ends with शाहन, and शाहीक...is continued the fol. No. 223.

†The fol. No. 223 ends at बुलगार, and सज्ञके...is continued at the fol. No. 48.

मवाप। प्रजापालने व्यवहारकरणे च समीचीनां रीतिं चकार। यदा च येसूमंगा परलोकं गतः तदा कराचारनोयां पुनरपि कराहलाकूखांकं तत्पदे निवेशयामास। तत्समये च षट्शतोत्तरद्विपञ्चाशत्तमे वर्षे चान्द्रमानस्य कराचारनोयां नवाशीतिवार्षिको भूत्वा परलोकं जगाम॥

अचिल्नोयाँ कराचारनोयांकस्य दशसु सुतेषु प्रवरः परमेश्वरपरिचेता ज्ञानवांश्च स्थितः। स च कराहलाकूखांके राज्यं शासति शौर्येण बुद्ध्या च पितृपदं पालयामास। स च षट्शतोत्तरद्विषष्टिमे वर्षेऽन्यनिरपेक्षसामर्थ्येन सिंहासनमारुरोह। चगतायिवंश्याः सर्वे तल्लक्ष्मीप्रसादेन सुखिनो बभूवुः॥

ततश्च चगतायि-वंश्यानां परस्परमतिवैमत्येन तत्सहावस्थाने दुःखीभूत्वा गश्-नाम्नि पूर्वजनगरे निवासमकरोत्। ततश्च चिंगिज्खाँ-पौत्रः तूली-पुत्रो मंगूकाआँनामा कराहलाकूखांकं निजबन्धुं इराँदेशं प्रति प्रस्थापयामास। जूजी-चगतायि-उक्दायि-तूली-वंश्यानां सेनापतीन् अन्यांश्च लोकान् तेन समं प्रेषयामास। चगतायिवंश्यानां मध्ये अचिल्नोयाँक एव तन्मित्रतामापाद्य तेन समं प्रेषितः। हलाकूखांकेन च तबरेज-देशस्य मरागहनामकस्थलविशेषस्तस्मै दत्तः। अतिमहत्तुल्यतया व्यवहारश्च तेन समं कृतः॥

अमीर-एलंगिज्नोयाँ अचिल्नोयांकस्य समीचीनः पुत्रोऽस्ति। स च यदा अचिल्नोयाँ हलाकूखाँकेन समम् इरां-देशं प्रति गतस्तदा तत्पदं पालयामास*। यदा च अचिल्खां सिद्धिंगतस्तदा हलाकूखांकेन दवाखाँकः चगतायि-प्रपौत्रः तत्पदे सेनापती-नामग्रणीः कृतः। सर्वोपि स्वीयो भारस्तदुपरि निवेशितः। तेन विचार्य स्वज्ञाना-नुसारेण कार्यजातं निष्पादितम्। महति समीचीने मुहम्मदमार्गे च स आगतः॥

अमीरपीरगुल्-नामा यदा अमीरएलंगिज्नोयाँकः पिता दवाखाँक-पुत्र-तरमशीरीखाँ-समये सिद्धिं गतस्तदैक एवावशिष्टः। स च सर्वदा जपे तपसि चाभिरतो भूत्वा मनो जगदीश्वरे निवेशयामास। पितृपैतामहं पदं पितृव्यपुत्रादिभ्यो दत्त्वा गश्नाम्नि नगरे

*The folio No. 48 ends with पालयामास, and यदा च...is continued at the fol. No. 50.

कस्मिंश्चित् प्रदेशे स्थित्वा पित्राद्युद्यानादिभ्य एव यथाकथञ्चिद् वृत्तिं कल्पितवान्। परमेश्वरसेवां च कृतवान्। परलोकं जगाम ॥

तस्य च अमीरतरागायनामा समीचीनः सुतो बभूव। शैशव एव तत्कर्मभ्यो वर्द्धमानलक्ष्मीर्ज्ञायमाना जनैरासीत्। तस्य चानुजो हैवतिनामा परमेश्वरपरिचेता तत्त्वज्ञानवान् सकलसिद्धधुरन्धरो बभूव। तथापि तत्कुलज्येष्ठतां बाह्याभ्यन्तर-माहात्म्यं च ज्येष्ठ एव लेभे। स च यथा निजजनकः तपस्विनां सिद्धानां सेवामकरोत् तथैव चकार तन्मध्येपि महतः सिद्धस्य शयेखशम्सुद्दींकुलाल्-नाम्नः विशेषाकारेण। स सिद्धोपि तस्य महतीं मान्यतां कुर्वन् स्थितः। तेनैव च प्रणिधानवशात् साहिबकिरानीकस्योत्पत्तिसूचनापि तस्य कृता स्थिता ॥

(Chapter XVI)

साहिबकिरानि †आजमअमिरतिमरुकुरगाँ-नामा यो महाकुलीनो महामाहात्म्यवान् मङ्गलवासररात्रौ पञ्चविंशतिमायां शावानमासस्य सप्तशतोत्तरषट्त्रिंशत्तमे[1] वर्षे चान्द्रमानस्य गश्नाम्नि नगरे शहरसबूज् इति प्रसिद्धे ईरांदेश्ये अतिपवित्रायाः पतिव्रतायाः तगीनहखातूँ-नाम्न्याः मानुषसृष्टिमध्ये भाग्यवच्चरणविन्यासमकरोत्। अयं सा वर्द्धमानलक्ष्म्याः तारकास्ति या काचोली-बहादुरस्याष्टम्युदरतो निर्गता स्थिता ॥

एकस्याख्यायिकाकर्तुर्मते काचोलीबहादुरस्य स्वप्नोत्रैव सत्यो जात इति। दूरदर्शिनां मनीषिणां बुद्धौ इदमायाति यदद्य तस्य स्वप्नान्तरे दृष्टस्य तारकोदयस्यारम्भ इति। प्रथमा तारका साहिबकिरानी इति इदं च मया पूर्वमपि सूचितमस्ति ॥

यदा च समीचीने समये साहिबकिरानीकस्योत्पत्तिर्जाता तदा मावराउन्नहरदेशे तिरमूशीरीखाँ सुरत्राणः स्थितः। स च दवाखाँकात्। स च वराकूखाँकात्। स च येसूँतवातः। स च एसूकाँतः। स च चगतायिखाँत उत्पन्नः स्थितः। ईराँदेशे च सुल्तां अबूसअीदमरणतोमासचतुष्टयमतीतं स्थितम्। तेन कारणेन तस्मिन् देशे वैराज्येन देशास्वास्थ्यमापन्नं स्थितम्[2] ॥

अयं च साहिबकिरानी शैशवमारभ्य तारुण्यपर्यन्तं सर्वदा युद्धमृगया रीतीरनुसंदधान एव स्थितः। तदा च चान्द्रमानस्य सप्तशतोत्तरं द्विषष्टितमे वर्षे अमीरतरागायि-नामा तत्पिता परलोकमगमत् तदा च तस्य चत्वारः पुत्राः कन्ये च द्वे स्थिते। ‡साहिबकिराँ-आलमशयेख-सेयुज्-गतमिश्-जोगी-नामानः पुत्राः कुतुलुगतुरुकां-आगा-नाम्नी एका द्वितीया च शीरींवेगीआगा-नाम्नी कन्या ॥

---

१. षड्त्रिंशत्तमे। २. देशा स्वास्थ्यउत्पन्नं — ल, देशात्स्वास्थामा० — क।

† The fol. No. 50 ends at आजम अ, and मरतिमरुकुरगाँनामा...is continued at the fol. No. 39.

‡ The fol. No. 39 ends at किराँ, and आलम... is continued at the fol. No. 51.

यदा च साहिबकिरानी सौरमानेन शम्सीति यवनप्रसिद्धेन चतुस्त्रिंशद्वार्षिको जातस्तदा महाभाग्योदयतो बुद्धिमन्त्रतश्च बुधवासरे रमजानमासस्य द्वादश्यां तिथौ सप्तशतोत्तरमेकसप्ततिमे वर्षे बल्खनगरे सिंहासनमलंचकार षट्त्रिंशत्सु वर्षेषु राज्यकरणस्य । मावरा-उन्नहर-रब्बारज्म-तुरुष्कस्थान-खुरासान-इराकद्वय-आजखाइजाँ-फारस-माजंदराँ-किरमाँ-दियारबक्रा-खोजिस्ताँ-मिस्र-शाम-रूम-देशा अन्ये देशाश्च ज्ञानोत्साहबलेन गृहीताः । सकलमहीमण्डले चातिबली अद्वितीयश्च बभूव । यदा च स दिग्विजयाय प्रस्थितस्तदा परमेश्वरेण यः कुशलेन स्थापयितुमपेक्षितस्स अग्रे आगत्य तद्दर्शनं चकार । येन तन्महाभाग्यकुसुमं विकसितमभूत् । यस्य चानिष्टं भावि स्थितं स एतदाज्ञाभङ्गं कृत्वा दण्डस्थले स्वात्मानमागतमपश्यत् ॥

किंच सप्तशतोत्तरनवाशीतिमे वर्षे जिल्क़ादमासे सोमवासरे इस्फहाँ-नगरे सर्वं कृतापकारम्[1] आबालवृद्धमवधीत् साहिबकिरानी । ततश्च फारसदेशाभिमुखं प्रस्थितः । ततश्च मुजफ्फरवंश्याः सर्वे आगत्य दर्शनं प्रणतिपूर्वं चक्रुः । अपरञ्च साहिबकिरानी यदा दश्तकिविजाक-देशाधिपः स्वयं कृतसाहाय्यः तुक्तमिशखाँ-नामा व्यूत्थ्यो जातः इत्यश्रुणोत् तदा वारद्वयं तं जित्वा सहस्रत्रयक्रोशपर्य्यन्तं विस्तीर्णे तद्देशे स्वयं क्रीडित्वा तं देशं निष्कण्टकं चकार । पुनश्च ईराँ-देशं जगाम । गत्वा च सप्तशतोत्तरं पञ्चनवतिमे वर्षे शाहमनसूर-नामानं तद्देशसुरत्राणं शीराजनगरे जघान । मुजफ्फरवंश्यांश्च सर्वान् समूलमुत्खातान् चक्रे ॥

ईरां-देशं च सर्वं निष्कण्टकं[2] कृत्वा तत्र स्वीयान् लोकान् निवेशयामास । ततश्च बग्दादनगरं वशे चकार । अनेकवारं च गुरजिस्थानमध्ये प्रविश्य जित्वा बहिरागतः । मोहर्रममासस्य द्वादश्यां तिथौ अष्टशतोत्तरमेकस्मिन् वर्षे सिन्धुनद्यां सेतुं बद्ध्वा उत्तीर्य्य हिन्दुस्थानं वशे चकार । अष्टशतोत्तरं तृतीये वर्षे शाम-देशं जगाम हलवनगरं जग्राह । ततश्च दमिश्कनाम्नीं तद्राजधानीं वशे कृत्वा तत्रत्यान् निगडबद्धान् बहून् सामन्तान् जघान ॥

अन्यस्मिन् वर्षे रूमदेशवशीकरणार्थं प्रचलितः शुक्रवासरे जिल्हिज्जह-मासस्यैकोनविंशतिमे तिथौ । अष्टशतोत्तरं चतुर्थे वर्षे अंगुरियह-नामकप्रदेशं रणभूमिं

---

१ MS कृता सर्वं पकारं : the order is reversed here. २ निःकंटकं

विधाय इलदुरुम-नाम्ना रूमदेशसुरत्राणेन समं समरं विधाय जयं प्राप्तवान् । ततश्च रूमाधिपोप्येतज्जनवशंगतस्तैर्लोकैरेतत्सविधे समानीतः । ततश्च साहिबकिरानीकेन स निजपुत्राणामधस्तनप्रदेशेतिकृपयोपवेशितः ॥

ततश्च परावृत्त्य आजरवाइजां-देशं प्राप । तत्र च सार्द्धवर्षपर्यन्तं तस्थौ । तत्र च बहवः सुरत्राणाः सुरत्राणपुत्राश्च तत्सेवार्थमायान्ति स्म । मिसुर-सुरत्राणेन च बहुधनं सुवर्णरजतादि एतन्नाममुद्राङ्कितं कृत्वा प्रेषितम् । अन्यैरपि तत्पार्श्ववर्त्तिभिः सुरत्राणैरेतदाज्ञा शिरसि निहिता । मंका-मदीनानामकेपि नगरद्वये····खुतुबानामकं तच्छुभाशंसनं पठितम् । अष्टशतोत्तरं षष्ठे वर्षे जिल्कादहमासे फेरोज्कोहनामकं नगरमेकेनैव दिनेन वशे कृत्वा खुरासानं प्रति परावृत्तः । अष्टशतोत्तरं सप्तमे वर्षे मोहर्रममासस्य प्रथमतिथौ निशावूरसंज्ञकनगरं दृष्ट्वा तद्वर्त्मना मावराउन्नहर-देशमाययौ । तत्र चातिमहतीं सभां दिवौकसामप्याश्चर्यजननीं विधाय दानमानादिभिः सर्वान् अतोषयत् ॥

ततश्च खितायिदेशं प्रति प्रस्थितः बुधवासररात्रौ शावानमासस्य सप्तदश्यां तिथौ अष्टशतोत्तरं सप्तमे वर्षे समरकंदतोष्टाविंशत्यधिकशतद्वयक्रोशपरिमिते अतरारग्रामे परमेश्वराज्ञावशतः परलोकं जगाम । तच्छरीरं च समरकन्दे प्रविष्टं कृतम् ॥

साहिबकिरानीकस्य चत्वारः पुत्राः स्थिताः । जहाँगीरमिर्जा प्रथमः । स च सप्तशतोत्तरं षट्सप्ततिमे वर्षे परलोकं गतः समरकंदनगरे । तस्य च पुत्रद्वयं स्थितम् । मुहम्मदसुलताँनामा एकः यः साहिबकिरान्या युवराजः कृतः स्थितः । स रूमदेशजयोत्तरं शावानमासस्य सप्तदश्यां तिथौ अष्टशतोत्तरं पञ्चमे वर्षे रूमदेश एव सिद्धिं गतः । पीरमुहम्मदनामा द्वितीयः । स च भ्रातृमरणानन्तरं युवराजः कृतः स्थितः । साहिबकिरानीकेन च स्वीयाः सर्वे महान्तो लोका आदिष्टा यत् अयं कनिष्ठः पौत्रः सर्वथा सुरत्राणः कर्तव्यः एतदाज्ञायां च सर्वैः स्थातव्यम् इति । तेषु दिनेषु समीरमुहम्मदः गजनीदेशे हिन्दुस्थानसीमायां चाधिकारी स्थितः । अयं च रमजानस्य चतुर्दश्यां तिथौ अष्टशतोत्तरं नवमे वर्षे पीरअलीतारनाम्ना तदीयसेनान्या निहतः ॥

द्वितीयः सुतः साहिबकिरानीकस्य मिर्जा उमर शयेखः यः फारसूदेशाधिकारी पितृसमक्षमेव सप्तशतोत्तरं षण्णवतिमे वर्षे रबिअुल्अव्वलमासे सिद्धिं गतः ॥

तृतीयः सुतः जलालुद्दींमीराशाहमिर्जा-नामा। तस्य च चरित्रं कथयिष्ये।

चतुर्थश्च मिर्जाशाहरुखनामा यः खुरासानेश्वरः स्थितः यः बहुषु सेनानिवेशेषु पित्रा समं तिष्ठन् स्थितः। स च पित्रनन्तरम् ईरां-तूराँ-देशयोः पित्रा वशीकृतानां देशानां च सर्वेषां सुरत्राणोभवत्। त्रिचत्वारिंशद्वर्षपर्य्यन्तं राज्यं चकार। गुरुवासरे रविउल्आखिरनाम्नि मासे चतुर्दश्यां तिथौ सप्तशतोत्तरमेकोनाशीतिमे वर्षे उत्पन्नः स्थितः। अपरञ्च— आदित्यवासरे प्रातस्समये नवरोजसुल्तानी-नामके समये जिल्हिज्जहमासे पञ्चविंशत्यां तिथौ अष्टशतोत्तरं पञ्चाशत्तमे वर्षे परलोकं गतः ॥

जलालुद्दींमीरांशाहमिर्जा-नामा यः षष्ठः पूर्वजः शाहनशाहीकस्य तस्य चोत्पत्तिः सप्तशतोत्तरमूनसप्ततिमे[1] वर्षे जाता स्थिता। पितरि जीवति इराकद्वय-आजरवाइजाँ-दियारवक्र-शामदेशानामधिकारी स्थितः ॥

यदा च साहिबकिरानी हिन्दुस्थानं प्रचलितः तदैते देशास्तद्वशे स्थिताः। न्यायकरणे राज्यचर्चायां* चातिसमीचीनः स्थितः ॥

स चैकदा मृगयायां धावत्यश्वे आरण्यकमेषस्य शिरो धृत्वा गच्छन्नेव स्थितः। ततश्च त्रसतोश्वात् निपपात। शिरसि मुखे च बहुधा क्षतवान् बभूव। चिकित्सकैश्च समीचीनैरौषधैस्तस्य क्षतं पूर्णं कृतम्। शिरोमज्जा च पूर्णा जाता। परन्तु यथा-पूर्वं न जातः। ततश्च साहिबकिरानी यदा सिद्धिंगतस्तदैतस्य ज्येष्ठसुतेन अबाबक्रमिर्जा-नामकेन खुतुबानामकं शुभाशंसनं सिक्कानाम्नी च मुद्रा तन्नाम्नैव कृता। मीराशाहमिर्जा तबरेजनगरे स्थितः। अबाबक्रमिर्जा राज्यभारं निर्वाहयन्[2] स्थितः। चतुर्विंशत्यां तिथौ जिल्कादहमासस्याष्टशतोत्तरं दशमे वर्षे करायूसुफ्तुरुक्मान-युद्धे परलोकं गतः। तस्य चाष्टौ पुत्राः। अबाबक्रमिर्जा-अलंगिरमिर्जा-असुमाचल्पी-मिर्जा-अुमरखलीलमिर्जा-सुल्तांमुहम्मदमिर्जा-अचिल्मिर्जा-सियुजगत्-मिश्-नामानः ॥

---

१. सप्तशतोत्तरम् ऊन०। २. MS. निर्वाहायन्।

*The fol. No. 54 ends at चर्चायां, and चाति is continued at fol. the No. 45.

सुल्तांमुहम्मदमिर्जा जलालुद्दींमींरांशाहमिर्जानाम्नः समीचीनः पुत्रः। माता चास्य मेहरनूशू-नाम्नी फोलादकयामिर्जावंश्या। अयं च खलीलमिर्जा-नाम्नाग्रजेन समं समरकंदे निवसन् स्थितः। यदा च खलीलमिर्जा इराकदेशं प्रति चलितः स्थितः तदा मिर्जाशहरुखेण एतस्य गुणमाहात्म्यं मिर्जाअुलुकबेगाय कथितम्। मिर्जाअुलुकबेगश्चास्मै महतीं प्रतिष्ठां निजभ्रातृभिः समां दत्तवान्।

अस्य च सुतौ द्वौ स्थितौ। सुल्ताँअबूसअीदमिर्जा-मनूचेहरमिर्जा-नामानौ। यदा च सुल्ताँमुहम्मदमिर्जाकस्यास्वास्थ्यमध्ये* तद्दर्शनार्थं मिर्जाअुलुक्बेग आगतस्तदा तेन स्वज्येष्ठसुतस्य सुल्तांअबूसअीदमिर्जा-नाम्नः भूयसी स्तुतिः कृता एतस्मिन् मदपेक्षया कृपा विधेयेति च बहूक्तम्। ततश्चायमपि तस्य सेवां कुर्वाण एव स्थितः। ततश्च तन्निकटवर्त्तिना केनचिदुक्तम् मिर्जा अुलुकबेगाय — यदयं भवतां पितृव्यपुत्रो युष्मत्सेवां सर्वभावेन करोति। ततश्च तेनोक्तम् -- यदयमस्मत्सेवां न करोति किन्तु विश्ववशीकरणोपायं राजनीतिं च मत्तो गृह्णाति। सत्यमेवैतत् यत् मिर्जाअुलुकबगेनेदं समीचीनबोधेनोक्तम्॥

सुल्तांअबूसअीदमिर्ज्जा॥

अयं च अष्टशतोत्तरं त्रिंशत्तमे वर्षे उत्पन्नः स्थितः। यदा च पञ्चविंशति-वार्षिको जातस्तदा सिंहासनमलंचकार अष्टादशवर्षाणि च राज्यं चकार तुरुष्कस्थान-मावराउन्नहर-वदख्शाँ-काबुल्-गजनी-खन्धार-हिन्दुस्थानसीमादेशांश्च वशे चकार। अन्ते गत्वा च इराकदेशं जग्राह। यद्यपि एतादृशराजलक्ष्म्यालंकृतः स्थितः तथापि लक्ष्मीमदं लेशतोपि न भेजे। दरवेश इति यवनप्रसिद्धेभ्यो विरक्तेभ्यः आशिषः प्रार्थयानः स्थितः। अष्टशतोत्तरं द्विसप्ततिमे वर्षे मिर्जाजहांशाहनामा आजरबाइजाँदेशाधिपः स्थितः। स उजुन् हसन्-नाम्न उपरि प्रस्थितः। स चासावधानतया तेन हतः। ततश्च सुल्ताँ अबूसअीदमिर्जा उजुन्हसन्-नाम्न उपरि स्वयं प्रस्थानमकरोत्। ततश्च स आर्त्तो भूत्वा बहुधा सामप्रयोगमकरोत्। असौ च

*The fol. No. 45 ends at मध्ये त, and द्दर्शनार्थं··· is continued at the fol. No. 167.

नाङ्गीचकार। ततश्च तेनावश्यकर्त्तव्यतया† धान्यागमनमार्गा निरुद्धाः। ततश्चास्य कटके तथा दुर्भिक्षं पतितम् यथा एतस्य समीचीनैर्जात्यश्वैश्चतुर्दश रात्रीः यवा अपि भोक्तुं न प्राप्ताः। ततश्चास्य सैनिकाः विशकलिता अभूवन्। ततश्चास्मिन् निर्बले जाते स बलवान् रणभूमावभूत्। ततश्चाष्टशतोत्तरं त्रिसप्ततिमे वर्षे रज्जबमासस्य द्वाविंशत्यां तिथौ अयं तद्धस्ते पतितः। तृतीये च दिवसे यादिगार मुहम्मद मिर्जा-नामा यः सुल्तां मुहम्मद मिर्जातः स च बायसङ्गुर मिर्जातः स च शाहरुषमिर्जातः यश्च उजुन् हसन्-सार्थे स्थितः तस्मै दत्तः। तत्त्वानभिज्ञेन च तेनायं त्वया मदीया गौहरशाद्बेगिम-नाम्नी मदवरोधवासिनी हता स्थिता इत्यपराधं स्थापयित्वा हतः॥

अुमरशयेखमिर्जा सुल्तां अबूसईदमिर्जाकस्य चतुर्थः सुतः सुल्तांअहमदमिर्जा-सुल्तांमुहम्मदमिर्जा-सुल्तांमहमूदमिर्जा-नामकेभ्यः कनिष्ठः स्थितः। सुल्तां मुरादमिर्जा-सुल्तांबलद्मिर्जा-अुलुक्बेगमिर्जा-अबाबक्रमिर्जा-सुल्तांखलीलमिर्जा-शाहरुखमिर्जा-नामकेभ्यश्च षड्भ्यो ज्येष्ठः स्थितः। समरकंदे अष्टशतोत्तरं षष्टिमे वर्षे उत्पत्तिरस्याभवत्। पित्रा च काबुलदेशं दत्त्वा बाबा इ काबुली-नामकम् अतालिग इति यवनप्रसिद्धं सर्वाध्यक्षं तस्य सार्थे कृत्वा प्रेषितः। ततश्च उत्सवसभानिमित्तं दरहगज-नामक प्रदेशात् स परावृत्त्यानीतः।

ततश्च तमुत्सवं निर्वर्त्य अंदिजाँ-देशं तस्थित ओजंदस्थलं च दत्त्वा* प्रस्थापितः। अन्येपि सेनापतयस्तेन समं दत्ताः। तिमिरूताशबेगनामकश्च सर्वाध्यक्षः कृतः॥ पितृपैतामहदेश एतस्य स्वायत्तः तिष्ठतु —एतदर्थमत्र प्रस्थापितः॥

अन्यच्च—साहिबकिरान्या उमरशयेखनाम्ने निजतनयाय अयं देशो दत्तः स्थित इति कृत्वा सुल्तां अबूसईदमिर्जाकेनापि उमरशयेखनाम्ने सुताय तन्नामसाम्येन स एव देशो दत्त इति। आख्यायिकास्वेवमनुश्रूयते——यत् साहिबकिरान्यो वारंवारं वदन्तः स्थिता यन्मया सर्वे देशा अुमरशयेखमिर्जाकस्य तरवारिबलेन गृहीताः। यतः अयम् अंदिजादेश-मध्ये यदा स्थितः तदा दश्तकिविचाकदेशस्य परकोयस्य अस्मद्देशस्य च सद्द इति यवन-प्रसिद्धः सेतुर्जातः स्थितः। वयं चातिनिश्चिन्ततया परराष्ट्राणि गृह्णन्तः स्थिता इति।

†The fol. No. 167 ends at मार्गा, and निरुद्धा is continued at the fol. No. 225.

*The fol. No. 225 ends at प्रस्थापिताः, and अन्येपिः is continued at the fol. No. 57.

अनेनापि सिंहासनालंकरणयोग्येन अमुरशयेखमिर्जाकेन स देशः तथा संरक्षितः यथा परकीयस्य तत्र न प्रवेशावसरोपि। यूनुसखांकेन तद्देशग्रहणाय बहव उपायाः कृताः परन्तु किमपि कर्त्तुं न शक्तम्। कवित्वप्रियः कविप्रियः स्वयं कवित्वकरणसामर्थ्येपि कवित्वं कुर्वन्न स्थितः। काव्यान्याख्यायिकाश्च प्रियाः स्थिताः। शाहनामाख्यं च प्रबन्धं सर्वदा शृण्वन्[1] स्थितः। सर्वदा प्रसन्नवदन एव स्थितः। तत्सभायां च प्रासंगिककवयो बहवः स्थिता। तस्य च मुखदर्शनेन माहात्म्यं ज्ञायमानं स्थितम्। देशसंरक्षणे प्रजापालने चाद्वितीयः स्थितः। दानशौर्ययोरेक आवासः स्थितः। *उपेक्षा-शक्त्योरेकमायतनं स्थितः। यथा कदाचित् खितायिदेश्यः कारुवान इति प्रसिद्धो वणिक्सार्थः अंदिजापूर्वदिशि दरी-मध्येवतीर्णः स्थितः। स च हिमवृष्ट्या छिन्नो जातः। तत्र च विना मनुष्यद्वयं कोपि नावशिष्टः। इमां च वार्त्तां श्रुत्वानेन तादृशा धर्मात्मानो विश्वसनीया मनुष्याः प्रस्थापिताः यैः तत् सर्वं धनं याथातथ्येनास्मै निवेदितम्। अनेन च तत् सर्वमपरिमितं धनं कटाक्षविषयतामपि न नीतम्। अत्यन्तानुपपत्त्यावश्यापेक्षितत्वेपि न मनस्यपि ग्राह्यत्वेन कृतम्। बहुधा विचार्य विचार्य तदीयान् दायादान् आनाय्य सर्वं तद्धनं तदधीनं कृतम्। सर्वदा चास्य परमेश्वरपरिचायकानां विरक्तानां संगतिः प्रिया स्थिता। तदन्तःकरणेभ्यश्च सर्वदा उपेक्षाभिक्षां प्रार्थयानः स्थितः विशेषतश्च योगसिद्धिशरण्यात् नासिरुद्दींख्वाजहअबेदुल्लाह-संज्ञकात् ख्वाजह-अहरार इति प्रसिद्धात्॥

अपरञ्च अयं पितर्युपरते फरगाना-देशमध्ये राजधान्याम् अंदिजा-संज्ञायां सिंहासनमलं-चकार। ताशकंद-शाहरूखीय-हसबरामा अपि एतद्धस्ते स्थिताः। अनेकवारं च समरकंदोपरि सकटकः प्रस्थितः। अनेकधा च यूनुसखाँकं चगतायिखाँ-देशे मुगलखाँ-वंश्यावासस्थले स्थितं सुहृदं चाकार्य्य प्रत्यागमनं स्वीयमपि कञ्चित् कञ्चिद् देशं तस्मै ददौ। कस्माचिन् निमित्तात् स्वयमपि कदाचित् कदाचिन् मुगल-स्थानं प्रति गच्छन् स्थितः। अन्ते गत्वा च यूनुसखां यदा नीतः तदा ताशकंद-देशं तस्मै ददौ। नवशतो-†त्तरमष्टवर्षपर्य्यन्तं ताशकंददेशः शाहरुखियहदेशश्च चगतायिखाँवंश्यसुरत्राणानां हस्ते

---

१ शृण्वन्।

*The fol. No. 67 ends at उपेक्षा, and शक्त्योः...is continued at the fol. No. 221.

†The fol. No. 221 ends at...वर्षपर्य्यं, and न्तं तास...is continued at the fol. No. 55.

स्थितः । मुगुल्खाँकुलसाम्राज्यलक्ष्मीयूनुसूखाँकस्य ज्येष्ठसुत-महमूदखाँनिकटे स्थिता । तावत्पर्यन्तं च अुमरशयेखमिर्जा-भ्राता सुल्तां अहमदमिर्जानामा समरकंदेश्वरः । अनेनैव महमूदखांकेन समं प्रीतिं विधाय मिर्जोपरि सकटकः प्रस्थानमकरोत् । अत्रान्तरे चावश्यभावि मरणं मिर्जाकस्य बभूव ।—इति संक्षेपः ॥

विस्तरतस्तु—अमरशयेखमिर्जाकेन फरगानादेशान्तर्गतनगरसप्तकमध्ये यत् अख्सी-नामकं नगरं तद्राजधानीकृतं स्थितम् । इदं च नगरं शुष्कनदीविकटोच्चतटप्रदेशोपरि स्थितम् । प्रसादा अपि तत्तटे एव स्थिताः । सोमवासरे रमजानमासस्य चतुर्थ्यां तिथौ अष्टशतोत्तरं नवनवतिमे वर्षे कपोतावासस्थलनिकट एव स्थित्वा कपोतानामद्भुत-चरित्रमवलोकयन् स्थितो मिर्जा । अथानन्तरे केनचिदुक्तम्—यदीयं भूमिविदीर्णा भवितुमिच्छति । मिर्जा च सत्वर एवोच्छ्राय एकं पादत्राणं पादे कृत्वा यावदन्यत् पादे करोति तावन्मध्ये एव सा भूर्विदीर्णा । ततश्च मिर्जा ततो निपतितोप्यूर्ध्वमेवा-चक्रमे । आयुरेतस्योनचत्त्वारिंशत्परिमितम् । समरकंदे चास्योत्पत्तिः स्थिता ॥

फरगानादेशमध्ये महानदी एका प्रत्यग्गामिनी सयहूँ-नाम्नी आविखुजंद इति प्रसिद्धास्ति । अंदिजाँ-औस-मरगीहान्-अस्फरह-खुजंद-नामकानि पञ्च नगराणि तस्या दक्षिणभागे तिष्ठन्ति । अख्सीं-कासां-नामके च द्वे नगरे तस्या उत्तरतः ॥

मिर्जाकस्य पुत्रत्रयं* कन्यापञ्चकं च स्थितम् । तत्र जेष्ठः सुतः हजरतिफिरदौ-समकानी जहीरुद्दीं मुहम्मद बाबुरुपातिशाहनामा । ततश्च वर्षद्वयेन कनीयान् जहांगीरमिर्जा-नामा । अस्य च माता फातिमहसुल्तानाम्नी मुद्गलकुलीनमहासेनाध्यक्षसंभूता । तृतीयश्च नासिरमिर्जानामा जहांगीरतो वर्षद्वयेन कनीयान् । माता चास्य अंदिजा-नगरोद्भवा गीचहजीउम्मेद-नाम्नी । कन्यासु च ज्येष्ठा खांजादहबेगिम-नाम्नी सहोदरा च फिरदौसमकानीकस्य ततश्च पञ्चभिवर्षैर्ज्येष्ठा ॥

यदा च शाहइस्माइलसफचीकेन ऊज्वक्-नामकाः मर्वनगरमध्ये पराजिताः तदा इयं तन्नगरमध्ये स्थिता । ततश्च तेनेयं भूयस्या प्रतिष्ठया सहिता कुंदुज्-नगरे फिरदौसमकानीनिकटे प्रेषिता । अस्याश्च दशभिर्वर्षैर्भ्रातृदर्शनं जातम् । फिरदौसमकानी

---

1 At the botton occuns जरूरं perhaps as equivalent to शुष्क ।

*The fol. 55 ends at कन्यपंच, and कं च...is continued at the fol. No. 59.

वदन् स्थितः – यदस्या आगमनसमये अहं मुहम्मदीकोकुलताशश्च द्वावेवाग्रे गतौ। बेगिमनाम्न्या तन्निकटवर्त्तिभिश्चावां न परिचितौ बहुतरमावाभ्यां प्रत्यायिते कथञ्चित् परिचितौ ॥

द्वितीया च कन्या मिहर्वानूबेगिम-नाम्नी। इयं च नासिर्मिर्जा-सहोदरा फिरदौसमकानीतोष्टभिर्वर्षैर्ज्यायसी। तृतीया च यादिगारसुल्तांबेगिमनाम्नी। माता चास्या आगासुल्तागीचहजाँ स्थिता। अन्या च रजीयहसुल्ताँबेगिमनाम्नी। माता चास्या मखूदूमहसुल्ताँबेगिम-नाम्नी यां कराकोजबेगिम इत्यपि वदन्ति। एते द्वे पितुर्मरणोत्तरमुत्पन्ने। अुल्रस्-आगा-नाम्नी या खोजह-हुसेनस्य तनया तस्याश्चैका कन्या जाता स्थिता सा च बाल्य एव मृता ॥

(Chapter XVII)

†हजरतिफिरदौसमकानी मुहम्मदबाबुरुपातिशाहः चतुश्चक्रे श्वरः सप्तद्वीपाधिपतिः सकलभुवनपतिः आकाशसमहृदयः क्षमया क्षमया समः सप्तद्वीपरूपमृगया-विहारशीलः समुद्रतुल्यान्तःकरणः कुलरत्नरूपः पातिशाहोपि ऋषिः। महाकार्य-करणानां महोत्साहानां च स्थलमस्य देहः स्थितः। प्रभुतायां सत्यामपि तत्र निःस्पृहः निर्ममो निरहंकारश्च। राज्यलक्ष्मीचिह्नासन्निधानेपि तेजोविशेषानुमेयराज्यलक्ष्मीवान् हजरतिजुनैद-बाइजीदयोर्वैराग्यं सिकन्दरफरेदूंपातिशाहयोश्च तेजोविशेषो यदा-चरणललाटदर्शनाभ्यामेव ज्ञायमानः स्थितः। अस्य चोत्पत्तिरष्टशतोत्तरमष्टाशीतिमे वर्षे मुहर्रममासस्य षष्ठ्यां तिथौ कुतुलुक्निगारखानिमसंज्ञकाया अतिपवित्रायाः यूनुस्खांकस्य द्वितीयकन्यायाः सुल्ताँमहमूदस्य ज्येष्ठभगिन्याः। युनूस्खाँ चवस्खाँतः। स च शेरअलीअुगलाँतः। स च मुहम्मदखांतः। स च खिदिरखोजहखांतः। स च तुगुलुक् तिमुरुखाँतः। स च हेसंवूगाखांतः। स च दवाखाँतः। स च वराक्खाँतः। स च येसूंतवातः। स च येसूकांतः। स च चगतायिखाँतः। स च चिंगिज्खाँतः॥

महायोगिनामग्रणीर्यः नासिरुद्दींमुहम्मदःख्वाजहअहरार इति प्रसिद्धः। तेनास्य जहीरुद्दींमुहम्मद इति नाम कृतम्। इदं च नाम झटिति उच्चारयितुमशक्नुवन्तः तुरुष्काः। ततोस्य बाबुरु इत्यपि नाम जातम्॥

*अयं च ज्येष्ठः सुपुत्रश्च। अमुरुशयेखमिर्जाकस्य। जन्मतो द्वादशे वर्षेष्टशतोत्तरं नवनवतिमे वर्षे मङ्गलवासरे रमजानमासस्य पञ्चम्यां तिथौ अंदिजाँनगरे साम्राज्य-श्रीसिंहासनमलंचकार। परराष्ट्रग्रहणे यथास्य क्लेशयत्नौ जातौ तथा विरलस्य कस्यचित् सुरत्राणस्य। यथा अनेन स्वात्मना धाष्र्ट्योत्साहपरमेश्वरविश्वासस्थिरतादयो गुणाः समरे जीवभयादावपस्थिते चाङ्गीकृताः तथा न कस्यापि मनुष्यान्तरस्य॥

---

†The fol. No. 59 ends at फिरदौसम, and कानी...is continued at the fol. No. 56.

* The fol. No. 56 ends at जातम्, and अयं···· is continued at the fol. No. 208, where there were the words षष्ठ्यां तिथौ कुलुक्नि, that were later cancelled.

यदा हि मिर्जाकस्य अख्सीनगरे तादृशमवस्थान्तरं जातं तदा फिरदौसमकान्यः अंदिजाँनगरे च्यारिवाग इति यवनप्रसिद्धे उद्यानचतुष्टयभूभागे क्रीडन्तः स्थिताः। द्वितीयदिने च तैरियं पितृमरणवार्त्ता श्रुता। रमजानमासस्य पञ्चम्यां तिथौ मङ्गलवासरे श्रुत्वा चेमां वार्त्तां झटिति अंदिजाँनगरदुर्गाभिमुखं प्रस्थिताः। यदा च दुर्गद्वारं प्राप्ताः तदैव शेरिम्-नाम्ना मातुलेनैतेषामश्ववल्गां परावृत्त्य निमाजिगाह इति यवनप्रसिद्धस्थल-विशेषाभिमुखमेते नीताः उज्कंदनामकनगरं पर्वतमध्यवर्त्ति यत् तत् प्रापयितुम्। अन्यतो नयनस्य प्रयोजनं चैतत् — बलेन सुल्ताँअह्मदमिर्जा अत्रायाति तस्मै अत्रत्या अधिकारिपुरुषा यदि कदाचिदेतद् नगरं दास्यन्ति तदा अयमन्यत्रापि मातुलस्य अलंजहखांकस्य सुल्तांमहमूदखाँकस्य वा निकटे गत्वा जीवन् भद्रशतानि पश्येत्। तौ च सुखिनौ भविष्यतः।

ततश्च दुर्गाधिकारिभिः सेनाध्यक्षैरिमां वार्त्तां विज्ञाय †मिर्जाकस्य पुरातनः सेवकः ख्वाजहमुहम्मदनामा वस्त्रसीवनकर्त्ता एतन्निकटे प्रस्थापितः। तेन चागत्यैतन्मनस्तो भयं दूरीकृतम्। निमाजिगाहपर्यन्तं च गता एते परावृत्त्य तद्वचसा स्वस्थान्तःकरणा भूत्वा दुर्गं प्रविष्टाः। सेनापतिभिश्च सर्वैरागत्यैतेषां प्रणामाः कृताः। एतेन च तेषां प्रोत्साहनं बहु कृतम्॥

पूर्वमिदं लिखितमस्ति यत् सुल्तांअह्मदमिर्जा सुल्तांमहमूदखांकश्च परस्परमेकीभूय अुमरशयेखमिर्जोपरि प्रचलितौ स्थितौ। इदानीं च अुमरशयेखमिर्जाकस्यैतादृशावस्थान्त-रोत्तरं सर्वैः सेनापतिभिः निकटवर्त्तिभिश्चाधिकारिपुरुषैः संभूय सर्वैकवाक्यतया परमेश्वर-साहाय्येन दुर्गसंरक्षणं कृतम्। ततश्च सुल्तां अह्मदमिर्जाकः आरातीपहनामकं खुजंदनामकं मरगीनानामकं च नगरं फरगानादेश्यं गृहीत्वा अंदिजाँ-नगरस्य क्रोशचतुष्टयोपरि आगत्योपविष्टः। एतैश्च तन्निकटे बहवो मनुष्याः सामार्थं प्रेषिताः। परन्तु तेन कथमपि न तदङ्गीकृतम्। पश्चाच्च परमेश्वरस्यैतत्कुलोपरि कृपावशतो दुर्गदार्ढ्येन सकलसेनाध्यक्षैक-वाक्यतया तत्कटके महामार्या च सुल्तांअह्मदमिर्जा उद्विग्नो भूत्वा मनोरथेषु निराशस्सन् स्वयमेव साम कृत्वा निजदेशमगात्॥

---

† The fol. No. 208 ends at मिर्जाक, and स्य पुरातनः.... is continued at the fol. No. 58.

प्रदेशान्तरे च सुल्तांमहमूदखाँ एतदुपरि प्रचलितः स्थितः। स चागत्य अख्सीनगरमावृणोत्। ततश्च जहांगीरमिर्जानाम्ना फिरदौसमकानी-भ्रात्रा तदीयैर्बहुभिः सेनाध्यक्षैश्च समं बहून् समरान् *कृत्वास्वास्थ्यमापन्नो निजदेशाभिमुखं जगाम। एतैश्च जयः प्राप्तः यतश्च फिरदौसमकानीनां मावराउन्नह्रदेशे एकादशवर्षपर्यन्तं चगतायि-वंश्यैः उज़्बक्संज्ञकैश्च पातिशाहैः समं महान्तः समरा अभूवन्। वारत्रयं चैतैः निजखङ्गबलेन समरकंदनगरं गृहीतम्। नवशतोत्तरं तृतीये वर्षे सुल्तांमहमूदमिर्जा-तनया वायसंगुरमिर्जातः एकवारं द्वितीयवारं च शेवक्खांतः नवशतोत्तरं षष्ठे वर्षे तृतीयवारं च शेवक्खांकस्य मरणानन्तरं नवशतोत्तरं सप्तदशे वर्षे ॥

परमेश्वरस्येदृशीच्छा स्थिता यत् शाहनशाहीकः प्रकटो भवेत् हिंदुस्थानं च ततः सुखीभवेत्। फिरदौसमकान्योपि परदेशेतिथयो भूत्वा परिपूर्णमनोरथाः परमनोरथपूरकाश्च भवेयुरिति। अतः कारणात् पितृपितामहनिवासस्थलेपि निखिल-हितकारकजनवत्यपि देशे दुःखद्वाराण्युद्घाटितानि ॥

ततश्च फिरदौसमकान्योत्रावस्थितौ कथमपि प्रतिष्ठासंरक्षणं न भवतीत्यवधार्याल्पैरेव जनैस्समं वदख्शां-देशमाययुः। तद्देशाधिपखुसरौशाहसेवकाश्च सर्वे तत्सेवातत्परा बभूवुः। ततश्च सोपि निरुपायो भूत्वास्य सेवां स्वयमपि चकार। यद्यप्यनेन दुर्दैवेन फिरदौसमकानीपितृव्यपुत्र एकः वायसंगुरमिर्जानामा हतः स्थितः। द्वितीयश्च सुल्तांमसऊदमिर्जा-नामा चक्षूरहितः कृतः स्थितः ॥

अपरं यदा फिरदौसमकानी पूर्वदेशे भ्रमन् स्थितः तदा अनादरः कृतः अनिष्टमप्यस्य कृतं स्थितम्। †तथापि अनेन स्वकर्मणः फले प्राप्तेपि फिरदौसम-कान्या स्वमाहात्म्यानुरोधेन मनुष्यधर्मानुरोधेन च वैरनिर्यातनमार्गे न पतितम् इदं चाज्ञप्तम् — यत् स्वधनमध्ये यावदपेक्षसे तावत्त्वं गृहीत्वा खुरासान-मध्ये गच्छ। ततश्च स पञ्चविंशतिः त्रिंशद्वा उष्ट्रवामीभारान् समीचीनवस्तूनां गृहीत्वा खुरासानं जगाम। फिरदौसमकान्योपि वदख्शां-देशसंरक्षणाय समीचीनमनुष्यान् संस्थाप्य

---

* The fol. No. 58 ends at कृत्वास्वास्थ्यमा, and पन्नो··· is continued at the fol. No. 60.

† The fol. No. 60 ends at स्थितं। त, and थापि··· is continued at the fol, No, 209.

काबुल्-देशं जग्मुः । तदा च काबुल्-देशः मुहम्मदमुकीममिर्जाकेन अर्गूँ जुनून्-वंश्यसुतेन अब्दुर्रजाकमिर्जातः अलूकबेगमिर्जापुत्रात् सुल्तांअबूसईदमिर्जापौत्रात् फिरदौसमकानी-पितृव्यपुत्रात् गृहीतः स्थितः । एतदागमनवार्त्तां श्रुत्वा स दुर्गमध्यनिविष्टो बभूव ॥

ततश्च स कियद्भिरेव दिनैः जीवाभयं प्रार्थयित्वा सधनः खंधार-देशं प्रति शाहबेगनाम्नो भ्रातुस्सविधे जगाम । रबिल्आखिर-मासे नवशतोत्तरं दशमे वर्षे काबुल्देशः एतैर्वशे कृतः । ततश्च नवशतोत्तरमेकादशे वर्षे खंधारदेशं ग्रहीतुं चलिताः । कलातनामकं च तद्देश्यं नगरं गृहीत्वा स्वदेशीयकिञ्चित्-कार्यवशतः तत एव परावृत्ताः । परावर्त्तनसमये च सवासंगअलातागयोः प्रतिष्ठानान् लुण्टयित्वा काबुल्देशं प्राप्ताः ॥

एतद्वर्षारम्भे च काबुल्-देशसीमायां भूकम्पाः जाताः । दुर्गाभ्यन्तराविरललग्नज[1]-नसंचारमार्गाः दुर्गाभ्यन्तरप्रकोष्ठगृहा नगरगृहाश्च बहवो निपतिताः । पमगाँ-ग्रामस्य सर्वेपि गृहाः निपतिताः । एकस्मिन् दिने त्रयस्त्रिंशद्वारं *भूकम्पो जातः । एकमासपर्य्यन्तं चाहोरात्रमध्ये वारद्वयं भूकम्पो बभूव । बहवो लोका मृताः । पमगां-बेगतूतनामकग्रामयो-र्मध्ये पञ्चाशद्गजपरिमिता षष्टिगजपरिमिता वा भूमिः शरनिक्षेपपरिमितभूभागे उड्डीया-धस्तात् निपतिता । तद्भूभागनिर्गमनस्थले च निर्झराः प्रसुस्रुवुः । इस्तरगजमारभ्य मैदानपर्य्यन्तं प्रायशोष्टादशक्रोशपरिमिता भूमिस्तथा विशीर्णा यथा तत्प्रान्ता गजपरिमिता उच्चा बभूवुः । यदा च भूकम्पस्यारम्भो जातस्तदा पर्वतमस्तकोपरि भूयस्यो वात्याः प्रादुर्बभूवुः । तस्मिन्नेव वर्षे हिंदुस्थानेपि सर्वत्र भूकम्पो बभूव ॥

तस्मिन्नेव वर्षे शयबक्खाँ-नामा खुरासानदेशं ग्रहीतुं कटकसन्निवेशमकरोत् । सुल्तांहुसेनमिर्जा समग्रान् सुतानेकीकृत्य तत्पराभवाय यत्नमकरोत् । मीरसुल्तां-अली यस्स्वप्नदर्शी तस्य सुतः सय्यिद्अज्फल्-नामा तं फिरौदसमकानीनां सविधे साहाय्यार्थम् आमन्त्रयितुं प्रेषयामास । तेपि तद्वचसा नवशतोत्तरं द्वादशे वर्षे

---

१ दुर्गा० At the bottom of the folio, below दुर्गा, occurs फसीलें
२ Perhaps फसीलें is a vernacular rendering of दुर्गा.

*The fol. No. 209 ends at—वार भू, and कंपो जातः is continued at the fol. No. 61.

मुहर्रममासे तत्साहाय्यार्थं खुरासानं प्रस्थिताः मार्गे कहमर्द्दनगरे सुल्तांहुसेनमिर्जाकस्य मरणवार्त्तां श्रुतवन्तः । ततश्च फिरदौसमकानीभिः पूर्वगमनापेक्षया इदं गमनं बृहत्तरमिति ज्ञातम् लोकवैमत्येपि प्रचलितम् ॥

एतदागमनात् पूर्वमेव तन्मन्त्रिभिरल्पमतिभिस्सुल्तांहुसेनमिर्जाकस्य पुत्राभ्यां बदीउज्जमामिर्जामुजफ्फरहुसेनमिर्जानामकाभ्यामैकमत्येन राज्यं दत्तम् । †जमादिल्आ-(जमादुलआ)खिरमासस्याष्टम्यां तिथौ सोमवासरे मरगाब-नगरे फिरदौसमकान्यो मिर्जाभ्यां मिलिताः । तौ च प्रार्थनां कृत्वा फिरदौसमकानीकं खुरासानराजधानीं हिरातकनामकं नगरं गृहीत्वा गतौ । ततश्च फिरदौसमकान्यो मिर्जासुतयोर्वर्द्धमानलक्ष्मी-लक्षणमदृष्ट्वा परावृत्य काबुल्देशमागन्तुं तस्मिन्नेव वत्सरे शावानमासस्याष्टम्यां तिथौ प्रस्थानं कृतवन्तः । यदा चैते हजारेसंज्ञककुलसंभूतानां पर्वतेष्वागताः तदैतैः श्रुतं यत् मुहम्मदहुसेनमिर्जाकेन दुगलनिवंश्येन तथा सुल्तांसंजरेण बरलासवंश्येन काबुल्-मध्यनिविष्टान् मुद्गलानूचीयान् कृत्वा खां-मिर्जाकमध्यक्षं कृत्वा काबुल्नगरं समन्ततो वेष्टितम् । लोकमध्ये चैवमुद्घोषितं यत् सुल्ताँहुसेनमिर्जासुताभ्यां फिरदौसमकानी-भिस्समं किञ्चित्कपटं कृतमस्तीति । मुल्लाबाबाविशागरी तथा अमीरमुहिब्बअलीखलीफहः तथा अमीरमुहम्मदकासिमः कोहवुरुः तथा अह्मदयूसुः तथा अह्मदकासिमः एते काबुल्दुर्गस्य संरक्षणं सम्यक्तया कुर्वन्ति स्म । ततश्चेमां वार्त्तां श्रुत्वैव फिरदौसम-कान्यो निजभ्रातुः किंचिदसुस्थस्य जहांगीरमिर्जाकस्य पार्श्वे सर्वं कटकं संस्थाप्य परिमितैरेव जनैस्समं कथं कथमपि हिमपूर्णं हिंदूकोहनामकं पर्वतमतीत्य प्रहरावशेषायां रजन्यां काबुल्नगरं प्राप्तवन्तः ॥

एतदागमनवार्त्तां श्रुत्वैवैतद्विपक्षाः एकैकशः क्वचित्क्वचिन्निलीनाः । प्रथमं पितामह्याः शाहवेगिमनाम्न्याः खांमिर्जाकस्य राज्यग्रहणायोत्थाने निदानभूताया निकटे फिरदौसमकान्यो गतवन्तः । गत्वा च प्रणाममकुर्वन् । ततश्चानभिज्ञा इव एतद्वृत्तान्तस्य

---

†The fol. No. 61 ends at जमादिल आ, and the fol. No. 47 begins with खिरमासस्य.

1. The fol. No. 47 ends at प्राप्तवन्तः After this there are two asterisk marks. एतदागमनवार्तां...is continued at the fol. No. 62.

विज्ञप्तिमकुर्वन् यत् यदि माता कस्मिंश्चित् पुत्रे अधिकं स्नेहं करोति तदा किमित्यन्यैर्दुःखं मन्तव्यम् । ततश्च मया दूरादागतमस्ति जागरणं च कृतमस्ति- इत्यभिधाय तदुत्सङ्गे निद्रां कृतवन्तः । तस्याः समाधानाय बहून् स्नेहमार्गान् प्रदर्शितवन्तः । अत्रान्तरे मिहरनिगाखानिमसंज्ञका तेषां मातृष्वस्त्रेयी[1] आजगाम । एते च झटित्युत्थाय तस्या मिलनं कृतवन्तः । मुहम्मदहुसेनमिर्जाकं च गृहीत्वा आगतेषु लोकेषु एते मुखसंकोचितया तस्मै जीवाभयं दत्त्वा खुरासानं प्रस्थापितवन्तः । ततश्च खानिमसंज्ञका खांमिर्जाकं गृहीत्वागत्येदमुक्तवती - यदहं तवापराधिनं भ्रातरमानीतवती। तत्र का तवाज्ञा । ततश्चैते प्रीतिपूर्वं तमालिङ्ग्य कुशलप्रश्नान् कृतवन्तः गमनेवस्थाने च यथारुचि व्यवहर्त्तव्यमित्युक्तवन्तश्च । ततश्च स व्रीडितस्सन् खन्धारदेशगमनायज्ञां प्रार्थितवान् ॥

ततश्च वर्षान्तरे खंधारं गतवन्तः । ततश्च खंधाराधिपेन शाहबेगेन जुन्नूनअरगूँ-पुत्रेण मुहम्मदमुकीम-नाम्ना तदनुजेन च समं महासमरो बभूव । खांमिर्जा चागत्य मिलनं कृतवान् । ततश्चैतैः स्वानुजाय नासिर्मिर्जा-नाम्ने खंधारदेशं दत्त्वा काबुल्देशं प्रत्यागतम् । शाहबेगिमसंज्ञकायै खाँमिर्जाकाय च वदख्शाँदेशगमनायाज्ञा दत्ता । गत्वा च खाँमिर्जाकेन महता क्लेशेन जुवैरराअिनामानं हत्वा स देशो निष्कण्टकः कृतः । सर्वदा चैतेषामाज्ञायां स्थितः ॥

किं बहुना । नवशतोत्तरं षोडशे वर्षे इदं लिखित्वा प्रेषितम् - शाहीबेगखाँ-नामा मावराउन्नहरीयो हतोस्ति तत उचितमेतद् यद्भवन्तोत्रायान्तीति । ततश्चैतस्मिन्नेव वर्षे शवालमासे एते प्रस्थिताः । उज्बख्संज्ञकैश्च महान्तः समरा बभूवुः । सर्वदा च जय एतेषामेव बभूव । यावता तृतीयवारं रजबमासस्य पञ्चदश्यां तिथौ नवशतोत्तरं सप्तदशे वर्षे समरकंदनगरं वशे चक्रुः । अष्टौ मासांस्तत्रैवातिवाहितवन्तः । सफरमासे नवशतोत्तरमष्टादशे वर्षे कोलमलिकस्थले अुबेदुल्लाहखाँकेन समं महत् युद्धमासीत् । यद्यप्येतेषां जयो जातः स्थितस्तथापि दैवयोगेन विमुखीभूय हिंसार- नगरं जग्मुः ॥

नज्मबेगेन समं संभूय गुज्दुखाँ-दुर्गसमीपे उजवखैः समं पुनरपि महासमरमकुर्वन्। नज्मबेगश्च युद्धे निपपात । एते च काबुल्देशमागताः । ततश्चैतैः परमेश्वराज्ञावशात्

---

१ मातृश्वस्त्रेयी ।

मावराउन्नहरग्रहणमतिं त्यक्त्वा हिंदुस्थानग्रहणे मनोकारि। वारचतुष्टयं च हिंदुस्थानागमनोद्युक्ता भूत्वा कस्माच्चिन्निमित्तात् परावृत्य गताः। एकवारं च नवशतोत्तरं दशमे वर्षे शाबानमासे बादामनिर्झरपथेन खैबरमतीत्य जमनाम्नि स्थलेवतीर्णाः। स्वयं च या स्वस्याख्यायिका कृतास्ति तत्रेदृशं लिखितमस्ति - यत् काबुलदेशान्निर्गत्य षष्ठे दिने *आदिनपुरं वयं प्राप्ताः। हिंदुस्थानरीतिरदृष्टपूर्वा दृष्टिपथमाजगाम। तृणवृक्षा अन्यादृशाः पशुपक्षिणोप्यन्यादृशा एव। रीतिमार्गोप्यन्यादृश एव लोकानाम्। विस्मितश्चाभवम्॥

नासिरमिर्जा गजनीदेशादागत्य एतस्यामेव वसतौ आगत्य मन्मिलनं कृतवान्। जमसंज्ञकायां वसतौ मन्त्रमकुर्वन् सिन्धुनदीं कस्मिन् घट्टे तरामः। ततश्च बाकीचगणनिया-दुर्मन्त्र-योगेन सिन्धूत्तरणं न जातम्। ततश्च खट्टाभिमुखं प्रस्थाय तत् लुण्टयित्वा वंगिश-बनू-देशावपि लुण्टयित्वा ओसाखेलदेशं जग्मुः। ततश्च कियद्भिर्दिनैः मुल्तांदेश्ये सिन्धुतटीये तुरबेलानगरेवतेरुः। ततश्च दक्कीं गत्वा कियद्भिर्दिवसैर्गजनीं प्राप्तवन्तः। जिलहिज्जमासे काबुलदेशं प्राप्ताः॥

द्वितीयवारं च नवशतोत्तरं त्रयोदशे वर्षे जमादिलऔवलमासे खुर्दकाबुल्-पथा हिंदुस्थानं प्रस्थिताः मंद्रावल्पर्यन्तमागत्य लोकवैमत्येन परावृत्ताः वादपज-पथा काबुलदेशमाजग्मुः। पर्वतावतारस्थलपाषाणे च स्वाख्यायिकामुत्कीर्य लिखितवन्तः। अद्यापि सा तिष्ठत्येव। तत्क्षणपर्यन्तं च साहिबकीरानीसन्ततेर्मिर्जा इत्याख्या स्थिता। तद्दिनमारभ्य पातिशाह इति वक्तव्यमित्याज्ञा कृता।

एतस्मिन्नेव वर्षे जिल्कादहमासस्य चतुर्थ्यां तिथौ मङ्गलवासरे काबुलनगरान्तर्दुर्गे[1] हजरतिजन्नताशयानीनां जन्म जातम्। तृतीयवारं च नवशतोत्तरं पञ्चविंशतिमे वर्षे मुहर्रममासस्य प्रथमतिथौ सोमवासरे* पुनरपि बिजौरदुर्गाभिमुखं प्रचलिताः। अत्रान्तरे मध्येमार्गं भूकम्पो महान् जातः। स पादघटिकापर्यन्तं स्थितः॥

---

* The fol. No. 63 ends at दिने. After this there are two asterisk marks. आदिनपुरं.... is continued at the fol. No. 211.

* The fol. No. 211 ends at सोमवा०, and सरे is continued at the fol. No. 64.

सुल्तां अलावुद्दी सवादस्थः यः सुल्तांवयसेन समं शत्रुताभावं कुर्वन् स्थितः स आगत्य मिलितः। ततश्चाल्पेनैव कालेन विजौरदुर्गं गृहीत्वा खोजहकलाँवेगो मौलानामुहम्मदसदरपुत्रो यः अमरुशयेखमिर्जाकस्य महान् सेनापतिस्तस्मै दत्तम्। खोजाकस्य च फिरदौसमकानीषु भूयान् अनुरागः स्थितः। तस्य च षट् भ्रातरोप्यस्य सेवायाम् एतदाज्ञया प्राणान् मुक्तवन्तः ॥

फिरदौसमकान्यः खोजाकोपरि तस्य सम्यग्बुद्धिविभवेन स्नेहं कृतवन्तः। यदा चैते सवाददेशं यूसुफ़्जओीनां च देशं वशीकर्तुमुद्योगं कृतवन्तस्तदा यूसुफ़्जओीकुलाध्यक्षशाह-मनूसूरकनिष्ठभ्राता रुसूखाँनामा शाहमनूसूरतनयां गृहीत्वा एतन्निकटे समागच्छत् भूयसीं विज्ञप्तिमकरोत्। तद्देशे च बहु दुर्भिक्षं स्थितम्। एतेषां च हिंदुस्थानगमनेच्छा स्थिता। इत्यादिभिः कारणैः सवाददेशात् परावृत्य हिंदुस्थानागमनसामग्र्यामसत्यां सेनापतीनामननुमतावपि हिंदुस्थानगमनोद्देशसंकल्पमकुर्वन्। गुरुवासरे मुहर्रममासस्य षोडश्यां तिथौ नदीमुत्तीर्य कच्चाकोटनिकटे निवासमकुर्वन् ॥

भेहरानगरात् सप्तक्रोशोपरि तवुदग्दिशि‡ जूदनामके पर्वते निवासान्तरं कृतवन्तः। फिरदौसमकानीभिः स्वाख्यायिकामध्ये इदं लिखितमस्ति* — यत् अद्ययावद् वयमेतस्य पर्वतस्य जूदेत्याख्यायां निमित्तं न ज्ञातवन्तः स्थिताः। इदानीं बुद्धं यदत्र पर्वते कस्यचित् द्वौ पुत्रौ पृथग्वंशकरौ जातौ। तत्रैकस्य वंशस्य जूदेत्याख्या अपरस्य च जंजूहा इत्याख्या। तत्र स्थित्वा च अब्दुर्रहीमशकाव्वली लोकाश्वासनार्थं भेरहाग्रामं प्रेषितः यतः तेषां कोप्यतिक्रमं मा करोतु इति। अपराह्णवेलायां च स्वयमपि भेरहा-पूर्वदिशि वितस्तातीरेवतेरुः। ततश्च भेरहानागरिकेभ्योभयदाननिमित्तं लक्षचतुष्टयं शहरुखीसंज्ञका मुद्राः गृहीत्वा हिंदूबेगाय तन्नगरं दत्तम्। खुशाबनगरं च शाहहसनाय दत्त्वा हिंदूबेग-साहाय्यमादिष्टम्। मुल्लामुरशिदनामा च सुल्तां-सिकन्दर-पुत्र - सुल्तां-इबराहिम-निकटे दौत्यार्थं[१] प्रेषितः। सुल्तांइबराहिमश्च मासपञ्चकं षट्कं वा पितुः पदे उपविष्टः स्थितः। लाहोराधिपेन दौलतिखां-नाम्ना च स कियद्दिनमवस्थाप्य विना प्रयोजनं परावर्त्तितः ॥

---

* The fol. No. 64 ends at लिखितम, and स्ति is continued at the fol. No. 224. ‡ The translation of the origenal word is towards the north.

१. दूत्यार्थं।

रविउल्औवलमासस्य द्वितीयायां तिथौ शुक्रवासरे पुत्रोत्पत्तिवार्त्ता च समागता। ततश्चैतैः हिंदुस्थानगमनावसरेयमुत्पन्न इति तस्य नाम हिंदाल इति कृतम् ॥

तन्मासस्य पञ्चदश्यां तिथौ रविवासरे हिंदूबेगो भेरहाग्रामं प्रस्थापितः। स्वयं काबुलं प्रति परावृत्ताः। तस्यैव मासस्य त्रिंशत्तमे दिने काबुलमध्ये आगत्योपविष्टाः। रविउलआखिरमासस्य पञ्चविंशत्यां तिथौ सोमवासरे हिंदूबेगोनास्थया भेरहा-नगरं परित्यज्य काबुलमाजगाम ॥

चतुर्थवारं च यदा* हिंदुस्थानं फिरदौसमकान्यस्समागताः। सा यात्रा कस्मिन् मासे कस्यां तिथौ जाता तत्कुत्रापि दृष्टं नास्ति। अहं तु मन्ये तस्यां यात्रायां लाहोरपर्यन्तं देशं वशे कृत्वा परावृत्ताः इति। देपालपुरस्य जयवार्त्ता प्रसङ्गाल्लिखिष्ये। तत्समयानुसारेणैवं ज्ञायते इयं चतुर्थवृत्तिः नवशतोत्तरं त्रिंशत्तमे वर्षे जातेति ॥

कार्यं हि यस्मिन् समये भावि तस्मिन्नेव समये भवति इति समयप्रतीक्षया वारचतुष्टयं परावृत्त्य गताः। परावर्त्तने च बन्धूनां वैमत्यमेव निदानमभवत्। यावत् पञ्चमवारं नवशतोत्तरं द्वात्रिंशत्तमे वर्षे सफरमासाद्यदिने शुक्रवासरे समीचीनग्रह-योगेन हिंदुस्थानं प्रस्थिताः। मिर्जाकामरा-नामकस्य सुतस्य पार्श्वे खंधाराधिपत्यं यथावस्थितमवस्थाप्य काबुलदेशावेक्षापि तस्यैव समर्पिता। एतद्यात्रावसरे च लाहोरमन्यान्यपि हिंदुस्थाननगराणि कियन्ति एतेषां वशे स्थितानि। सफरमासस्य सप्तदश्यां तिथौ वफानामकोद्यानोपविष्टानामेतेषां जन्नताशयान्यो नसीरुद्दींमुहम्मदहुमायूं पातिशाहाः वदख्शाँदेशात् सकटका आगत्य मिलनं कृतवन्तः। तस्मिन्नेव दिने खोजहकलाँबेगः गजनीदेशादागत्य तच्चरणौ पश्यतिस्म ॥

रविउल्अव्वल्मासस्य प्रथमदिने कच्चाकोटनिकटे† सिन्धुनदीमुत्तीर्य कटकगण-नामकुर्वन्। तत्र च द्वादशसहस्रमश्वरवारास्तुरुकास्ताजीकाः सवदागरा अन्ये च लिपिविषया अभूवन्। अस्यार्थः—तुरुकाः शौर्यमात्राभिज्ञाः। ताजिकाः शूराः सन्तो-

---

* The fol. No. 224 ends at च यदा, and हिंदुस्थानं is continued at the fol. No. 65.

† Below at the page occurs "मुहल्ला देखा". It is not clear where this should be inserted in the line टे सिन्धु..............स्तुरुकाः।

लिखनादिरीत्यभिज्ञा अपि । सवदागरा अश्वादिवाणिज्यकर्त्तारः । जेलिमग्रामघट्टे च वितस्तामुत्तीर्णाः बहलोलपुरघट्टे च चन्द्रभागामुत्तीर्णाः तस्मिन्नेव मासे चतुर्दश्यां तिथौ शालकोटनगरं प्राप्ताः । ततश्चैतेषां मनसि इदमागतम् — यत् शालकोटनगरम् उज्जटं कृत्वा बहलोलपुरं प्रभूततरं कर्त्तव्यमिति । यदा चैते कलानौरमागताः तदा मुहम्मदसुल्ताँमिर्जा आदिलसुल्तांमिर्जा अन्ये च ये लाहोररक्षार्थं स्थापिताः स्थिताः ते सर्वे आगत्यैतेषां प्रणाममकुर्वन् ॥

ततश्च रबिउल्अव्वल्मासस्य चतुर्विंशत्यां तिथौ मलोटकोटं वशे चक्रुः । धनम् अन्या च सामग्री भूयसी प्राप्ता । गाजीखांपुस्तकानि च तत्र स्थितानि वस्तूनि च प्राप्तानि । तत्र कानिचित् हजरतिजन्नताशयानीभ्यो दत्तानि कानिचिच्च मिर्जाकामराकाय प्रेषितानि । यदा च श्रुतं हिंसारफिरोजहाध्यक्षो हमीदखाँनामा स्वसन्मुखं वसतिद्वयं त्रयं वा गत इति तदा जमादिल्अव्वल्मासस्य त्रयोदश्यां तिथौ रविवासरे अंबालाग्रामात् निर्गत्य महातडागतीरेवतीर्णाः स्थिताः । तत एव हजरतिहुमायूँपातिशाहं तदुपरि प्रस्थापितवन्तः । अन्यच्च—अमीरखोजहकलांबेगः अमीरसुल्तांमुहम्मदः दुलदेवंश्यः अमीरवलीखाजिनः । अमीरअब्दुल्अजीजनामा अमीरमुहिब्बअलीखोजहखलीफहः — एते अन्ये च ये हिंदुस्थानमध्ये स्थापिताः स्थिताः । हिंदूबेगः अब्दुल्अजीजः मुहम्मदअली जिंगजिंगः अन्येपि ये समीचीनाः स्वीयाः ते सर्वे तेषां प्रसंगे प्रस्थापिताः । बबन्नामा यः हिंदुस्थानसेनापतिषु श्रेष्ठः स आगत्य एतेषां मिलनं कृतवान् । तत एते चानायासेनैव महाभाग्यवत्तया तं जित्वा एकविंशत्यां तिथौ तस्मिन्नेव मासे परावृत्त्यागताः ॥

ततश्च फिरदौसमकानीभिर्हिंसारफिरोजहनगरं स्वीयग्रामैस्सहितं कोटिटङ्कानामुत्पत्तिस्थलं मूर्त्तिमती चैका कोटिरिति एतत् एतस्य जयस्य पारितोषिकत्वेन दत्तम् । ततश्च दैनंदिनं चलन्त एव स्थिताः । प्रतिक्षणमियं वार्त्तायान्ती स्थिता यत् सुल्तांइबराहिम एकलक्षाश्ववारपरिवृतः एकसहस्रं गजानादायाग्रे समायाति । यदा चैते सरसावाग्रामेवतीर्णाः स्थिताः तदा खोजहकलाँबेगसेवकः हैदरुअलीनामा अग्रे गतः स्थितः । तेनागत्य श्रावितं यत् दाउदखां-हातमखाँ—नामानौ द्वौ पञ्चषट्सहस्राश्ववारैस्समं सुल्तांइबराहिमकटकात् पृथग्भूय आगच्छत इति । जमादिल्आखिर-

मासस्याष्टदश्यां तिथौ रवौचींतिमुरुसुल्तां – मुहम्मदसुल्तामिर्जामहदीखोजह–आदिल-सुल्तां इत्येते दक्षिणहस्तस्थितैः सवैर्जनैस्सुल्तांजुनैदः तथा शाहमीरहुसैनः तथा कुतुलुक्कदमः इत्येतैः मध्यप्रदेशवर्तिभिः यूनुसूअली तथा अब्दुल्लहः तथा अह्मदी तथा कत्तबेगः एतैरन्यैश्च समं प्रस्थापिताः यथा तेषु सम्यक्तया हस्तप्रयोगं कुर्वन्त्विति। एतैश्च शूरैः शीघ्रं गत्वा युद्धं कृत्वा ते जिताः। केचिच्छरैः खड्गैश्च निहताः केचिच्च बन्दीकृताः। हातमखाँ सप्ततिलोकैः समं राजद्वारे प्रेषितः। ततश्चैते सर्वे पातिशाहेन हताः। इदमाज्ञप्तं च यद् रथाः सज्जीक्रियन्ताम्। अुस्ताअली-कुलीक इदमाज्ञप्तो यद् रूमदेशवत् शृङ्खलाभिचर्मरज्जुभिश्चैते रथाः शृङ्खलिताः कर्त्तव्य। इति। पञ्चषैर्दिनैरिदं कार्यं निष्पन्नम् ॥

एतन्मासान्तिमे दिने पाणिपथनगरं प्राप्ताः। एतैश्च तादृशो व्यूहो रचितः स्थितः-येन दक्षिणपार्श्वस्था लोकास्तन्नगरमध्ये विस्तृता जाताः। शृङ्खलिता रथाश्च मध्य-प्रदेशवर्त्तिलोकानामग्रे जाताः। वामपार्श्ववर्त्तिनश्च लोकाः परिखया वृक्षैश्चागम्या बभूवुः। सुल्ताँ इबराहिमोपि स्वकटकेन समं पाणिपथात् षट्क्रोशोपरि सम्यक्तया निविष्टः। दिनसप्तकं चैते पाणिपथे निविष्टाः। तत एतच्छूरा इतो निर्गत्य परेषां सैन्यमध्ये गत्वा युद्धं कृत्वा आगतवन्तः। सुल्तां इबराहिमो रजबमासस्याष्टम्यां तिथौ शुक्रवासरे महता सैन्येन गजैश्चैतदुपरि आगच्छत्। तत एतैरपि स्वसैन्यं व्यूह्यावस्थापितम् ॥

अथ हजरतिफिरदौसमकानीनां सुल्ताँइबराहिमेन समं युद्धवार्त्ता जयप्राप्तिश्च निरूप्यते ॥

यदा हि परमेश्वर इदमिच्छति यद् दुःखप्राप्त्यनन्तरं यस्य सामीचीन्यं भवत्विति स यदेवारभते तदेव निष्पन्नं भवति। यथा प्रकृते सुल्तांइबराहिमश्चतुरङ्ग-सेनया सहितः आयातः। यद्यपि फिरदौसमकान्योल्पपरिवारा एव स्थितास्तथापि जगदीश-विश्वासेन सेनाव्यूहं रचितवन्तः। स यथा मध्यप्रदेशे गोल इति यवनप्रसिद्धे स्वयं स्थिताः। गोलस्य दक्षिणप्रदेशे अुनूगोल इति प्रसिद्धे चींतिमुरुसुल्तां तथा सिलेमामिर्जा तथा अमीर मुहम्मदीकोकुल्ताशः तथा अमीरूशाहमनसूरः बरलासवंश्यः तथा अमीरयूनुसअली तथा अमीरदरवेशमुहम्मदसारिवाँ तथा अमीरअब्दुल्लाहकिताबदारः एते स्थिताः।

गोलस्य वामप्रदेशे सोलगोल इति यवनप्रसिद्धे अमीरखलीफहः तथा खोजहमीरमोराँ-सदूरु तथा अमीरअह्मदीपरवानची तथा अमीरतुरदीबेगः कुचबेगभ्राता तथा मुहिब्बअलीखलीफहः तथा मिर्जाबेगः तरखां एते स्थापिताः। कटकदक्षिणप्रदेशे बरंगारेति प्रसिद्धे हजरतिजन्नताशयान्यः स्थिताः। एतत्सार्थे च अमीरखोजहकलाँ-बेगः तथा सुल्ताँमुहम्मदः दुलदेवंश्यः तथा अमीरहिंदूबेगः तथा वलीखाजिन् तथा पीरकुलीसीस्तानी एते स्थापिताः। कटकवामप्रदेशे जुङ्गारेति प्रसिद्धे मुहम्मद-सुल्तांमिर्जा तथा सय्यिदमहदीखोजहः तथा आदिल्सुल्तां तथा सुल्तांजुनैद-बरलासः तथा खोजहशाहमीरहुसेनः तथा अमीरकुतुल्क्कदमः तथा अमीरजांबेगः, तथा अमीरमुहम्मदबख्शी अन्येपि बहवः शूराः स्थापिताः। सर्वेषामग्रे च हिरावल्समाख्यः खुसरौकौकुलताशः तथा मुहम्मदअलीजिंगजिंगः एतौ स्थितौ। अमीरअब्दुल्अजीज्-नामा तरहः कृतः। तरहो नाम यत्र क्वचित् स्थित्वा यस्मिन् एव प्रदेशे स्वसैन्यभङ्गसम्भावना तत्र गत्वा तत्साहाय्यकर्त्ता। औजबरंगारेति प्रसिद्धे कटकदक्षिणभागोपरितनप्रदेशे मीरवली तथा मलिककासिमः तथा बाबाकश्कहः निजवंश्ययावन्मुद्गलसहितः एते स्थिताः। औजजुंगारे कराकोजी तथा* अबुल्-मुहम्मदनेजबाजः तथा शयेखअली तथा शयेखजमालः तथा तिंगिरीकुलीमुद्गलः एते स्थिताः। ततश्च स्थले स्थले शूररीत्यनुसारेण सर्वे वृक्षा इवाचलाः जाताः। शौर्यस्य दादीति प्रसिद्धं समाधानं कृतम्। युद्ध्यमानाश्च जयं प्रापुः। सुल्ताँ-इबराहिमश्चाज्ञानत एव कस्मिंश्चित् प्रदेशे निहतः। बहवश्च सैनिकास्तदीया निहताः। यत्र च प्रदेशे सुल्ताँइबराहिमस्य देहो निपतितः स्थितः तत्र पञ्च षट् वा सहस्रं मनुष्याः निहता निपतिताः स्थिताः। दण्डद्वयपरिमिते दिवसे युद्धारम्भो जातः मध्याह्ने च जयो जातः॥

एतज्जयविस्तारश्च वर्द्धमानलक्ष्म्याः चिह्नं कथं वाक्पथविषयः स्यात् यो विचाररूपात् विस्तीर्णतावासस्थलाद्बहिरस्ति। यदा च सुल्ताँमहमूदो गजनवीको हिंदुस्थान-मागतः स्थितः तदा खुरासानदेशः तदधीनः स्थितः। समरकंददारुल्मरजख्वारज्म-

* The folio No. 69 ends at कराको, and जी तथा is continued at the folio No. 71.

देशाधिपास्तदाज्ञावशाः स्थिताः। कटकं च तस्य लक्षाधिकं स्थितम्। हिंदुस्थाने च तादृशः कोप्येको महाराजो न स्थितः। स्थले स्थले सामन्ताः स्थिताः। तेषामपि परस्परं हृदयशुद्धिर्न स्थिता। सुल्तांसहावदीगोरी विंशतिसहस्राधिकलक्षाश्ववारैः ससन्नाहैः सहितः हिंदुस्थानग्रहणार्थमागतः स्थितः। तदापि कोपि नामग्रहणयोग्यो नैको महाराज आसीत्। यद्यपि खुरासानं तद्भ्रातुः सुल्ताग्यासुद्दीँकस्य हस्ते स्थितं परन्तु सोपि तदाज्ञायामेव स्थितः। हजरतिसाहिबकिरानीभिरपि हिंदुस्थानग्रहणसमये समानाग्रामे स्वकटकावेक्षणमाज्ञप्तम्। मुल्लाशरफुद्दींअलीयजदीकेनोक्तम्—यत् साक्षात् सेवकपङ्क्तिदैर्घ्यं षट्फरसंगपरिमितम्। फरसंगश्च क्रोशत्रयात्मकः। एकैकस्मिंश्च-फरसंगे द्वादशसहस्रमश्ववाराः स्थातुं शक्नुवन्ति। आयामश्चास्य परंपरासेवकाश्ववा-रावस्थानस्थलं क्रोशद्वयपरिमितः स्थितः। एतेषां विपक्षश्च दशसहस्राश्ववारैः विंशत्यधिकशतगजैः परिवृतः। मल्लूखाँनामा हिंदुस्थाने स्थितः। तथापि साहिब-किरानीनां बहवो लोकास्त्रसन्तः स्थिताः। साहिबकिरानीभिश्चैतद् बुद्ध्वा मन्दमतिभ्य-श्चानुचिता वार्त्ताः श्रुत्वा वृक्षशाखाभिः दुर्गं कृतम्। तद्बहिश्च परिखा लोकसमाधानाय कृता। लोहकण्टकांश्च बहून् विधाय पदातीनां हस्ते समर्पितवन्तः यदा हस्तिघटा आयास्यन्ति तदा तेषां पथि प्रक्षेप्तुम्। फिरदौसमकानीनां संगे च हिंदुस्थानग्रहणार्थमश्ववारा अन्ये च द्वादशसहस्राधिका न स्थिताः। अद्भुतमिदं यदेतेषां बदख्शांदेशः खंधारं काबुल्देशः इत्येतावदेव वशे स्थितम्। तत्रापि द्रव्यमेतादृशं नोत्पद्यमानं स्थितं येन सैन्यव्ययितव्य-निर्वाहो भवति। किं बहुना। सीमारक्षणार्थमन्यदपि द्रव्यमपेक्षितं स्थितम्। मेहरात आरभ्य विहारपर्यन्तं हिंदुस्थानाधिपेन निर्विपक्षेण सुल्तांइबराहिमेन समं युद्धं कृत्वा जयः प्राप्तः। इदं परमेश्वरकृपाकटाक्षत एतेभ्य एव सम्भावितम्। कार्यपरिचेतारो हि एतादृशकार्यकर्त्तुः स्तुतिं कथमपि कर्त्तुं न शक्नुवन्ति। अथवा आं शाहनशाहीकतेजो-धारकात् तादृशपवित्रदेहात् एतादृशमद्भुतं कार्य्यं भवति तत्र किमपूर्वम्। ततश्च फिरदौसमकानीभिरेतज्जयोत्तरं परमेश्वरस्य शिरसा प्रणामः कृतः। लोकेभ्यश्च पारितोषि-कानि दत्तानि। स्थले स्थले च स्वीया लोका देशसंरक्षणार्थं प्रस्थापिताः॥

अन्यच्च —— अन्येषां सुरत्राणानां हिंदुस्थान-ग्रहणे यदाधिक्यं स जयः जन्नता-शयानीनां सिंहनदेस्ति यथाग्रे लिखिष्यते। सहस्रत्रयाश्ववारैः समं सुल्तांसिकंदरपाति-शाहात् प्रतिष्ठानादशीतिसहस्राधिकसैन्यवतः हिंदुस्थानं गृहीतम्। इतोप्यत्यद्भुतमिदं

शाहनशाहीकस्य यत् परमेश्वरप्रसादतः स्वल्पैरेव लोकैः बहुभ्यो राजभ्यः हिंदुस्थानं गृहीतम् । यथाग्रे विस्तरतः कथयिष्यते ॥

तस्मिन्नेव जयदिने फिरदौसमकानीनाम् आज्ञातः जन्नताशयान्यः खोजहकलांबेगः अमीरमुहम्मदकोकुलताशः तथा अमीरयूनुस्अली तथा अमीरशाहमनसूरबरलासः तथा अमीरअब्दुल्लाहकिताबदारः तथा अमीरअलीखाजिनः—एतैः समम् इलगारेति प्रसिद्धेन गमनविशेषेण सुल्तांइबराहिमराजधानीमागरां प्रति प्रस्थिताः । कोशागाराणां रक्षणार्थं नागरिकानामाश्वासनार्थं च सय्यिदमहदीखोजहः तथा मुहम्मदसुल्तांमिर्जा तथा आदिलसुल्तां तथा अमीरजुनैदबरलासः तथा अमीरकुतुलुक्कदमः—एते टिल्लीं प्रति प्रस्थापिताः । तत्रत्यकोशसंरक्षणाय लोकाश्वासनाय च तस्मिन्नेव दिने काबुल्-खंधार-वदख्शां-देशेषु† फतहनामे इति प्रसिद्धानि जयपत्राणि प्रेषितानि । स्वयं च बुधवासरे रजबमासस्य द्वादश्यां तिथौ टिल्लीं प्राप्ताः एकविंशत्यां तिथौ शुक्रवासरे आगरामागताः ।

ततश्चैतैः लघवो महान्तश्च हिंदुस्थानलोका नानादेश्याः कृपाकटाक्षैः सम्भाविताः । सुल्तांइबराहिममात्रे तदपत्येभ्यश्च तेषामसाधारणं कोशं दत्वा सप्तलक्षटङ्कोत्पत्तिस्थलं देशस्तन्मात्रे दत्तः । एवमेव तत्सुहृद्भ्यः किंचित् किंचिद्यथोचितं प्रात्यहिकं कृतम् । सर्वैश्च जनैः ततः प्रभृति विश्रामः प्राप्तः । हजरतिजन्नताशयानीभिः पूर्वमेवागरामागतैः एको हीरकः नवटङ्कपरिमितः सर्वस्य संसारस्यैकदिनव्ययितव्यार्द्धमूल्यवान् विक्रमादित्य-सन्ततेः सुल्तांअल्लावदीकेन प्राप्तः स्थितः: । स फिरदौसमकानीभ्य उपायनीकृतः ॥ एतैश्च तत्सन्तोषार्थं स्वीकृत्य पुनरपि तेभ्यो दत्तः ॥

ततश्चैते रजबमासस्योनत्रिंशत्तमे दिने बहुभिः पातिशाहैरुपार्जितस्य कोशस्य दर्शनार्थं दानार्थं चारम्भः कृतः । सप्ततिलक्षपरिमिताः सिकंदरीटङ्काः जन्नता-शयानीभ्यो दत्ताः । एकं कोशागारं विना कोशेयत्तानिर्णयन्तेभ्य एव दत्तम् । सेनापतिभ्यश्च यथोचितं पञ्चलक्षेभ्य आ दशलक्षं दत्तम् । एकाकिभ्यश्च शूराश्ववारेभ्यः अन्येभ्यश्च सर्वेभ्यः सेवकेभ्यो यथोचितं पारितोषिकं दत्तम् । पण्डितेभ्यो ज्ञानिभ्यश्च लोकेभ्यः भूयस्यः संपदो दत्ताः* । किं बहुना । स्वसैनिकानारभ्य

---

† The fol. No. 73 ends at खंधारं, and वदख्शां is continued at the fol. No. 78.

*After the following cancelled letters occur—

किं बहुना स्वसैनिकानारभ्य अपणिकलोकपर्य्यं—

After this the fol. No. 78 ends, किं बहुना is continued at the fol. No.74.

आपणिकलोकपर्यन्तं समीचीनपारितोषिकरहितः कोपि न स्थापितः । स्वसन्तति-मध्ये च ये काबुल्खंधारबदख्शांमध्ये स्थिताः तेभ्योपि द्रव्यं पृथक्कृत्वा मिर्जा-कामराकाय सप्तदशलक्षटङ्काः मुहम्मदजमामिर्जाकाय पञ्चदशलक्षटङ्काः एवमेव अस्करीमिर्जाकाय तथा हिंदाल्मिर्जाकाय स्त्रीजातिभ्यश्च सर्वाभ्यः असन्निहितेभ्यः सेनापतिभ्यः सेवकेभ्यश्च यथोचितं हीरकाद्युपेता अलंकारा उत्तमानि वस्त्राणि सुवर्णमुद्रा रजतमुद्राश्च परिच्छिद्य स्थापिताः । अपरं च ये केचन स्वस्मादपेक्षां कुर्वन्तः स्थिताः यथाकथंचित् स्वसंबन्धिनः समरकंद-खुरासान-काशगर-इराकदेशस्थिताः तेभ्यः सर्वेभ्यः समीचीनाः प्रीतिदाया प्रेषिताः । समरकंद-खुरासानयोर्देशान्तरेषु च सिद्धशरीरनिखनन-स्थलेभ्यः उपयाचितं धनं प्रेषितम् । काबुल-सदह्-वरसक्-खोस्तहस्थितेभ्यः आबालवृद्धं सर्वेभ्यो जनेभ्य एकैका शाहरूखी दातव्येति समाज्ञप्तम् ! यथा सर्वे उच्चावचा जना एतत्कृपाकटाक्षविषया जाताः ॥

परमेश्वरो हि यदा यस्य कस्यचित् स्वरूपमाहात्म्यं प्रकटयितुमिच्छति तदा समीचीनानि दुर्घटानि कार्याणि तस्याग्रे आनयति येन तत्सम्पादनोत्तरं तन्महाभाग्यं विश्वविख्यातं भवति । यद्यपि फिरदौसमकानीभिः तादृशजयोत्तरं बहु द्रव्यं पारितोषिकं बहुभ्यो दत्तं तथापि एते लोका हिंदुस्थानीयास्ते च मुद्गला अतिवैदेशिका इत्यतो नैतेषां तथैक्य-मभवत् । दूरतराश्चाभवन् यतः टिल्ली आगरा च यद्यप्येतेषां हस्ते स्थिता तथापि एतत्पार्श्ववर्त्तिनो देशा एतच्छत्रुवशे स्थिताः । तथाहि । शंभलदुर्गं कासिमसंभलीहस्ते स्थितम् । बयानादुर्गं निजामखाँकेन वशीकृतं स्थितम् । मेवातदेशं च हसनखांमेवाती गृहीत्वा स्थितः । धवलपुरे च मुहम्मदजैतूं स्थितः । ग्वालेरिदुर्गे च तातारखाँ सारंगखानी अध्यक्षो जातः स्थितः । रपडीदेशे च हुसेनखाँनूहाणी स्थितः । इटावा-ग्रामे कुतुप्खांकः काल्प्यां च आलमखां संरक्षणं कुर्वन् स्थितः । महावने आगरातोति-सन्निहिते सरगूवनानामा सुल्तांइबराहिमस्य क्रीतदासो रक्षां कुर्वन् स्थितः । कान्यकुब्ज-नगरमन्यान्यपि गङ्गापारनगराणि नसीरखाँनूहाणी तथा मारुफफुरुमुली एतयोर्वशे स्थितानि । एतौ च जीवतोपि सुल्तांइबराहिमस्य व्यूथ्यावेव स्थितौ । एताभ्यां च सुल्तांइबराहिमस्यैतादृशावस्थोत्तरमन्यमपि देशं वशे कृत्वा पहाडखांनामा दरियाखांपुत्रः सुल्ताँमुहम्मद-नामा सुरत्राणः कृतः ॥

तस्मिन्नेव वर्षे आगरायां निवसत्स्वेतेषु ऊष्मणोतिबाहुल्येन महामारीभयेन बहवोति-

मन्दमतयः प्रपलाय्य गताः । ततश्च विपक्षाणां प्रकटीभावेन मार्गप्रतिरोधेन सवदागारेति प्रसिद्धानां च वणिजामनागमनेन च संकटप्राप्त्या लोकजीवनं दुर्घटं जातम् । ततश्च सर्वैः सेनाध्यक्षैर्मन्त्रः कृतः — यत् इतो निर्गत्य स्वदेशे गन्तव्यमिति ॥

यक्कजुवान इति प्रसिद्धा एकाकिनोऽश्ववारा विनैव प्रभुप्रश्नं बहवः प्रपलाय्य गताः । यद्यपि बहवः सेनाध्यक्षाः प्राचीनाः पितृपितामहक्रमेण शौर्यवृत्त्युपजीविनो बहूनसाधुवादानवाच्यवादांश्चैतेषां समक्षं परोक्षं च वदन्ति स्म तथापि एते क्षमयैव तं कालमतिवाहयांबभूवुः । देशकार्ये च यथोचितसंनिवेशं चक्रुः । किं बहुना । ये स्वयमेव वृद्धिं प्रापिता असाधारणाः स्वीया अत्याप्ताश्च तेभ्योऽपि चेष्टाविशेषादिभिस्तथा प्रकटमासीत् यत् केनापि वक्तुं न शक्यते । तन्मध्येऽपि विशेषत एतौ अह्मदीपरवानचीः तथा वलीखाजिन् । तत्राप्यद्भुतमिदम्—खोजहकलांबेगः यः सर्वेषु कटकेषु विशेषतश्चैतस्मिन् हिंदुस्थानग्रहणार्थं कटके शौर्यवार्त्ता उत्साहवार्त्ताश्च वदन् स्थितस्तस्यापि मन्त्रोऽन्यथैव बभूव । अन्यादृश इव स जातः । सर्वेभ्यश्चातिशयेन वाच्यवृत्त्या व्यञ्जनया च हिंदुस्थानपरित्यागे परं यत्नमातिष्ठत् ॥

ततश्चात्यावश्यकतया फिरदौसमकानीभिः अरकानमम्लकति इति प्रसिद्धान् अतिमहतः सेनाध्यक्षान् आहूय समीचीनाः शिक्षाः कृताः । तत्सम्मताः तद्धृदयस्थिताश्च वार्त्ताः अन्यसमीचीनत्वेन तेभ्योऽभ्युपगमं प्रापिताः । वारंवारं च वदन्ति स्म यदेतादृशोऽद्भुतो देशोऽतियत्नोपार्जितोऽल्पेनैवायासेन परित्यक्तव्य इति नैषा चक्रवर्त्तिनां रीतिः । नवान्येषां भाग्यवतामपि संपद्विपदौ सुखदुःखे च सहैव तिष्ठतः । यावद् दुःखं प्राप्तव्यं स्थितं तावत् प्राप्तमस्ति । अवश्यमेतदुत्तरं सुखप्राप्तिर्भविष्यति । एवमपेक्षितं यद्भवन्तो जगदीश्वरविश्वासरशनामवलम्ब्य तादृशशब्दन् मा उच्चारयन्तु येन लोकानां भूयसी व्याकुलता भवति । येषां च देशगमनेच्छा निजाधमतारूपरत्नप्रकटीकरणेच्छा चास्ति तेऽस्माभिरपि न निर्बन्धेन संरक्ष्यन्ते । यान्ति चेत् सुखेन यान्तु । अस्माभिश्च परमेश्वरशक्त्या दृढीभूतस्यात्यन्तोच्चोत्साहस्य अवलम्बेन हिंदुस्थानमध्येवस्थानं निर्णीतमस्ति । ततश्चान्तत एतेषां पार्श्ववर्त्तिभिः अरकानदौलति इति प्रसिद्धैः इदमेव निर्णीतम् — यदिदमेव वास्तवं यत् हजरतिपातिशाहाः समाज्ञापयन्ति । पातिशाहानां वचनं हि वचसां पातिशाहोऽस्ति ॥

ततश्च सर्वैर्हिंदुस्थानावस्थानं मनसि निर्णीतम् । खोजहकलांबेगो यः सर्वापेक्षया

गमनायोत्तालः स्थितः स एव यत्पूर्वं निजसुतेभ्यस्तथा निजसुहृद्भ्यस्तथा निजसेवकेभ्यश्च पारितोषिकं पृथक्कृत्य स्थापितं स्थितं तत्तेभ्यस्तेभ्यो निवेदयितुं दत्त्वा प्रस्थापितः । तस्मै च गजनीदेशः गर्देज्देशः हजारचेदेशः सुल्तांमसूदीयः हिंदुस्थानमध्ये कुहडामदेश* एते देशाः वेतनत्वेन दत्ताः । मीरमीराँ अपि काबुल्देशं प्रति प्रस्थापितः ॥

जिल्हिज्जहमासस्य विंशत्यां तिथौ गुरुवासरे खोजहकलांबेगः प्रस्थितः । अतिप्रसिद्धमिदं यत्कार्यं बुद्धिसाहाय्येन क्रियते तत्सर्वथा सर्वफलदं भवति† । अत्रार्थे निदर्शनं फिरदौसमकानीनां चरितम् । सैनिकानां व्याकुलतायां सत्यां शत्रूणां बहुत्वेपि निजोत्साहबलेन परमेश्वरविश्वासेन च हिंदुस्थानमध्यप्रदेशवर्त्ति आगरानगरमेतैः राजधानी कृता । उपायबलेन दानन्यायकरणाभ्यां च नानाजातीयलोकवत् बहुनायकं च यत् हिंदुस्थानं तस्य विश्रामः कृतः । यथा शनैः शनैस्सर्वेपि हिंदुस्थानस्थिताः सेनापतयः सामन्ताश्चागत्यैतेषां सेवां चक्रुः । तन्मध्ये च सेखघूरननामा स्वयं सेवां कृत्वा सहस्रत्रयं विख्यातान् मनुष्यान् एतत्सेवायामानयति स्म । एतैश्च ते सर्वे मनुष्याः योग्यताया अप्यधिकं सम्भाविताः ॥

फिरोजखां तथा शयेखबावजीदः महमूदखाँनूहानीकाजीजीया एते सेनापतिषु महत्तराः स्थिताः । एतैरागत्य तत्सेवां विधाय सर्वे मनोरथाः प्राप्ताः । फिरोजखाँकाय ज़वनपुरात् किंचिदधिककोटिटङ्काः शयेखवायजीदाय चायोध्यायाः कोटिटङ्काः महमूदखांकाय च गाजीपुरात् नवतिलक्षटङ्काः काजीजीयाकाय च यवनपुरात् विंशतिलक्षटङ्काः वेतनं जागीरीति प्रसिद्धं दत्तम् । स्वल्पैरेव दिनैः निष्कण्टकं राज्यं मनोरथप्राप्तिः अपेक्षितादप्यधिकं च बभूव । सब्बालमासस्य ईदनामकात् प्रथमदिनात् कियत्सु दिनेष्वतीतेषु आगरायां सुल्तांइबराहिमगृहेषु महती उत्सवसभा रचिता फिरदौसमकानीभिः । सौख्यप्राप्तेदादींति प्रसिद्धं समाधानं कृतम् । पारितोषिकराशयो

---

* In the English translation for कुहडाभ there occurs the *Pargana* of Ghurām.

† The fol. No. 77 ends at भवति, and अत्रार्थे is continued at the fol. No. 79.

लोकाञ्चलेषु निक्षिप्ताः। शंभलदेशो जन्नताशयानीभ्यो दत्तः। हिसारफिरोजदेशस्तु पूर्वमेव दत्तः स्थितः। जन्नताशयानीदिशि स्वयं शंभलदेशं प्रति अमीरहिंदुबेगः प्रस्थापितः। बब्बनूनाम्ना च शंभलदुर्गं निरुद्धं स्थितम् इत्यतः हिंदुबेगस्तथा कत्तहबेगः तथा मलीककासिमः तथा बाबाकश्कहः सभ्रातृकः तथा मुल्लाअफाकः तथा शयेखघूरनः म्यानदावस्थितैः सर्वैः सैनिकैस्समभेते सर्वे इल्गारेति प्रसिद्धेन गमनविशेषेण प्रस्थापिताः। एतत्सेनामुखस्थितैर्लोकैः समं बवनूनामा युद्धं कृत्वा प्रपलाय्य गतः। कृतघ्नः स एतेषां सेवां प्राप्य पुनरपि पराङ्मुखो जात इत्यतः तेन समीचीनं दिनं कदापि न दृष्टम् ॥

(Chapter XVIII)

अथ फिरदौसमकानीनां मन्त्रकरणम् जन्नताशयानीनां पूर्वदेशकार्य-करणं च निरूप्यते ॥

फिरदौसमकान्यो यदा पूर्वं गृहीतस्यागरापर्यन्तस्य देशस्य विषये स्वस्थान्तःकरणाः जाताः वर्षादिनानि चातिसन्तोषसभाभिरतिवाहितानि राज्ञां परराष्ट्रग्रहणायोद्योगकारिण्यां शरदि च प्राप्तायां मन्त्रमारभन्ते स्म। यत्पूर्वदिशि नूहानीनामकाः प्रतिष्ठानाः प्रायशः पञ्चशत्सहस्राश्ववारपरिवृताः कान्यकुब्जनगराद्वर्वाक् मनसि दुष्टतां धृत्वा आगताः सन्ति। पश्चिमदिशि च राणासांगानामा बलवान् जातोस्ति। साम्प्रतं च तेन खंडारनामकं दुर्गं गृहीतमस्ति। इत्येवं कार्यद्वये आवश्यके किमनुष्ठेयम्। ततश्च सेनापतीनां कानिचिद् वचनानि श्रुत्वा फिरदौसमकान्य ऊचुः—यत् राणासांगा काबुलदेशस्थेष्वस्मासु सर्वदा विज्ञप्तिपत्राणि प्रेषयामास-युष्मदाज्ञानुसारेण मया सेवा कर्त्तव्येत्यपि लिखति स्म। तेन च यदि कियन्ति दिनानि विज्ञप्तिपत्रं न प्रेषितम् अथवा अस्मत्सेवार्थमनागतस्य मकन्सुतस्य हसननाम्नः खंडारदुर्गं गृहीतं (तेन) तदा तस्य न कोप्यपराध इति साम्प्रतं तदुपरि प्रस्थानं नोचितम्। सुबुद्धीन् मनुष्यान् प्रस्थाप्य तन्मनोगतं च बोद्धव्यम्। यावत्पर्यन्तं च तन्मनोगतं बुद्ध्यते तावत्पर्यन्तं पूर्वदिशि स्थितानां नूहानीनामकप्रतिष्ठानानां पराजयः कर्त्तव्यः। अत्रान्तरे च फिरदौसमकानीभिः स्वयमेव प्रस्थाने स्वबुद्ध्या निर्णीते हजरतिजन्नताशयान्यो विज्ञापयांबभूवुः—यदियं सेवा मदधीना भवतु। युष्मत्कृपया च यथा श्रीमन्मनोरथमियं सेवा मत्तोपि संभाव्यते। इयं च विज्ञप्तिः फिरदौसमकानीनामत्यन्तं सुखदायिनी बभूव प्रसन्नवदनैश्च भूत्वा स्वीकृता च। ततश्च जन्नताशयान्योस्मिन् कार्येत्यन्तमुत्साहवन्तोभूवन्। ततश्चाज्ञा जाता यत् आदिल्सुल्तां तथा मुहम्मदकोकल्ताश् तथा अमीरशाहमनसूरबरलास् तथा अमीरकुतुलक्कदम् तथा अमीरअब्दुल्लाह् तथा अमीरवली यथा अमीरजाँबेग् तथा पीरकुली तथा अमीरशाहहुसेन एते ये पूर्वं धवलपुरं तत्पार्श्ववर्त्तिनं च देशं मुहम्मदजैतूंतो गृहीत्वा सुल्ताजुनैदबरलासाधीनं कृत्वा बयानाग्रहणार्थं प्रेषिताः स्थितास्ते सर्वे एतेषां सङ्गे

गच्छन्तु । ततश्च काबुली अह्मदकासिम* एवमाज्ञप्तो यत्त्वं गत्वा एतान्सेनापतींश्चन्द-वारनगरे संस्थापय कटकमिलनार्थम् । तथा सय्यिदमहदीखोजहनामा इटावादेशाधिपो जागीरदार इति प्रसिद्धस्स तथा महम्मदसुल्तांमिर्जा तथा सुल्तांमहम्मददोलदे तथा महम्मदअलीजिंगजिंगः तथा अब्दुलअजीजमीराखोरः अश्वाध्यक्षः सकलकटकसहितः एते इटावाप्रदेशे लुण्ठनं कुर्वन् स्थितो यः कुतुपखांनामा प्रतिष्ठानस्तस्य जयार्थं प्रेषिता आसन् । ते सर्वेप्येतेषां संगे समाज्ञप्ताः ॥

ततश्च जन्नताशयान्यो जिल्कादहमासस्य त्रयोदश्यां तिथौ गुरुवासरे सुमुहूर्ते आगरातो निर्गत्य नगरात् क्रोशत्रयोपरि निवासं चक्रुः । ततश्च प्रतिदिनं निवासात् निवासान्तरं जग्मुः । प्रतिदिनं च जयशंसीनि चिह्नानि बहूनि प्रादुरासन् । ततश्च जाजमौग्रामे कटकबन्धं कृत्वा स्थितो यो नसीरखानामा विपक्षः स पञ्चदशक्रोशान्तरितेष्वेवैतेषु पलायनं चकार गङ्गामुत्तीर्य च खरीददेशमध्ये स्थितः । एतेपि खरीददेशाभि-मुखमेव प्रस्थिताः । तं च देशं वशे कृत्वा यवनपुरप्रदेशं जग्मुः । गत्वा च तं देशमाश्वासनादिभिः प्रभूतवसतिकं चक्रुः । अतिवृद्धबुद्धेस्तेजसा तरुणभाग्यशक्त्या च देशग्रहणसंरक्षणयोरावश्यककार्येषु परं यत्नमकुर्वन् परावृत्तिसमये च डालामौनिकटे फत्तेखांसरवानी हिंदुस्थानसेनाध्यक्षेषु योतिमहान् यस्य च पित्रा सुल्तांइबराहिमतः आजमहुमायूँपदवी प्राप्ता स्थिता स आगत्यैतेषां सेवामकरोत्* । एतैश्च सय्यिद-महदीखोजह-मुहम्मदसुल्तांमिर्जा – एतयोः संगे राजद्वारे प्रेषितः । ततश्च स महाभाग्य-शिरसा धावित्वा एतैर्दत्तानि सिरपाउ× इति प्रसिद्धानि वस्त्राणि परिदधाति स्म । पितुः मन्सिफ्* इति प्रसिद्धां संपदं लक्षषट्काधिककोटिटङ्ककांश्चाधिकान्[1] एतेभ्यः समवाप । स च यद्यपि पितुरेव पदवीमपेक्षमाणः स्थितः तथापि एतैः स खानिजहाँपदव्या सत्कृत्य वेतनार्थदत्तदेशं प्रति प्रस्थापितः । महमूदखाँ-नाम्ना च तत्सुतेन सर्वदा सेवायामवस्थान-

---

* The fol. No. 81 ends at कासिम, and एवमाज्ञप्तो is continued at the fol. No. 83.

* The fol. No. 83 ends at आगत्यैतेषां से, and वामकरोत् is continued at the fol. No. 82.

× "Robe of honour"—Beveridge.

* "Allowances"—Beveridge.

१. टंककांश्चाधिकान् ।

रूपं माहात्म्यं प्राप्तम् । ततश्च फिरदौसमकान्यस्तावत्पर्यन्तमागरायां सुखेन निवासमकुर्वन् यावत् नवशतोत्तरं त्रयस्त्रिंशत्तमे वर्षे मोहर्रममासे काबुल्देशादियं वार्त्ता समागता यत् हजरतिहुमायूं जननी पतिव्रता हजरतिमाहिमबेगिमनाम्नी भाग्यवन्तं पुत्रान्तरमजीजनत् । ततश्चैतैस्तस्य महम्मदफारूक इति नाम कृतम् । जन्म चास्य नवशतोत्तरं द्वात्रिंशत्तमे वर्षे शबाल्मासस्य त्रयोविंशतिमे दिने जातं स्थितम् । स च पितुः शुभावलोकनात् प्रागेव नवशतोत्तरं चतुस्त्रिंशत्तमे वर्षे सिद्धिमगमत् ॥

अथ या वार्त्ता अस्मिन् वर्षे प्रकटा जाताः हजरतिहुमायूंपातिशाहस्यागमनवार्त्ता राणासांगानाम्नश्च विपक्षतावार्त्ता एतत्सर्वं निरूप्यते ॥

सफरमासे चतुर्विंशत्यां तिथौ बुधवासरे जन्नताशयानीनामाकारणार्थमाज्ञापत्रं प्रेषितम्-यत् यवनपुरं सेनाध्यक्षान्तराधीनं कृत्वातिशीघ्रं* भवद्भिरस्मत्सेवार्थमागन्तव्यमिति । यत् राणासांगा बहुतरं सैन्यं गृहीत्वा अस्मदभिमुखमायातीति । पत्रनयनार्थं महम्मदअलीनामा मेहतरिहैदररिकाबदारपुत्रः प्रेषितः ॥

अस्मिन्नेव वर्षे निजामखांनामा बयानादेशाधिपः स अमीरसय्यिदरफीउद्दींसफबीवचसा एतेषां चरणकमलदर्शनमकरोत् बयानादुर्गं चैतेषां लोकाधीनमकरोत् । तातारखांनामापि ग्वालेरिनामकं दुर्गमुपायनीकृत्यैतत्सेवार्थमागतोभूत् । महम्मदजैतूँनामापि धवलपुरमेतेषां लोकानां समर्प्य सेवार्थमागतः । एतैश्च स्वस्वभक्त्यनुसारेण एतेषां स्नेहं पारितोषिकानि च प्राप्य निश्चिन्ततासादिता ॥

अस्मिन्नेव वर्षे रबिउल्अव्वल्मासस्य षोडश्यां तिथौ सुल्ताँइबराहिममात्रा बबर्ची इति प्रसिद्धपाकशालाध्यक्षद्वारा विषादिप्रयोगः कृतः । स निष्फलोभूत् । दुष्टाश्च स्वकर्मानुसारेण दण्डमलभन्त[१] ॥

जन्नताशयानीभिश्च प्रमाणाज्ञापत्रं शिरसि धृत्वा सय्यिदशाहमीरहुसेनं अमीरसुल्तांजुनैदबरलासं यवनपुराध्यक्षं कृत्वा काजीजीयाकं स्वयमेव वृद्धिं नीतम् एतत्साहाय्ये नियोज्य

---

*The fol. No. 82 ends at कृत्वाशी, and घ्रं भवद्भिः is continued at the fol. No 84.

१. दंडकलभन् ।

पितृचरणदर्शनार्थं प्रस्थानमकारि । शयेखवायजीदश्चायोध्यां प्रस्थापितः । स्वयं च आलमखाँनामा कालपीदेशाध्यक्षः स्थितः । तत्सम्बन्धिकार्यं साम्ना निग्रहेण वा संपादनीयमिति मनसिकृत्य कालपीसम्मुखं प्रस्थिताः । ततश्च दरप्रदर्शनेन संपत्प्रत्याशा-प्रदर्शनेन च तं सेवकमध्ये समानीय तं राजद्वारे आनीतवन्तः । रविअुस्सानीमासस्य तृतीयतिथौ रविवासरे आगरानगरीचेंच्यारिबागेतिप्रसिद्धे हश्तुभिस्तिसंज्ञके उद्याने आगत्य पितृचरणकमलदर्शनं कृतवन्तः । तस्मिन्नेव दिने काबुल्देशात् ख्वाजहदोस्तखावंद आजगाम ॥

एतेष्वेव दिनेषु सर्वदा बयानादुर्गाधिपः महदीख्वाजहनामा राणासांगानाम्नः युद्ध-सामग्रीसम्पादननिवेदकानि विज्ञप्तिपत्राणि प्रेषयामास ॥

(Chapter XIX)

अथ फिरदौसमकानीनां राणासांगाकेन समं युद्धवार्त्ता जयप्राप्तिवार्त्ता च कथ्यते ॥

यो भाग्यवान् बुद्धिमग्रेसरं कृत्वा तदनुसारेण व्यवहरति तस्य सकलमनोरथावाप्तिर्भवति। यथा लोकसम्भावितकार्यादाधिक्यं प्राप्य स्वधर्मस्य संपदां च स भाजनं भवति। अत्रार्थे च फिरदौसमकानीनां चरित्रं दृष्टान्तायते। यथा यथा एतेषां संपद् वृद्धिं प्राप्ता तथा तथा सावधानतापि वृद्धिं प्राप। मदसामग्र्यां भूयस्यां सत्यामपि सावधानताचन्द्रिका वर्द्धते स्म। सर्वदा च परमेश्वरचरणावेव शरणीकृत्य न्यायदानयोः राष्ट्रग्रहणतत्संरक्षणयोश्च कार्याणां यथोचितग्रथने रेखामात्रमप्यन्तरं न बभूव। एतस्मिन् समये राणासांगाकः स्वसैन्यबाहुल्येन गर्ववान् भूत्वा धृष्टः सन् एतेषां निकटे आगतः ॥

फिरदौसमकान्यश्च परमेश्वरकृपामेव दुर्गं विधाय तत्पराजयाय प्रचलिताः जमादुल्अवल्मासस्य नवमतिथौ सोमवासरे आगरातः प्रस्थाय निकटे एव निवासमकुर्वन्। वार्त्ताश्चैतादृश्य आयान्ति स्म – यत् विपक्षेण राणासांगाकेन बयानापार्श्ववर्त्तिनो ग्रामा लुण्टिताः। बयानादुर्गस्थाश्च स्वीयाः सैनिकाः केचन बहिर्निर्गत्य युद्धोपक्रमं कृतवन्तः। परन्तु स्थातुमशक्नुवन्तः पुनरपि दुर्गमध्ये प्रविष्टाः। एतन्मध्ये च संगरखाँजँजूहा मृत्युमुपगतः। अमीरकत्तबेगश्च प्रहारवान् अस्ति इत्यादिवार्त्ताः श्रुत्वा एते तस्मिन्नेव निवासे दिनचतुष्टयमतिबाहयांबभूवुः। पञ्चमे दिवसे ततो निर्गत्य मेढाखुरग्रामे आगराशिकरीमध्यवर्त्तिनि निवासं कृतवन्तः ॥

ततश्चैतेषां हृदि इदमागतं यत् एतावतोस्मत्सैन्यस्य पर्याप्तं जलं शिकरीतडागात् ऋते नास्ति। विपक्षश्च तन्मा गृह्णात्विति। अतो द्वितीयदिने शिकरीगमनमरोचयन्। अमीरदरवेश्महम्मदसारिवाँनामानं दौलतिखानानामसभामण्डपरूपपटगृहस्यावस्थापनार्थं स्थलमन्वेषयितुमग्रे प्रेषयांबभूवुः। तेन च शिकरीं गत्वा तत्रत्यातिविस्तीर्णसमुद्रसमतडागतटे निवासस्थलमकारि। एतेपि तत्र जग्मुः। ततश्च महदीखोजहस्य अन्येषां च बयानादुर्गस्थानामाकारणार्थं मनुष्यान् प्रेषयामासुः। जन्नताशयानीनां सेवकं बेगमीरकनामानम् अन्यमपि प्रियसेवकसमुदायं विपक्षकटकवृत्तान्ताभिज्ञानाय[1] प्रेषयन्ति स्म। ते गत्वा

---

१ वृत्तांतभिज्ञानाय।

प्रातरेवागत्य विज्ञप्तिमकुर्वन्—यत् विपक्षाः बुसावरग्रामात् एकं क्रोशमर्वागागतास्तिष्ठन्ति। स्वपरसैन्ययोश्चाष्टादशक्रोशमितमन्तरं तिष्ठति। अस्मिन्नेव दिने महदीखोजहनामा महम्मदसुल्तांमिर्जा तथान्येपि ये बयानामध्ये सेनाध्यक्षाः स्थितास्ते सर्वे आगत्यैतेषां सेवां चक्रुः। एतेषु दिनेषु करावल् इति प्रसिद्धयोर्नासीरगतबलयोर्युद्धानि जायमानानि स्थितानि। शूराश्च स्वशौर्यं प्रदर्शयामासुः सुरत्राणकृपाकटाक्षविषयाश्च बभूवुः ॥

नवशतोत्तरं त्रयस्त्रिंशत्तमे वर्षे जमादुलआखिरमासस्य त्रयोदश्यां तिथौ शनैश्चर-वासरे बयानापार्श्ववर्त्तिस्वानवाग्रामनिकटवर्त्तिपर्वतप्रदेशे एतत्कटकतः क्रोशद्वयोपरि राणा-सांगा बहुलसैन्यसमेत आजगाम ॥

फिरदौसमकानीभिः स्वकृताख्यायिकामध्ये इदं लिखितमस्ति - यत् हिंदुस्थानपरिपाटी एतादृशी वर्त्तते - यत् यत्र लक्षटङ्कका उत्पद्यन्ते सा भूः शताश्ववाराणाम्। यत्र च कोटिः सा दशसहस्राश्ववाराणाम्। राणासांगाकस्य च दशकोटिटङ्ककोत्पत्तिस्थलं भूरासीत्। अनेन क्रमेण तस्यैकलक्षमश्ववाराः स्थिताः। बहुभिरप्यन्यै राजभिः यैः कदाप्यस्य सेवा न कृता स्थिता तैः सर्वैरस्यां यात्रायां बहुतरं सैन्यमादायास्य साहाय्यार्थमागतमभूत्। तेषु च सलहदीनामा रायसेनिदुर्गाधिपः सारङ्गपुरस्यान्यस्यापि बहुतरस्य देशस्याधिपः एकसहस्राश्व-वाराणां भूमिं बिभ्रत् स्थितः। स उदयसिंहबाकरी द्वादशसहस्राश्ववारयुतः[1]। हसनखाँमेवाती मेवाताधिपः···द्वादशसहस्राश्ववारयुतः[1]। भारहमलईडरी सहस्रचतुष्टयाश्ववारयुतः। हाडानगर-पतिस्सप्तसहस्राश्ववारयुतः। सत्रोपिरिवच्वी जरहलाधिपः षट्सहस्राश्ववारयुतः। परमदेवः मेरठाधिपः सहस्रचतुष्टयाश्ववारयुतः। महमूदखाँनामा सुल्ताँसिकंदरपुत्रः। यद्यप्येतस्य वशे कोपि देशो न स्थितः तथापि पितृपितामहाः षातिशाहाः इति दशसहस्रमश्ववारान् धारयमाणाः स्थितः। एवं क्रमेण सर्वे विपक्षाश्ववाराः एकसहस्राधिकलक्षद्वयसंख्याः स्थिताः ॥

इमां च वार्त्तां श्रुत्वा फिरदौसमकान्यः सैन्यव्यूहमरचयन्। गोल इति प्रसिद्धे कटकमध्यप्रदेशे स्वयं[2] फिरदौसमकान्यः स्थिताः। गोलदक्षिणपार्श्वे चींतिमुरसुल्तां तथा मिर्जासिलेमा तथा खोजहदोस्तखाबन्दः तथा यूनुसअली तथा शाहम(न)सूरबरलासः तथा दरवेशमहम्मदसारिवाँ तथा अब्दुलाहकिताबदारः तथा दोस्तइश्किआगा — एते अन्येपि महान्तः सेनापतयो निर्णीताः। गोलवामप्रदेशे अल्लावदींनामा सुल्ताँबहलोललोदी-

1. In spite of such dots in the manuscript, there is no break in it.

१ द्वादस–। २ श्वयं।

पुत्रः तथा शयेखजैनूनामा खाफीग्रामीणः तथा अमीरमुहिब्बअलीनामा निजामुद्दींअलीखलीफह-पुत्रः तथा तुरुदीबेगः कोकबेगभ्राता तथा शेरफकन् कुत्बेगसुतः तथा आराइशखां तथा खोजहहुसेनः – एते अन्येपि केचन सेवकाः स्थिताः ॥

वरंगारसंज्ञके कटकदक्षिणपार्श्वे हजरतिजन्नताशयान्यः स्थिताः । एतेषां च दक्षिणपार्श्वे कासिमहुसेनसुल्तां तथा अहमदयूसुफ्अुगलाक्ची तथा हिंदूबेगःकौचीं तथा खुसरविकोकुल्ताशः तथा किवामबेगउर्दूशाहः तथा वलीखाजिन् तथा कराकोजी तथा फीरकुलीसीस्तानी तथा ख्वाजहपहलवान्बदख्शाँ तथा अब्दुश्शुकूर – एते अन्ये च शूरमध्यात् प्रस्थापिताः । एतेषां वामप्रदेशे मीरहमहनामा तथा महम्मदीकोकुल्ताश् तथा खाजिगीअसद्जांदारः – एते प्रस्थापिताः ॥

एतेषां च वरंगारे हिंदुस्थानसेनापतिमध्यात् खानखानातुल्याः दिलावरखां तथा मलीकदादकिरानी तथा शयेखघूरन्—एते सेवार्थमवस्थिताः ॥

एतेषां च जुंगारप्रदेशे महम्मदसुल्तांमिर्जा तथा आदिल्सुल्तां महदीसुल्ताँसुतः तथा अब्दुल्अजीज्मीराँखोरः तथा महम्मदअलीजिंगजिंगः तथा कुतुलुक्कदमकरावल् तथा शाहहुसेनःयारगी तथा जांबेगअतग्जहसंज्ञकः हिंदुस्थानसेनाध्यक्षमध्यात् जलालखाँ-कमालखाँ-नामानौ सुल्ताँअलावदीनूपुत्रौ तथा अलीखांशयेखजादहखुरुमली तथा निजामखांबयानाः – एते अन्येपि शूरेभ्यः सेवार्थमुद्युक्ताः । तुरदीकहः तथा मलीककासीमः बाबाकश्कहभ्राता तथान्यदपि मुद्गलयूथमेकं वरंगारप्रदेशे स्थापितम् । मोमिनअतग्गहः तथा रुस्तुमतुरुकमाँ तथा प्रियसेवकेभ्यश्चैकं यूथं जुंगारप्रदेशे प्रस्थापितम् । बंदूकचीतिप्रसिद्धाग्नेयास्त्रप्रयोक्तृसंरक्षणार्थं च रूमरीत्यनुसारेण रथान् शृङ्खलितान् कृत्वा समन्तात् स्थापयामासुः यान् आरावा इति यवना वदन्ति । एतत्कार्यसम्पादनार्थं च निजामुद्दींअलीखलीफहसंज्ञको निर्णीतः । सुल्ताँमुहम्मदबख्शी च पूर्वोक्तान् सर्वान् यथोचितस्थलेषु विनिवेश्य सुरत्राणाज्ञाश्रवणार्थं च समक्षसेवामकरोत् । तवाची* इति प्रसिद्धांश्च पदातीनितस्ततः कार्यार्थं प्रेषयित्वा सुरत्राणाज्ञां सेनापतिभ्यः श्रावयामास । यदा च महान्तः सेनापतयः कटकस्य स्तम्भतुल्याः स्वे स्वे स्थाने स्थितास्तदा एवमाज्ञा जाता — यत् अस्मदाज्ञाव्यतिरेकेण निर्दिष्टस्थलान्न चलितव्यमिति । प्रहरमात्रं च दिने जाते समरस्यारम्भो जातः ॥

---

* adjutants

वरंगार-जुंगार-संज्ञकयोः सैन्यदक्षिणवामभागयोः शूराणां परस्पराक्षेपेण भूमिः प्रचलिताभवत्। ततश्च विपक्षस्य जुंगारेतिप्रसिद्धवामभागस्थितैर्लोकैः फिरदौसमकानीनां वरंगारेतिप्रसिद्धसैन्यदक्षिणपार्श्वे निपत्य खुसरविकोकुलताशः तथा मलिककासिमो बाबाकश्कहभ्राता एतयोरुपरि भूयांसः प्रहाराः कृताः। ततश्च चींतैमुरुसुल्तांकः सुरत्राणाज्ञावशात् अनयोः साहाय्यार्थमधावत्। गत्वा च परमशौर्येण तान् सर्वान् पराजित्य विपक्षगोलनिकटे स्थापयामास। अयञ्च जयस्तन्नाम्ना प्रसिद्धोभवत्। मुस्तुफा-रुमी जन्नताशयानीनां गोलमध्यात् निर्गत्य रथानग्रे कृत्वा बंदूकसंज्ञकैर्हथनालसंज्ञकै-श्चाग्नेयास्त्रैर्विपक्षश्रेणीर्बभञ्ज येन शूराणां रणकण्डूनिकषोभवत्। बहवश्च विपक्षसैनिकाः प्राणान् जहुः। विपक्षसैन्यानि अन्यान्यन्यानि प्रतिक्षणमायान्ति स्म। ततः फिरदौसम-कान्योपि स्वसैन्यमध्यात् विचीय विचीय शूरान् प्रेषयामासुः स्वसैन्यसाहाय्यार्थम्॥

तत्र चैकदा कासिमहुसेनसुल्तॉं तथा अह्मदयूसुफ् तथा किवामबेगः अन्यदा च हिंदूबेगःकौची अन्यदा च मह्मदकोकुल्ताश् तथा ख्वाजगीअसद्—एते आज्ञप्ताः। तदनन्तरं युनूस्अली तथा शाहमनूसूरबरलासः तथा अब्दुल्लाहकिताबदारः—एते ततः पश्चात् दोस्तइश्किआगा तथा मुहम्मदखलील्अख्तबेगी—एतौ तेषां साहाय्यार्थं प्रेषितौ। विपक्षदक्षिणपार्श्ववर्त्तिभिः शूरैरेतेषां वामपार्श्ववर्त्तिलोकानामुपरि बहुधा निपतितम्। परन्तु एतेषां शूरैस्ते बहुधा शरैः तरवारिभिश्च छिन्नाः। ततश्च मोमिन्अतग्जहः तथा रुस्तम्तुरुक्मां—एतौ एतेषामाज्ञया शत्रुसैन्योपरि प्रचलितौ। तदनन्तरं च मुल्लामहमूदः तथा अलीअतग्जहबाश्लीकिः-एतौ खोजहखलीफहसेवकौ तयोः साहाय्यार्थं प्रस्थितौ। मुहम्मदसुल्तांमिर्जा तथा आदिल्सुल्तां तथा अब्दुल्अजीजमीराखोरः तथा कुतुलुक्-कदमकरावल् तथा मुहम्मदअलीजिंग्जिंग् तथा शाहहुसेनयारगीघुगुल्खाँजी—एते समरे निष्कम्पचरणाः स्थिताः। खोजहहुसेनः दीवानीति प्रसिद्धलोकयूथेन समं तेषां साहाय्यार्थं प्रस्थितः। फिरोजजंगस्य सर्वेपि बान्धवाः स्वप्राणत्यागे परप्राणग्रहणे च कृतसंकल्पाः परेषु रोषाग्निमुद्वमन्ति स्म॥

यदा च बहुकालपर्य्यन्तं शत्रुसैन्यमचलमेव स्थितं तदा फिरदौसमकानाभिरेवमाज्ञप्तं—यत् गोलस्य दक्षिणपार्श्वस्था वामपार्श्वस्थाश्च लोकाः शृङ्खलितरथपश्चाद्भागे शृङ्खलिता इवावस्थिताः पुरो निर्गत्य युद्ध्यन्त्विति। ततश्च बहवः शूराः शृङ्खलाछेदादिव व्याघ्रा

निषत्य निजशौर्यानुसारेण व्यवहरन्ति स्म । तरवारोणां चकाचकीतिशब्दान् शराणां च शपाशपीति शब्दान् गगने विस्तारयामासुः । नादिरुल्असूरअलीकुली-नामा स्वीयैर्लोकैः समं गोलस्याग्रेवस्थाय प्रस्तरप्रक्षेपेषु जरवजन्संज्ञकवंदूकसंज्ञकाग्नेयास्त्रप्रक्षेपेषु* चालस्यं न चकार ॥

अत्रान्तरे सुरत्राणाज्ञा जाता यत् श्रृङ्खलिता रथा आराबे† इति प्रसिद्धा अग्रे क्रियन्तामिति । ततश्च स्वयमपि विपक्षाभिमुखं प्रचलिताः । तांश्च प्रचलितान् दृष्ट्वा सर्वेपि सैनिका इतस्ततः प्रचेलुः । युगपदेव सर्वेपि एतदीयाः शूराः विपक्षसैन्ये निपेतुः । दिनप्रान्ते च महान् समरो बभूव येन विपक्षस्य वामदक्षिणपार्श्वस्थाः सर्वे लोकाः प्रपलाप्यैकत्रावस्थिता बभूवुः । ततश्च जीविते निराशा भूत्वा फिरदौसमकानीनां वामदक्षिणपार्श्वे निपेतुः । ततश्च पातिशाहीयाः शूरा जगदीशकृपाकटाक्षतस्तथा युयुधुः यथा रणभुवि विपक्षसैन्यचरणा न स्थिरा बभूवुः । ततश्चासमर्थतया सर्वे विपक्षसैनिकाः तत्स्थलं तत्यजुः । केचन निहताः ततश्चैतेषां सैन्ये सुखाः निशर्कराश्च[१] मरुतो ववुः । हसन्खाँमेवाती आग्नेयास्त्रेण निहतः । राउलउदयसिंघस्तथा गरसी तेन्येप्येतत्कटकस्था माणिकचंदचौहाणस्तथा रायचंद्रभानुस्तथा दलवतिरायस्तथा गंगू तथा कर्मसिंहस्तथा डोंगरसी – एतेन्येप्येतत्कटकस्था बहवो निहताः । अनेकसाहस्राश्च क्षतवन्तोश्वखुरपुटाहता रेणुतामगमन् । मुहम्मदीकोकुल्ताश् तथा अब्दुल्अजीज्मीराखोरः तथा अलीखाँ अन्येपि बहवः शूराः राणासांगाकस्य पृष्ठतोन्वगुः पातिशाहाज्ञातः ॥

ततश्च फिरदौसमकान्यः परमेश्वरस्य शुकुर्गुजारीसंज्ञकान्‡ शिरसा प्रणामान् कृत्वा क्रोशपर्यन्तं शत्रुकार्यान्निश्चिन्ता भूत्वा पातिशाहाः परावृत्ता बभूवुः कियत्यां च रजन्यामतीतायां शिविरं प्रापुः । परमेश्वरस्येदमभीष्टं न स्थितं – यत् राणासांगा एतद्धस्तगतो भवतु । तेन तत्पृष्ठप्रेषितेभ्यो लोकेभ्यस्तथा सावधानता न जाता । स्वयं फिरदौसमकान्यो वदन्तः स्थिताः— यत् स कालोतीवसूक्ष्मः स्थितः । इदमनुचितमस्माभिः कृतं यदिदं कार्यं परप्रत्याशया स्थापितं स्वयं च नानुष्ठितम् । अत्र स्वस्यैव गमनमुचितं

---

* Culverins and muskets.

१ निशर्कराश्च The sentence has been translated as—The breezes of victory and success blew on........."

† Carriages of the centre.

‡ Returned thanks and sublime blessings to Almighty God.

स्थितं यदा चेदृशो जयो निजोत्साहबलेन जातस्तदास्माभिः तत्पृष्ठतो धावनं नाचरितम् मेवातदेशग्रहणस्य चारम्भः कृतः। मुहम्मदअलीजिंगजिंगः तथा शयेखघूरण(:) तथा अब्दुल्मुल्ककोरची—एते बहुभिर्लोकैः समं म्यानदावस्थितस्य* इलियास्खांकस्य मेवातदेशे उच्छ्रायितशिरसः उपरि प्रेषिताः। तेन च कोल्नगरं गृहीतं स्थितम्। तन्नगराधिपश्च किचिक्अली बन्दीकृतः स्थितः। यदा चैतत्कटकं निकटे गतं तदा स तत्स्थलं त्यक्त्वा कियद्दूरं स्थितः यदा च फिरदौसमकान्यः आगरायामागतास्तदा तैस्स बद्ध्वा राजद्वारे आनीतो निहतश्च ॥

मेवातग्रहणस्य प्रतिज्ञाततया तदभिमुखं प्रस्थाय फिरदौसमकान्यो रजबमासस्य षष्ठ्यां तिथौ बुधवा(स)रे अल्बरनगरस्य मेवाताधिपावस्थानस्थलस्य निकटेवतीर्णाः अल्बर-नगरस्य मेवाताधिपावस्थानस्थलस्य निकटेवतीर्णाः। अल्बरनगरस्थिताश्च कोशाः जन्नताशयानीभ्यो दत्ताः। यदा च स देशो वशे जातस्तदा प्राच्यदेशग्रहणेच्छया पुनरागरामागन्तुं मनोकुर्वन् ॥

अथ जन्नताशयानीनां काबुल्देशं बदख्शांदेशं च प्रति गमनाज्ञा फिरदौसमकानीनां च आगरां प्रत्यागमनवार्त्ता च निरूप्यते ॥

एतेषां मनसि काबुल्बदख्शांदेशयोर्यथोचितसंनिवेशेनावस्थापनं इंतिजामेति-प्रसिद्धं सर्वदा स्थितम्। खाँमिर्जासंज्ञकाय यस्मै एतैः पूर्वं बदख्शांदेशो दत्तः स्थितः स नवशतोत्तरं सप्तदशे वर्षे मृत्योर्वशमागतः स्थित इति स सर्वोपि देशस्तदैव फिरदौसमकानीभिः जन्नताशयानीभ्यो दत्तः स्थितः। बहवो लोकाश्चैतदीयाः तस्यां सेवायाम् अवरुद्धाः स्थिताः इत्यत आवश्यकतया एतद्वर्षीयरजबमासस्य नवमतिथौ अल्बरनगरस्य त्रिक्रोश्याः जन्नताशयानीनां विदायः कृतः। तदानीमेव च स्वयं राणासांगायुद्धसमये बब्बन्नाम्ना प्रतिष्ठानेन लखणौतनामकनगरं निरुद्धं स्थितमित्य-तस्तदभिमुखं गमने मनोकारि। कासिमहुसेनसुल्तां तथा मलीककासिमः तथा बाबाकश्कहः तथा अबुल्मुहम्मदनेजबाज् तथा हुसेनखां तथा हिंदुस्थानीयसेनाध्यक्षेभ्यः अलीखाँफुरुमुली तथा मलीकदादकिर्रानी तथा तातारखां खानजहाँसुतः — एतान् मुहम्मदसुल्तांमिर्जासञ्ज्ञं कृत्वा अग्रे प्रेषयामासुः। स च विपर्यस्तभाग्यः सुरत्राणागमनवार्त्तां

* म्यानदावस्थितस्य—The relevant Persian word has been translated as "in the Dūabe"

श्रुत्वैव सर्वां स्वीयां सामग्रीं त्यक्त्वा प्रपलाय्य गतः। ततश्च फिरदौसमकान्य एतद्वर्षप्रान्ते फतेपुरं वारीग्रामं च दृष्ट्वा आगरामागताः। नवशतोत्तरं चतुस्त्रिंशत्तमे वर्षे कोल्नगरदर्शनार्थं प्रस्थाय ततः शंभलग्रामे मृगयार्थं गताः। ततश्चागरामाजग्मुः। सफरमासस्याष्टविंशत्यां तिथौ फख्रिजहांबेगिम् तथा खदीजहसुल्तांबेगिम् - एते- काबुल्देशादागते श्रुत्वा चैतदेतेपि नावमारुह्य प्रत्युद्गमनार्थमग्रे गताः॥

ततश्च वारंवारं चंदेरीदेशाधिपस्य मेदिनीरायस्य युद्धोद्योगं राणासाँगाकस्य च दुर्दैवग्रस्ततया पुनरपि युद्धसामग्रीसम्पादनं च श्रुत्वा चंदेरीसंमुखं प्रस्थिताः। षट् सप्त वा सहस्रं योधान् चिंतिमुरुसुल्तांनामकस्य सङ्गे दत्त्वा तं कालपीग्रामात् अग्रे प्रेषयामासुः। चंदेरीग्रहणार्थं जमादुल्अव्वल्मासस्य सप्तम्यां तिथौ बुधवासरप्रातःकाले चंदेरीनगरं जित्वा अह्मदशाहनाम्ने सुल्ताँनासीरुद्दींपौत्राय ददुः। एतन्मासस्यैकादश्यां तिथौ रविवासरे परावृत्त्यागताः। बहुभ्यो विश्वसनीयेभ्य* इदं श्रुतमस्ति यत् चंदेरीगमनात् पूर्वमेव राणासांगा पुनरपि सेनानिवेशमकरोत्। यदा च (स) एरजूनगरं प्राप्तः तदा तत्रत्याधिपेन आफाकनाम्ना तन्नगरमगम्यं कृतम्। ततश्च तन्नगरं तेनागत्य निरुद्धम्। ततश्चैकस्यां रात्रौ स्वप्नान्तरे केनचिन्महता राणाकस्य भयं प्रदर्शितम् येन स जाग्रदवस्थो भूत्वा कम्पमानो ज्वरव्याकुलो बभूव। तदवस्थः परावृत्य यमातिथिर्बभूव। यदा चैते बुरहाणपुरजलं पिबन्तः स्थिताः तदा वार्त्ता श्रुता - यत् मारूफः तथा बब्बन्नामा तथा बायजीदः — एते मिलिता भूत्वा सबलाः जाताः। येन स्वीया लोकाः कान्यकुब्जनगरं विमुच्य रपिण्डीं प्राप्ताः। शम्साबाददुर्गं च अबुलमुहम्मदनेजवाजसंज्ञकात् बलेन गृहीतमित्यादिभिः निमित्तैः तद्दिगभिमुखं परावृत्ताः। कियतश्च योधान् त्वरयाग्रे प्रेषयामासुः। ततश्चैतत्कटकस्यागमिकां दृष्ट्वैव कान्यकुब्जनगरवर्त्ती मारूफपुत्रः पलायितः। पातिशाहागमनवार्त्तां श्रुत्वा मारूफ-बब्बन्-बायजीदाख्याः त्रयोपि गङ्गामुत्तीर्य कान्यकुब्जसमकक्षतया पारे घट्टावरोधार्थमुपविष्टाः। एते चाविरामेण निवासान्निवासान्तरं गत्वा आगताः। नवशतोत्तरं पञ्चत्रिंशे वर्षे मुहर्रममासस्य तृतीयायां तिथौ शुक्रे मिर्जाअस्करीनामा यः काबुल्देशात् मुल्तानार्थं चंदेरीगमनात् पूर्वमेवाकारितः स्थितः स आगत्यैतच्चरणदर्शनमकरोत्। तन्मासस्यैव दशमतिथौ शुक्रवासरे ग्वालेरीं प्राप्ताः प्रातरेव च राज्ञो विक्रमादित्यस्य†

* The folio No. 95 Ends at विश्वस, and नियेभ्यः is continued at the fol. No. 219.

† The fol. No. 219 ends at राज्ञो वि, and क्रमादित्यस्य is continued at the fol. No. 96.

मानसिंहस्य च प्रासादान् दृष्ट्वा आगराभिमुखं चलिताः । तन्मासस्यैव पञ्चविंशत्यां तिथौ आगरां प्राप्ताः । ततश्च रबिउल्अवल्मासस्य दशम्यां तिथौ बदखशांतो जन्नताशयानीनां यादिगारतगइकस्य पुत्र्यां पुत्रो जात इति वार्त्ताहरस्समागतः । तस्य च पुत्रस्य अल्अमा[1] इति नाम धृतं स्थितम् । इदं च नाम नीचानां लोकानां जिह्वायामश्लीलभावं प्राप्तं स्वाज्ञाव्यतिरेकेण स्थापितमिति च निमित्तद्वयसमावेशेन फिरदौसमकानीनां सुखदं नाभूत् । पितुराज्ञापरिपालनं तन्मध्येप्येतादृशस्य तन्मध्येपि पातिशाहस्य आन्तरबाह्यभाग्यवत्तायाः फलं ददाति आज्ञाभङ्गश्च विपरीतं फलं ददाति इत्यतोस्य बालकस्य विनाशे एतदाज्ञाव्यतिरेक एव निदानमिति । सुबुद्धीनां नैतदगोचरेस्ति ॥

संक्षेपतः कथ्यते ॥

यदा आगरायामुपविष्टाः तदा फिरदौसमकान्यस्सर्वैस्सेनापतिभिस्समं महोत्सवसभामरचयन् । प्राच्यदेशग्रहणार्थं मन्त्रं तन्निष्कण्टकतार्थं च मन्त्रमकुर्वन् । ततश्च बहुधाविचारानन्तरं सुरत्राणगमनात् पूर्वमेव मिर्जाअस्करी बहुतरसैन्यं गृहीत्वा प्रतिष्ठतु इति मन्त्रो दृढो बभूव । गङ्गापारे ये स्वीयाः सेनापतयः तिष्ठन्ति ते सर्वे एतत्संगे तिष्ठन्तु । एवं निर्णयोत्तरं रबिउल्आखिरमासस्य सप्तम्यां तिथौ सोमवासरे मिर्जाअस्करी विदायमधिगम्य प्रतस्थे । फिरदौसमकान्यश्च मृगयाक्रीडार्थं धवलपुरप्रदेशं प्रति प्रतस्थुः ॥

---

1. The word is *Al-amān* that in Arabic "means peace" or "protection" also "the protected one, the trusty." But Bābar did not like the name because the people in general pronounce it *alaman* or *ilman*, and these words in Turkī have bad meanings, viz., *alman* is a plunderer or runner, and *ilman*, "I do not feel"....Besides the ambiguity mentioned above, he objected because it was unusual to place the article *al* thus before a name"—Beveridge, p. 269, footnote.

जमादुल्अव्वल्मासस्य तृतीयायां तिथौ इयं वार्त्तागता यत् महमूदेन सिकंदर-पुत्रेण बहारदेशं स्वहस्ते[1] संस्थाप्य द्वैतद्वन्द्वमुत्पादयितुं यत्नः क्रियते इति। ततश्च मृगयातः परावृत्त्य फिरदौसमकान्यः आगरामागताः। ततश्चायं निश्चयो बभूव—यत् स्वयमपि प्राच्यदेशं प्रति गन्तव्यमिति। ततश्च कासीद इति प्रसिद्धो वार्त्ताहरो बदख्शांतः समागतः—यत् हजरतिहूमायूषातिशाहः तत्रत्यं सर्वं सैन्यमेकीकृत्य सुल्तांवयसं च संगे कृत्वा चत्वारिंशत्सहस्रं पञ्चाशत्सहस्रं वा मनुष्यान् सह गृहीत्वा समरकंदगमनमनोरथवानिति। सामवार्त्ता च मध्ये तिष्ठतीति। तस्मिन्नेव क्षणे आज्ञापत्रमभूत्—यत्साम्ना (किं) कार्यं न भवति। तदा यावत् हिंदुस्थानकर्त्तव्यं सर्वं न निर्वहति तावत् यथाकथंचित् साम्नैव[2] निर्वाहः कर्त्तव्य इति। तत्रैव पत्रे इदमपि लिखितं स्थितम्—यत् मिर्जाहिंदाल्नामात्र प्रेषणीयः। काबुल्देशश्च कोशार्थं स्थापनीयः। वयमपि परमेश्वरकृपया हिंदुस्थानकार्यं निर्वाह्य विश्वसनीयान् सेनाध्यक्षानत्र संस्थाप्य पूर्वजदेशं प्रति चलिष्यामः। इदं चास्तु—यत् येस्मदीयास्तत्र सेनाध्यक्षास्तिष्ठन्ति ते सर्वे प्रस्थानसामग्रीं सम्पाद्यास्मदागमनं प्रतीक्षमाणाः सन्तु॥

ततश्च[3] एतस्यैव मासस्य सप्तदश्यां[4] तिथौ गुरुवासरे यमुनामुत्तीर्य प्राच्यदेशाभिमुखा बभूवुः। तस्मिन्नेव दिने बंगालाधिपस्य नुसरतिशाहस्य इल्ची इति प्रसिद्धा दूताः बहु उपायनमानीय तस्य सेवां प्रकटीचक्रुः। जमादुल्आखिरमासस्योनविंशत्यां तिथौ सोमवासरे मिर्जाअस्करी गङ्गातटे पितृचरणसरोजदर्शनमकरोत्। ततश्चैवमाज्ञा जाता-यत्—मिर्जा ससैन्यः गङ्गापारेणैव यातु। यदा च एते कडानगरं प्राप्तास्तदा वार्त्तागता-यत् सिकंदरपुत्रो महमूदो विशीर्णसैन्यो जात इति। ततश्च गाजीपुरं यावत् त्वरया गत्वा भोजपुरेवतेरुः। तत्रैव विहारदेशं मिर्जामुहम्मदजमानाम्ने ददुः। रमजान-मासस्य पञ्चमतिथौ सोमवासरे बंगालदेशात् विहारदेशाच्च मनो निश्चिन्तं कृत्वा वछन्–वायजीदयोः[5] पराजयार्थं सरुवारदेशं प्रति प्रतस्थुः। विपक्षाश्च सुरत्राणीयैः सैन्यैः समं युद्धं कृत्वा पलायनमकुर्वन्। ततश्च फिरदौसमकान्य खरीदसिकंदरपुरे दृष्ट्वातित्वरया आगरामागताः स्वल्पैरेव दिनैः॥

---

१ बहारदेशं से स्वहस्ते। २ साम्नैवानिवहि। ३ नमश्च। ४ सप्तदस्या। ५ बवन-बायजीदयोः इति साधीयान् पाठः।

जन्नताशयान्यश्चैकवर्षं यावत् बदख्शांमध्ये सुखेन स्थिताः अकस्मादेव च पितृचरण-दर्शनायोत्कण्ठिताः बभूवुः। ततश्च बदख्शांदेशं सुलतांवयसस्य मिर्जासुलेमाशुरस्याधीनं कृत्वा एतदभिमुखं प्रस्थिताः। प्रस्थाय चैकेन दिनेन काबुलनगरं प्राप्ताः। तदानीं च मिर्जाकामरा खंधारतः काबुलमागतः स्थितः ईदगाहेति प्रसिद्धे स्थलविशेषे एतन्मिलनम-करोत्। (स) विस्मितश्च भूत्वा प्रश्नं चकार -- यूयं किमिति हिंदुस्थानं प्रति चलिताः। ततश्चैते उत्तरं प्रयच्छन्ति स्म – यत् पितृचरणदर्शनोत्कण्ठा मामेतावत्पर्यन्तमानीतवती अग्रेपि नेष्यतीति। यद्यपि भावनावशादेव दूरतोपि तन्मुखचन्द्रं पश्यामि तथापि प्रत्यक्षदर्शनस्यान्य एव स्वादः -- इत्याद्युक्त्वा च काबुलतः मिर्जाहिंदालनामकं भ्रातरं बदख्शांदेशं प्रस्थापयामासुः। स्वयं च अत्युत्साहेन स्वल्पैरेव दिनैः आगरामागत्य पितृचरणदर्शनमकुर्वन्॥

अत्यद्भुतमिदं यत् तस्मिन् समये फिरदौसमकान्यः सिंहासनमध्यास्यैतन्मात्रा सममेतदीयामेव वार्त्तां कुर्वन्तः स्थिताः अकस्मादेवागत्यैते मिलिताः। पातिशाहानां हि सर्वाणि दिनानि ईदिदिनानीति प्रसिद्धानि उत्सवदिनानि। परन्तु तद्दिनं महोत्सवदिनानां सर्वेषामुपमानभूतं बभूव॥

काश्मीराधिपेन मिर्जाहैदरनाम्ना स्वकृताख्यायिकायां नवशतोत्तरं पञ्चविंशे वर्षे जन्नताशयानीनां हिंदुस्थानं प्रत्यागमनं फिरदौसमकानीनामाज्ञया जातमिति लिखितमस्ति फकरअलीनामानं बदख्शांमध्ये स्थापयित्वागता गता इति च लिखितमस्ति॥

तेष्वेव दिनेषु मिर्जाआलुरनामा फिरदौसमकानीनां पुत्रः परलोकं गतः स्थितः। ततश्च ते बहुदुःखिनः स्थिताः। एतेषां चागमनात्[1] तद् दुःखं दूरीचक्रुः। ततश्चैते बहुकाल-पर्यन्तं तेषां सेवामकुर्वन्। ते च एतेषु सख्यमिवाचरन्तः स्थिताः बहुवारं चैतद् वदन्तः स्थिताः - यत् हुमायूंसमः सखा कुत्रापि दृष्टो नास्ति इति। यदा च जन्नताशयान्यः बदख्शांतः हिंदुस्थानं प्रति चलिताः तदा काशगरदेशाधिपवंश्यः सुलतांसओदखानामा यद्यपि सुलतांवयसस्यान्येषां च बदखशांमध्यवर्त्तिनां सेनाध्यक्षाणामाकारणतः* दरयार-कंदमध्ये रसीदखानामानं स्थापयित्वा बदख्शांदेशं प्रति चचाल। तस्य चागमनात्

१. चागगनात्।

* The fol. No. 99 ends at सेनाध्यक्षाणामाकारणतः द, and रयारकंद is continued at the fol. No. 218.

पूर्वमेव मिर्जाहिंदालः जफरदुर्गमध्ये निविष्टः स्थितः । ततश्च स आगत्य मासत्रयं यावत् जफरदुर्गं रुरोध । अप्राप्य च तत् पुनर(र)पि काशगरमेव ययौ । फिरदौसमकानीभिश्च एतादृशी वार्ता प्राप्ता यत् काशगरीयैः बदख्शांदेशो गृहीत इति । ततश्चैतैः बदख्शांकार्यार्थं खोजखलीफहः समाज्ञप्तः । स चानभिज्ञतया न जगाम । ततश्च जन्नताशयान्यः उक्ताः-यत् भवन्तः स्वगमने कथं पश्यन्तीति । एतैश्च विज्ञप्तम् -- यत् मया युष्मच्चरणदर्शनवियोगानन्तरं बहु दुःखं प्राप्तमस्ति । ततश्चायं संकल्पः कृतोस्ति यत् स्वाधीनतायां सत्यां भवच्चरणवियोगं कदापि न करोमिति । युष्मदाज्ञायां च जातायां मम (आव)श्य(क)ता कापि नास्ति ॥

ततश्च मिर्जासुलेमा बदख्शांदेशं प्रति प्रस्थापितः । सुल्तांसओदं प्रति चेदृशमाज्ञापत्रं प्रेषितम्—यत् अस्माभिः कियन्त उपकाराः कृताः सन्ति । त्वत्तश्चेदृशं कर्म जातम् । तत् अत्याश्चर्यकरम्[1] । इदानीं चास्माभिः मिर्जाहिंदालः आकारितोस्ति । मिर्जासुलेमा प्रेषितोस्ति । त्वं चास्मदुपकारान् स्मृत्वा बदख्शांदेशम् अस्मत्पुत्रप्रायायास्मै प्रयच्छ । नोचेदिमं भारमस्माभिः स्वग्रीवातः दूरीकृत्य एतस्यैव पितृपैतामहं पदं एतस्मै दत्तमस्ति । अयं यथोचितं व्यवहरिष्यति । अग्रे च भवन्तो जानन्ति ॥

मिर्जासुलेमाकस्य बदख्शांदेशप्राप्तेः[2] पूर्वमेव तस्मिन्* देशे स्वाराज्यं जातं स्थितम् । यथा व्यवहितमेव मया कथितमस्ति । यदा च मिर्जासुलेमा बदख्शांदेशं प्राप्तः तदा मिर्जाहिंदालः पितुराज्ञावशात् तं देशं तस्मै दत्त्वा स्वयं हिंदुस्थानं प्रति आगतः । फिरदौसमकानीभिः कियत्कालानन्तरं जन्नताशयान्यः शंभलदेशं प्रति प्रस्थापिताः । एते च षण्मासपर्यन्तं सुखेन तत्र स्थिता भूत्वा एवमाज्ञापितवन्तः—यत् तान् ढिल्लीं प्रति आनयन्तु । ततश्च नौकामार्गेण[3] चात्रानयन्तु । समक्षमेव च वैद्या उपचरिष्यन्ति । ततश्च तेल्पेनैव कालेन नदीमार्गेण समागताः । बहुभिर्वैद्यैरुपचारः कृतः परन्तु पीडानिवृत्तिर्न जाता । ततश्च फिरदौसमकान्यो यमुनातटे एतेषां पीडानिवृत्तये मन्त्रमकुर्वन् । ततश्च मीरअबुल्बका विज्ञप्तिमकरोत्—यत् वृद्धेभ्यः एवं श्रुतमस्ति[4]—या पीडाभिषकप्रयोगात् न निवर्त्तते सा समीचीनानि प्रियाणि च वस्तूनि तच्छरीरं

१ अत्याश्चर्याकरं । २ देशप्राप्तः । ३ नोका । ४ शतमस्ति ।

* The fol. No. 218 ends at तस्मि, and न् देशे स्वराज्यं is continued at the fol. No. 210.

संस्पृश्य यदि दीयन्ते प्रियं[1] च ते तदा सर्वं[2] निवर्त्तेत इति। ततश्च सुरत्राणैराज्ञप्तम्— यत् हुमायोः निकटवर्त्ति[3] समीचीनं प्रियं च वस्तु किमपि नास्ति इति। अतोहमात्मानमेव तदुपरि भ्रामयित्वा दास्ये[4]। परमेश्वर इमां वार्त्तामनुमन्यताम् ॥

ततश्च खोजाखलीफहेन अन्यैश्च निकटवर्त्तिभिरिदं विज्ञप्तम् - यत् परमेश्वर-कृपावशत एव एते परमायुःपर्यन्तं सुखेन कालमतिवाहयिष्यन्ति। भवद्भिरीदृशी वार्त्ता किमित्युच्यते। वृद्धेभ्यश्चेदं श्रुतमस्ति यत् द्रव्यमध्ये* यदुत्कृष्टं तद्दातव्यमिति। अतः इबराहीमयुद्धे यः हीरकः प्राप्तः एतेभ्य एव च प्रीत्या दत्तोस्ति स एव दीयतामिति। पुनरपि तैराज्ञप्तम्[5]-यत् कुत्र द्रव्ये एतादृशं महत्त्वं यत् हुमायूंसमस्य पुत्रस्य प्रतिनिधीभवितुमर्हति। अतोहमात्मानमेवास्योपरि भ्रामयित्वा दास्ये। एतस्य भूयसी पीडा तिष्ठति। एतस्य व्याकुलतामहं द्रष्टुं न शक्नोमि – इत्युक्त्वा च एकान्ते परमेश्वरप्रार्थनां कृत्वा मदीयायुर्बलेनायं जीवतु – इत्याद्युक्त्वा वारत्रयमेतेषां समन्ताद् भ्रमणं चक्रुः। ततश्च स्वशरीरं भारवदिव दृष्ट्वा इयं प्रार्थना परमेश्वरेणानुमता इति ज्ञात्वा वदन्तिस्म। अयमुत्थापित उत्थापित इति। तत्कालमेव च फिरदौसमकानीनां ज्वरपीडाभवत्। जन्नताशयान्यश्च किंचिन्निवृत्तपीडा बभूवुः। स्वल्पैरेव दिनैश्चातिसमीचीना बभूवुः। प्रतिक्षणं च फिरदौसमकान्यो वर्द्धमानपीडा बभूवुः। स्वभावपरावृत्तिरभूत्। मरणचिह्नानि प्रादुरासन् ॥

ततश्च अरकानदौलति इति प्रसिद्धान्निकटवर्त्तिन आहूय सिंहासनोपरि तानुपवेशयामासुः। स्वयं च सिंहासननिकटे एव मूर्च्छिताः निपेतुः[6]। खोजाखलीफहः तथा कंबरअलीबेगः तुरदीबेगः तथा हिंदुबेगः – एतेन्ये च लोकास्तत्र स्थिताः। तत्समक्षं च फिरदौसमकानीभिः भूयस्यः शिक्षाः कृताः। ता यथा – न्यायः कर्त्तव्यः। दानं कर्त्तव्यम्। लोकेषु सामीचीन्येन व्यवहर्त्तव्यम्। परमेश्वरो येन समीचीनं मन्यते तथा यतनीयम्। प्रजापरिपालनं कर्त्तव्यम्। अपराधिनामप्यपराधाः क्षन्तव्या। कुत्रापि कार्ये[8] कस्यापि विश्वासो न कर्त्तव्यः। अनम्राणां च समूलघातमुत्खननं कर्त्तव्यम्। दुर्वृत्ता अपि दूरीकर्त्तव्याः। एतादृशानामन्येषां च बहूनां पदार्थानां

---

१ दीर्घं प्रियं च। २ सर्वा। ३ निकटपुत्र समी०। ४ दास्यो। ५ पुनरपिश्च तै— ६ निपेतु।

* The fol. No. 210 ends at द्रव्य, and मध्ये is continued at the fol. No. 100.

मार्गप्रदर्शनं कृतम् । अन्या च शिक्षा कृता यत् पीडनीया अपि भ्रातरः सर्वथा न पीडनीयाः । एतच्छिक्षात एव जन्नताशयानीभिर्भ्रातृभ्यो बहुदुःखे प्राप्तेपि तेभ्यो दुःखं न दत्तम् । इदं च सर्वमेतच्चरितादेव प्रकटं भविष्यति ॥

यदा च तेषां भूयसी पीडा जाता तदा मीरखलीफहेनेदमपेक्षितं यत् महदीखोजापि निर्बुद्धिः स्थितः इति इयं वार्त्ता तस्याभिरुचिता स्थिता । ततश्च सुबुद्धीनां वचनात् मीरहखलीफहः अस्या वार्त्तायाः निवृत्तोभवत् महदीखोजाकमपि न्यषेधयत्—यत्त्वया राजद्वारे न गन्तव्यमिति । घोषणापि कृता तस्य गृहे कोपि मा गच्छत्विति । परमेश्वर-कृपया राज्यं येषां स्थितं तैरेव प्राप्तम् ॥

नवशतोत्तरं सप्तत्रिंशे वर्षे जमादुलअव्वल्मासस्य षष्ठ्यां तिथौ यमुनातटे आगरायां स्वयंकृते[१] च्यारिबागेति प्रसिद्धे उद्याने फिरदौसमकान्यः परलोकमगमन् ॥

तेषां स्वरूपस्यासाधारणधर्माणां च पूर्णताः विस्तरतः कथयितुमशक्याः । विश्व-परिपालनस्याष्टौ निदानानि तेषु पूर्णानि स्थितानि । तानि च – महाभाग्यम् अन्यत्र दुर्लभ उत्साहः परराष्ट्रग्रहणशक्तिः स्वराष्ट्रसंरक्षणम् प्रभूततरावस्थानस्य[२] यत्नः विश्वसुखितासंकल्पः सैनिकानां संतोषणम् सैनिकानां तथावस्थापनं यथा ते परेषां दुःखं दातुं न शक्नुवन्ति इत्येतानि ॥

गुरुशिक्षासाध्यविद्यास्वपि पूर्णाः स्थिताः । गद्यपद्यरचनायां माहात्म्यमतीव स्थितं तथा तुरुकीभाषया गद्यपद्यरचनायामपि तुरुकीदीवाननामकः श्लोकमयः कविभिरस्पृष्टार्थः प्रबन्धोतिसमीचीनोस्ति । एकेनैव छन्दसा यमकेन च मुबय्यननामकोपि काव्यविशेष एतत्कृतः सकलमहाकविसुखदायी अस्ति । हजरतिखोजेअहरारकृतवालिदीयहनामकस्य जगदीशप्रतिपादकस्य ग्रन्थस्य श्लोका अपि एतैः कृतास्तिष्ठन्ति । जन्मप्रभृति स्वचरित-वर्णनं स्वयं कृतमस्ति तुरुकीभाषया । तल्लेखनं[३] च सर्वेषां पातिशाहानां दस्तरुल्अम-लाख्यरीतिप्रदर्शनरूपमस्ति । इदं च वाकिआति बाबुरी इति प्रसिद्धाख्यायिका श्रीमद-कब्बरशाहसमादेशात् अकबरशाहशाके चतुस्त्रिंशद्वर्षपरिगणिते बयरमखाँसुतेन मिर्जा-खाँकेन खानखाना इति प्रसिद्धेन पारसीभाषया कृतास्ति सर्वेषामर्थबोधनार्थम् । किञ्च ते पारसीभाषया संगीतशास्त्रमपि सम्यक्तया जानन्तः स्थिताः । अुरूजनामके एलिम

१ स्वयं कृते । २ प्रभूततरावस्था० । ३ तल्लिखनं ।

इति प्रसिद्धे शास्त्रे द्वित्राणि रिसाले प्रकरणानि कृतानि सन्ति। तस्मिन्नेव शास्त्रे विस्तरतश्चैकं पुस्तकं कृतमस्ति ॥

तेषां च चत्वारः पुत्राः स्थिताः। तत्र ज्येष्ठः सुतः नसीरुद्दींमुहम्मदहुमायू-पातिशाहः। ततः कामरामिर्जा अस्करीमिर्जा चतुर्थश्च हिंदाल्मिर्जा। तिस्रश्च कन्याः गुल्-रंगबेगिमनाम्नी गुल्चिहरहबेगिमनाम्नी गुल्बदन्बेगिमनाम्नो चेति तिस्रोपि एकमातृजन्याः ॥

महान्तो लोका एतत्सभोपवेष्टारः एते। तत्रैकः अमीरअबुल्बकानामा शास्त्रे युक्तिशास्त्रे चातिमहान् स्थितः। अपरश्च शयेखजैनसदरः शयेखजैनुद्दीरवाफीपौत्रः यः सर्वशास्त्रपारंगमः सर्वदा च तत्सहावस्थायी। जन्नताशयानीनां च समये उमराउ इति प्रसिद्धः सेनाध्यक्षोपि जातः स्थितः। अन्यश्च शयेखअबुल्वजूदफारिगीनामा शयेखजैनमातुलः सरसः कविः स्थितः। तथा सुल्तांमुहम्मदकोसहनामा कवित्वपरीक्षकः स्थितः। मीरअलीशेरनामा[1] मित्राणां मध्ये स्थितः तथा मुल्लाशहाबमुअम्माई यः कवित्वमध्ये हकीरी इति स्वनाम लिखन् स्थितः। अयमपि शास्त्रे कवित्वे चाति-महान् स्थितः। तथा मुल्लायूसुफीतवीवः यः खुरासान्देशात् पद्महस्त इति आनीतः। तथा सुर्खिबिदाईनामा तुरुकीभाषया पारसीभाषया च कवित्वं कुर्वन् स्थितः। तथा मुल्लाबकाईनामा येन फिरदौसमकानीनामाङ्कितः पद्यमयः प्रबन्धः कृतोस्ति। तथा खोजानिजामुद्दींअलीखलीफहनामा प्राचीनः अत्यन्तहितकर्त्ता अतिमाहात्म्यं प्राप्तश्च स्थितः। शास्त्रे विशेषतश्च वैद्यकेतिमहान् स्थितः। तथा मीरदरवेशमुहम्मदसार्वानामा यः† हजरतिखोजेअहरारस्य शिष्यः एतेभ्योपि माहात्म्यं प्राप्तः स्थितः। तथा खोअंदमीरः येन तारीखहबीबुस्सियरनामा तथा खुलासतुल्अखवाल्नामा तथा दस्तूरुल्बुजरानामा ग्रन्थः अन्येपि बहवो ग्रन्थाः कृतास्सन्ति। तथा खोजहकलांबेगः यो महान् सेनाध्यक्षः सभोपवेष्टा च स्थितः। तथा एतद्भ्राता किंचिक्खोजहनामा मुहरदारः विश्वासपात्रं स्थितः। तथा सुल्तांमुहम्मददुलदेनामा महद्भ्यः सेनापतिभ्यः स्थितः सभायोग्यश्च*।

एतेपि वर्णनीयचरिता यद्यपि तथापीमां वार्त्तां त्यक्त्वा जन्नताशयानीनां चरितं वर्ण्यते ॥

---

१ नाम्नः। १ हरीबुस्सियर।

† The fol. No. 103 ends at नामा यः, and हजरति खोजे··· is continued at the folio No. 105.

* The English translation reads:—Sulṭān Muḥammad Dūladāī, one of the great officers and of excellent morals.

(Chapter XX)

हजरतिजहांवानीजन्नताशयानीनसीरूद्दींमुहम्मदहुमायूंपातिशाहगाजी ॥

महतीनां सिद्धतानां प्रकटनस्थलं महाराजसिंहासनस्योन्नतिप्रदः देशप्रदः बहुराष्ट्रग्राहकश्च न्यायरीतिदार्ढ्यकर्त्ता दयादानयोर्निर्झरः नैर्मल्यवृष्टिमेघः दानसत्यप्रतिज्ञतयोः सिन्धुः सत्याङ्गीकर्त्ता वास्तवरूपपरिचेता प्रपञ्चबाहुल्येपि तत्रानासक्तमनाः पातिशाहोपि वस्तुगत्या योगी योग्यपि पातिशाहशब्दभाक् कर्मकर्मफलदार्ढ्योद्यानानां कर्त्ता बाह्याभ्यन्तरवसन्तवृक्षारोपणकर्त्ता दुष्करतपस्वितायां परोपकारमार्गेषु च यूनानदेशोद्भवाफलातूंसदृशः सप्तसमुद्ररत्नं भूतरत्ने प्रकाशः नसीरुद्दींमुहम्मदहुमायूंपातिशाहगाजीनामा । एतेषां च गुणवर्णनं स्वयं बृहस्पतिः सहस्रवदनो वा कर्त्तुमशक्त इति ततः तूर्ष्णींभूय तच्चरितं कथयिष्येते ॥

एतेषां जन्म नवशतोत्तरं त्रयोदशे वर्षे जिल्कायिदहमासस्य चतुर्थ्यां तिथौ भौमवासररात्रौ काबुल्दुर्गान्तर्दुर्गे उभयकुलानन्ददायिन्या हजरतिमाहिमबेगिमसंज्ञकायाः खुरासानदेशश्रेष्ठवंश्यायाः सुल्तांहुसेनमिर्जाकिन समं सुहृद्भावं धारयन्त्या जातमस्ति* । विश्वसनीयवचनेभ्य इदं श्रुतमस्ति[1]––यदेतस्या अपि वंशः शयेखजामादेव यथा हजरतिमरयम्मकान्याः । यदा च सुल्तांहुसेनमिर्जा परलोकं गतस्तत्सुताश्वासनाय च फिरदौसमकान्यो गतास्तदा एनामुद्वाह्यागताः ।

नवशतोत्तरं सप्तत्रिंशे वर्षे जमादुल्(अ)वलमासस्य नवमतिथौ आगरानगरे जन्न(ता)शयान्यः सिंहासनमलंचक्रुः । कदाचिच्च जन्नताशयान्यो जलक्रीडां कुर्वन्तः नौकोपरि मितं द्रव्यं लोकेभ्यो पारितोषिकं ददुः । एते च यदा जन्मतः प्रभृति चतुर्विंशे वर्षे सिंहासनमलंकुर्वन्तिस्म तावदेवैतेभ्यो माहात्म्यचिह्नानि साम्राज्यचिह्नानि[2] च बहूनि प्रकटीबभूवुः । तत्रेदं निदानम्––यत् अक्बरशाहरूपं तेजः अलंकुवामारभ्य सर्वान् पुरुषान् विमलीकुर्वत् जन्नताशयानीपर्यन्तं[3] प्रकटीभूतमिति जन्नताशयानीभिरपि तत्तेजः-

---

१ श्रुतं । २ ०जिह्वानि । ३ ० पर्यंतं ।

* The English translation reads :—
"related to Sultān Husain Mīrzā."

-प्रसादेनैव चक्रवर्त्तिता भूयान् प्रतापश्च लब्ध इति । एते च यद्यपि महामाहात्म्याः महाप्रतापाः बहूनि महान्ति कार्याणि कुर्वाणाः स्थितास्तथाप्यहंकारलेशवन्तोपि न स्थिताः । सर्वाणि शास्त्राणि जानन्त स्थिताः ॥

पितुराज्ञया यदादेशविभजनं चक्रुः तदा न्याय्यमेव चक्रुः—मिर्जाकामराकाय च काबुल्खंधारदेशावागतौ । शंभलदेशश्च मिर्जाअस्करीकाय । अलबरदेशश्च मिर्जाहिंदालाय । बदख्शांदेशश्च मिर्जासुलेमाकाय । सर्वे निकटवर्त्तिनः सेनाध्यक्षाश्च सन्तुष्टा कृताः । ये च दुरहंकृता यथा मुहम्मदजमा यः बदीअुज्जमापुत्रः सुल्ताहुसेनमिर्जापौत्रः फिरदौसमकानीनां सेवां कुर्वाणः स्थितः जन्नताशयानीनां च जामाता ते सर्वेपि सर्वभावेन तेषां सेवां चक्रुः । ततश्च जन्नताशयान्यः पञ्चषमासानन्तरं कालञ्जरदुर्गग्रहणाय प्रचलिताः । ततश्च कालाञ्जरं मासपर्यन्तं रुरुधुः । रुद्धे च तस्मिन् तत्रत्याधिपेन प्रेषितं द्वादशमणपरिमितं सुवर्णम् अन्यां च भूयसीं सामग्रीं गृहीत्वा तद् दुर्गं तस्मै ददुः । ततश्च चरणाद्रिं गत्वा तं रुरुधुः ॥

इदमविदितं कस्यापि नास्ति यदिदं दुर्गं सुल्तांइबराहिमाधीनं स्थितम् । तदीयश्च सारंगखानीजमालखां संरक्षणं कुर्वन् स्थितः । स च यदा पुत्रापराधेन सुल्तांइबराहिममरणानन्तरं मृतः तदा तस्य भार्यां लाडमलिकानाम्नीं[1] गुणवतीम् अतिसुन्दरीं च शेरशाहः निजावरोधे स्थापयामास । तेन सम्बन्धेन च[2] चरणाद्रिदुर्गं तेन प्राप्तं स्थितम् । ततश्च यदा एतैः चरणाद्रिदुर्गं रुद्धं तदा शेरशाहः निजपुत्रं जलालखांनामानं विश्वसनीयैः बहुभिः सेनापतिभिः समं दुर्गमध्ये स्थापयित्वा बहिरागतः । ततश्च दू(त)ान् प्रस्थापयामास । ततश्च (स)मयानुसारेण एतैः तद्वचसि अङ्गीकृते सति स निजतनयं अद्दुर्रसीदनामानम् एतत्सेवार्थं प्रेषयामास । पुत्रप्रेषणे चेदं बीजम्-यत्कथञ्चित् कालवञ्चनां कृत्वा स्वमाहात्म्यसामग्रीं संपादयामीति । ततश्च तत्पुत्रः सर्वदा एतत्सेवां चकार । यदा चैते सुल्तांबहादुरनिग्रहार्थं मालवदेशं[3] प्रति चलिताः तदा अब्दुर्रसीदः शेरसाहपुत्रः पलायनं चकार । नवशतोत्तरम् ऊनचत्वारिंशत्तमे वर्षे बब्बन्-वायजीदाभ्यां शिरः उत्थापितं श्रुत्वा एते पूर्वदिशं प्रति प्रचलिताः । ततश्च वायजीदो युद्धमध्ये निहतः । ततश्च तं देशं निष्कण्टकं कृत्वा सुल्तांजुनैदबरलासाय यवनपुरं तत्पार्श्ववर्त्तिनं च देशं दत्त्वा तं तत्रावस्थाप्य स्वयमागरामागताः ॥

---

१. ०नाम्नी । २. तेन च संवधेन च संवंधेन । ३. माजव० ।

यदा चैतेतिप्रसिद्धाः परराष्ट्रग्रहणे जाताः तदा सुल्तांबहादुरना(मा) गूर्जराधिपः नवशतोत्तरं चत्वारिंशत्तमे वर्षे प्रीतिपूर्वं बहूपायनं प्रेषयामास। एतैश्च तद्दूता(न् य)थोचितं संभाव्य कृपापत्रं च दत्त्वा प्रस्थापिताः। तस्मिन्नेव वर्षे दिल्लीनिकटे यमुनातटे दींपनाहनामकं नगरं निवेशयामासुः। ततश्च मुहम्मदजमामिर्जा तथा मुहम्मदसुल्तांमिर्जा उलुकबेगनामकपुत्रसहितो व्यूथ्यो बभूव। ततश्चैते स्वयमेव[1] तदुपरि प्रचलित्वा गङ्गातटे भोजपुरे निवासं चक्रुः। यादिगारनासीरमिर्जानामानं बहुना सैन्येन समं गङ्गामुत्तीर्य तेषामुपरि प्रस्थापयामासुः। स च तैः समं युद्धं कृत्वा जयं प्राप। मुहम्मदजमामिर्जा-मुहम्मदसुल्तांमिर्जा-वलीखूबमिर्जा-नामकास्त्रयः हस्ते पतिताः[2]। ततश्च मुहम्मदजमामिर्जाकं निगडब(न्धं) कृत्वा बयानादुर्गं प्रति प्रस्थापयामासुः। तयोश्च द्वयोः चक्षूरहिततां संपाद्य प्रतिष्ठाहानिः कृता। ततश्च मुहम्मदजमामिर्जा कृत्रिममाज्ञापत्रं प्रकाश्य बन्धनात् विमुच्य गुर्जरदेशे सुल्तांबहादुरनिकटे गतः॥

फिरदौसमकानीभिरनवकाशेनावशीकृतान् बहून् हिंदुस्थानदेशानेते वशे चक्रुः।

---

१. श्वयमेव। २. हस्तिपतिताः।

(Chapter XXI)

अथ मिर्जाकामराकस्य काबुलदेशात् पंचाबदेशागमनवार्त्ता ।

मिर्जाकामरा फिरदौसमकानीनां परलोकगमनवार्त्तां श्रुत्वा अत्युत्कण्ठितो भूत्वा खंधारदेशसंरक्षणं मिर्जाअस्करीकाधीनं कृत्वा स्वयं प्रचलितः किञ्चिज्जिघृक्षया । परमेश्वरो हि स्वयं यस्य शिरसि राज्यलक्ष्मीमुकुटं संस्थाप्य संरक्षणं करोति तस्य विद्विषः स्वयमेव निष्फलायासा भूत्वा विपरीतफलमपि प्राप्नुवन्ति । एवमनुश्रूयते – तेषु दिनेषु फिरदौदमकानीनामाज्ञया मीरयूनुसअली लाहोराधिकारी स्थितः । ततश्च मिर्जाकामरा कपटेन कराचहबेगाय क्रुद्धो भूत्वा दुरुक्तीर्वदतिस्म । ततश्च रात्रौ स एतत्सैन्यतः प्रपलाय्य लाहोरं प्राप्तः । ततश्च मीरयूनुसअली तदागमनेन तुष्टो भूत्वातं संमानयामास[1] तेन समं मित्रव्यवहारं च चकार । कराचहबेगश्च रन्ध्रान्वेषी भूत्वा कदाचिदेतेन निजसैनिकेषु देशे प्रस्थापितेषु रात्रौ पानगोष्ठ्यामेनं बबन्ध । दुर्गद्वाराणि च निजलोकाधीनानि कृत्वा मिर्जाकामराकमाह्वयत् । ततश्च सत्वरमागत्य[2] सुखेन तत्रावतस्थे । ततश्च मीरयूनुसअली – नामानं बन्धनात् विमुच्य वदतिस्म – यदि तवास्मत्सेवेच्छा तदास्माभिर्लाहोराधिकारः त्वदधीनः कृतोस्ति । स च तद्वचः अनादृत्य जन्नताशयानीसविधे[3] समाजगाम । मिर्जाकेन देशमध्ये स्वीयान् मनुष्यान् प्रस्थाप्य शतद्रूपर्यन्तं देशो वशे कृतः । ततश्च मिर्जा निजचातुर्यगर्वेण[3] विज्ञान् दूतान् प्रस्थाप्य स्वस्य सेवकतां च प्रकाश्य अयं देशो मयैव प्राप्तव्य इति विज्ञप्तिमकरोत् । एतैश्च दातृतया फिरदौसमकानीनां शिक्षया तस्य सेवकता-प्रकाशनेन च देशस्तस्यैव निकटे स्थापितः । काबुल् – खन्धारदेशयोः पंचाबदेशस्य च पत्रं कृत्वा तस्मै प्रस्थापयन्ति स्म । मिर्जा चासंभावितमेतत् दृष्ट्वा शुकुर्र् इति प्रसिद्धं प्रणामं कृत्वा बहून्युपायनानि विज्ञप्तिपत्राणि च प्रेषयामास । सर्वदा च प्रतिदिनं पत्राण्यु-पायनानि काव्यानि च प्रेषितवान् । एतेपि तं सर्वदा निजकृपाच्छायायां संस्थाप्य काव्य-करणफलोपदेशेन हिंसारफिरोजानामकं देशं तस्मै ददुः ॥

मिर्जापि सर्वदा एतदाज्ञामध्ये तस्थौ । खंधारदेशं च खोजहकलांबेगाय मिर्जा-अस्करीतः काबुलागमने हजारानामकेभ्यो लब्धपराजय इति विषादं मत्वा निष्काश्य ददौ ॥

---

१. तं सन्मानयामासं । २. सत्वर आगत्य । ३. गृर्वेण । ३. ० सविषे ।

(Chapter XXII)

अथ जन्नताशयानीनां बंगालदेशं प्रति प्रस्थानमन्तरा परावृत्त्यागमन-वार्त्ता च वर्ण्यते ॥

यदा चान्यतो निश्चिन्ता जातास्तदा बंगालग्रहणेच्छया पूर्वदिशं प्रति चलिताः। कालपीनगरीनिकटवर्त्तिहुनारनगरं यदा प्राप्तास्तदा एतैः श्रुतं[1] - यत् सुल्तांबहादुरेण चित्तौड-दुर्गं रुद्ध्वा तातारखांकेन च समं बहुसैन्यं दत्तमस्ति। स दुष्टान्तःकरणश्च[2] तिष्ठति इति। ततश्चैते नवशतोत्तरमेकचत्वारिंशत्तमे वर्षे शत्रुपराजयार्थं परावृत्ताः ॥

इदमविदितं कस्यापि नास्ति यत् सुल्तांबहादुरस्सर्वदा उच्चान्युड्डानानि कुर्वन् स्थितः। परन्तु गूर्जरदेशाधिपत्यात् पूर्वं यदा विरक्तः पर्य्यटन् स्थितः तदा फिरदौ-समकानीनां पाणिपथनगरे जातां सुल्तांइबराहिमेन समं युद्धवार्त्तां जानन् स्थित इति एतत्सैन्येन सह युद्धोत्साहवान् न स्थितः। इमां च वार्त्तां निजनिकटवर्त्तिभ्यो वारंवारं वदन् स्थितः। तातारखां च सर्वदागत्य तस्य प्रोत्साहनं कुर्वन् स्थितः निर्मर्यादतां सुकरां प्रदर्शयन् स्थितः। सुल्तांबहादुरो नैतदङ्गीचकार। इदं च सत्यमुवाच - यन्मया एतेषां युद्धानि बहूनि दृष्टानि सन्ति। गूर्जरदेशसैन्यमेतेषां प्रतिद्वन्द्वि भवितुं नार्हति। परन्तु यथा एतेषां सैन्यमाकर्षयितुं शक्यते तथा दानादिना यतिष्ये। ततश्च कोशानां द्वाराण्युद्घाट्य लोकेभ्यो बहु धनं ददौ। द्रष्टव्यमात्रं च सैन्यं दशसहस्रपरिमितं मिलितं स्थितम्। अत्रान्तरे मुहम्मदजमामिर्जायादिगारबेगतगाईनाम्नः[3] सेवकानां निजसंरक्षका-नामैकमत्येन कारागृहतो निर्गत्य गूर्जरदेशं प्रति जगाम। गूर्जराधिपेन सहायमपेक्ष-माणेन तदागमनं बहु मत्वा अत्यन्तादरेण तस्य मिलनं कृतम्। ततश्च जन्नताशयानी-भिस्तस्मै पत्रं प्रेषितम् - यदावयोः समयबन्धः तिष्ठति। यदि कश्चिदस्मत्सेवा विमुखो भूत्वा भवन्निकटे आयाति स बद्ध्वास्मन्निकटे प्रेषणीयः अथवा आत्मनो दूरीकृत्य देशान्निष्काश्यते। तदावयोरकेवाक्यताफलं विश्वमध्ये प्रकटं भविष्यति। ततश्च सुल्तांबहादुरेण संपन्मदेन प्रत्युत्तरं लिखितम् — यत् यदि कश्चित् महाकुलीनो महां-श्चास्मन्निकटे शरणार्थमायाति तस्मै यथोचितव्यवहारः क्रियते तदा आवयोः प्रीतिमध्ये

१ शृतं। २ दत्तमस्ति त दुष्टांतः। ३ नाम्नः।

वैगुण्यं किमपि नास्ति समयबन्धेपि कापि हानिर्नास्ति। यथा सुल्तांसिकंदरलोदी-सुल्तांमुजफ्फरयोर्भूयसी प्रीतिः स्थिता। सुल्तांसिकन्दरभ्राता सुल्तांअलाउद्दींनामा अन्ये च आगरा-टिल्लीतो बहवो राजवंश्याश्च सुल्तांमुजफ्फरनिकटे गतास्तेन च मनुष्य-धर्मानुरोधेन यथोचितं[1] संभाविताः। तयोः प्रीतिभङ्गश्च न जात इति। ततश्चैतैः पुनरपि आज्ञापत्रं प्रेषितम्—यत् प्रीतिस्थैर्यस्य समयबन्धस्थैर्यस्य चेदं चिह्नं येन स्वल्पोपि कलुषीभावस्तयोर्भवति तन्नानुष्ठीयते। इत्यतोस्मच्छिक्षां मनसि धृत्वा अवश्यं तमस्म-न्निकटे प्रेषयेति। अथवा तस्मै संपत्प्रदानेच्छां[2] त्यक्त्वा तं स्वस्माद् दूरीकुरु। स यत्र कुत्रापि यातु। अत्यद्भुतं चैतत् यत् सुल्तांअलाउद्दींकस्यागमनसाम्यमेतदागमनस्य दीयते। तदन्यत् इदं चान्यदेव किञ्चिदस्ति॥

ततश्च सुल्ताबहादुरेण दुर्म्मदेन कृत्वा सावधानतया प्रत्युत्तरं न लिखितम्। अत्रान्तरे तातारखां मन्दमतीनां प्रतारणायोग्यानि वचांसि सुल्तांबहादुरेण समं वदन्नेव स्थितः। पातिशाहदेशं प्रति स्वप्रेषणस्य यत्नं कुर्वन् स्थितः। इदं च वदन् स्थितः —यत्तेषां सैन्यं सुखमग्नं तिष्ठति। युद्धादिकं च दुःखि कार्यं (कुर्वत्) यच्च भवद्भिर्दृष्टं स्थितम्। तत्सैन्यमिदानीं नास्ति—इत्यादिकाश्च बह्व्यो वार्त्ताः तेन कृताः। येन तत्प्रेषणसामग्री सुल्तांबहादुरेण संपादिता। ततश्च सुल्तांबहादुरेण गूर्जरदेशस्थितं शतकोटिपरिमितं[3] द्रव्यं यत् टिल्लीदेशीयं चत्वारिंशत्कोटिपरिमितं भवति तत् रणथंवरदुर्गे प्रस्थापितं यत् तातारखांकैकमत्येन नवीनं सैन्यं संस्थापनीयमिति। तातारखांपिता सुल्तांअलाउद्दीं-नामा महता सैन्येन समं कालञ्जरप्रदेशं प्रति प्रस्थापितः यदेतस्य गमनेन तत्पार्श्ववर्त्तिनि प्रदेशे कोलाहलो महान् भवत्विति। बुरहानुलमुल्कश्च गूर्जरसैन्येन भूयसा समं नागोरिवर्त्मना पंचाबप्रदेशं प्रति प्रस्थापितः। ततश्च स्वसैन्यमपि पृथक् पृथक् कृतं येन विपक्षसैन्ये दरोत्पत्तिर्भवत्विति। सुबुद्धिभिश्च सुल्तांबहादुरं प्रति बहूक्तम्*—यत् सैन्यं विभज्य विभज्य देशे देशे न प्रस्थापनीयम्। किन्तु सर्वं मिलितमेव तिष्ठत्विति॥

परन्त्वयमुपदेशोस्य हृदि न स्थानमलभत[4]। महद्भिश्च बहुभिरेवमुक्तं यदस्माभिः भवत्सेवायां न स्थातव्यम्। यदि भवद्भिस्सैन्यं विभज्य प्रस्थाप्यत इति। तथापि

---

१ मनुष्यधर्मानुरोधिनयथोचितं। २ ०प्रदानेछा। ३ शतिकोटिपरिमितं। ४ स्थानभलभत।

* The following cancelled letters are found between वहादुरं and प्रतिः—तु अयमुपदेशोस्य हृदि न स्थानमलभत।

नैवत्तेनानुमतम् । अयमकिंचित्करोपि विचारो हृदये स्थापितः । यत् हिंदुस्थानसैन्यापत्यगर्वं धारयतां लोदीकानां समयबन्धभङ्गेन सुलतांकस्य कापि हानिर्नास्तीति । तातारखां च ढिल्लीप्रदेशं प्रति प्रस्थापितः । स्वयं च चितौडदुर्गग्रहणे मनः कृतम् — यत् दुर्गं ग्राह्यम् । लोदीनां साहाय्यं[1] च कर्त्तव्यमिति । इदं चाविदितं कस्यापि नास्ति यत् सुल्तांअलाऊद्दींकस्य नाम आलमखां इत्यस्ति । अयं च लोदीसिकंदरस्य भ्राता सुल्ताइबराहिमस्य च पितृव्योस्ति । अनेन च सिकंदरमरणानन्तरं सुल्तांइबराहिमेन समं वैरमारब्धं स्थितम् । सिंहनादनगरे च राज्यार्थं विवदमानः सुल्तांअलाउद्दीं इति स्वस्य नामाकरोत् । बहूंश्च प्रतिष्ठानान् संगे कृत्वा आगराभिमुखं[2] प्रस्थितः । ततश्च सुल्तांइबराहिमोपि युद्धसामग्रीं विधाय तदभिमुखं प्रतस्थे । होडिलनिकटे चोभौ सन्निहितौ बभूवतुः । ततश्च सुल्तांअलाउद्दी युद्धे स्वस्यासामर्थ्यं मत्वा रात्रौ तदुपरि पपात । तत्राप्यकृतकृत्यः परावृत्य ययौ । मनसि दौष्ट्येन काबुलदेशं जगाम । गत्वा च श्रीबाबुरुपातिशाहस्य सेवामकरोत् । इबराहिमयुद्धसमये च तेषां संगे स्थितः । तातारखां च गुर्जरप्रदेशे गतः । सुल्तांबहादुरेण परममादरं कृत्वा परां वृद्धिं नीतः । फिरदौसमकानीभिश्च हिंदुस्थानग्रहणानन्तरं सुलतांअलाउद्दींकः दुष्टं भावमुपलभ्य बदख्शादेशं प्रति प्रस्थापितः । ततश्च स जफरदुर्गात् सवदागरेति प्रसिद्धप्रतिष्ठानवणिक्सहाय्येन प्रपलाय्य प्रतिष्ठानस्थानं प्रति जगाम । ततोपि बलोंचस्थानं जगाम । ततोपि गूर्जरदेशं गतः ॥

दिङ्मात्रमेतत् ॥ प्रकृतमनुसरामः ॥

यदा च स्थले स्थले[3] सैन्यानि प्रस्थितानि तदा तातारखां कोशबलेन चत्त्वारिंशत्सहस्रपरिमितान् प्रतिष्ठानान् अन्यांश्चाश्ववारान् मेलयामास । किं बहुना बयानादुर्गं जग्राह[4] । ततश्च जन्नताशयानीभिः पूर्वं देशं प्रति प्रस्थितैर्यदेयं वार्त्ता प्राप्ता तदातित्वरया परावृत्यागरायामागतम् । आगत्य च मिर्जाअस्करी तथा मिर्जाहिंदालनामा तथा यादिगारनासिरमिर्जाः तथा कासिमहुसेन्सुल्तां तथा मीरफकूरअली तथा जाहिदबेगः तथा दोस्तबेगः एतेष्टादशसहस्राश्ववारैः समं तस्य जयाय प्रस्थापिताः । इदं चाज्ञप्तम् — यत् ढिल्लीं प्रति कृतगमनोद्योगमेतदतिमहत्सैन्यमस्माभिर्यदि जितं तदा

---

१ साहाय्यां । २ आगरान्मुखप्र० । ३ स्थले २ । ४ जिग्राह ।

सर्वाणि सैन्यान्यस्माभिर्जितान्येवेति । अतः एतस्यैव सैन्यस्य पराजये सर्वभावेन यत्नः[१] कर्त्तव्य इति । यदा चैतेषां सैन्यं तत्सैन्यस्य आराद् गतं तदा जातभयात् तत्सन्यात् प्रतिदिनमेकैकं शूरजातम् अपाचक्राम । एवंक्रमेणाल्पैरेव दिनैस्तत्सैन्ये सहस्रत्रयमश्ववारा अवशिष्टाः । ततश्चायं तातारखां अतियत्नेन बहुधनव्ययेन च सैन्यस्य संपाद्यत्वात्[२] गन्तुं योद्धुं च न शशाक । ततश्च मरणे कृतनिश्चयो भूत्वा मंद्राइलप्रदेशे युद्धायावतस्थे । यावच्छक्ति च युद्धं कृत्वा मृत्युवशो बभूव । उर्वरितं च सैन्यद्वयमतत्सैन्यशब्दमात्रेण दिशो भेजे भयातुरम् ॥

---

१ यत्नतः । २ संपादित्वात् ।

(Chapter XXIII)

अथ हज़रतिजन्नताशयान्यः प्रस्थाय गुर्जरदेशं गताः सुल्तांबहादुरेण च पराजयः प्राप्तः । स देशस्सर्वोऽप्येतद्वशे जात इति निरूप्यते ॥

सुल्तांबहादुरः सर्वदा उपायनानि विज्ञप्तिपत्राणि च प्रेषयन् स्थित इति तद्देशविषये एते निश्चिन्ताः स्थिताः । यदा च दुर्दैवग्रस्तः[1] स तां रीतिं तत्याज तदा एतैः तस्य वधो मनसि धृतः । ततश्चैते नवशतोत्तरमेकचत्वारिंशत्तमे च वर्षे[2] जमादुल्अव्वल्मासाद्यभागे गूर्जरदेशं प्रति प्रतस्थुः । यदा चैते रायसेनिदुर्गस्य समीपे गतास्तदा तद्दुर्गान्तर्वर्त्तिभिर्लोकैरुपायनानि[3] विज्ञप्तिपत्राणि च प्रेषितानि--यदिदं दुर्गं पातिशाहीयमेव तिष्ठति । वयमपि पातिशाहीया एव सुल्तांबहादुरे जिते एतद्दुर्गविषये किमपि कर्त्तव्यं नास्तीति । ततश्च गूर्जरदेशस्यावश्यग्राह्यतया तद्दुर्गग्रहणात् विरम्य मालवं* प्रस्थिताः । यदा च सारंगपुरं प्राप्तास्तदा कृतचिन्ता-दुर्गविरोधः† सुल्तांबहादुर एतदागमनवार्त्ताश्रवणेन जाग्रदवस्थ इव भूत्वा स्वीयैर्महद्भिः समं मन्त्रार्थमुपविवेश । तदानीं च केचिदेवमूचुः यत् – चित्तौडदुर्गग्रहणं सर्वदास्माकं सुकरमेव । एतदधिपोपि न किंचिदनि(ष्ट)माचरिष्यति[4] । हुमायूं पातिशाहश्चास्मदुपर्यागतोस्ति इत्यतस्तदुपरि गन्तव्यमिति । सदरखानामा अतिपण्डितोतिशूरश्चैवमूचे – यदस्माभिरेतत्कार्यमल्पावशेषं कृतमस्ति इत्यत एतत्कार्यं समाप्यैव गन्तव्यम् । वयं च हिंदूकानां जयार्थमागताः स्मः । स च पातिशाहो यवनस्तिष्ठति । नात्र विघ्नमाचरिष्यति । यदि कथंचिदाचरिष्यति तदैतत्कार्यं त्यक्त्वा तेन सममवश्यं योत्स्यामहे । तदास्मासु कोपि दोषारोपणं न करिष्यति । अयञ्च विचारः सुल्तांबहादुरस्य सन्तोषं ददौ । ततश्च सोतिनिर्बन्धेन तद्दुर्गग्रहणे परं यत्नमातिष्ठत्[5] । नवशतोत्तरमेकचत्वारिंशत्तमे वर्षे रमजानमासस्य तृतीयायां तिथौ तद् दुर्गं जग्राह । गृहीत्वा च तद् दुर्गम् उज्जयिनीस्थितानां जन्नताशयानीनामभिमुखं प्रतस्थे । जन्नताशयान्योपि तदागमनवार्त्ताश्रवणेन त्वरया प्रस्थाय तदभिमुखं जग्मुः । ततश्च मालवदेश्यमंदसूरनगरे समुद्रसमतडागस्यैकस्मिंस्तटे एतेषां सैन्यमवततार । अपरतटे च तस्य सैन्यमवतीर्णम् । ततश्च नासीरगतयोर्बलयोर्युद्ध-

---

१ ०ग्रहस्तः । २ व वर्णे । ३ तदुर्गगति० । ४ ०धियोपि......माचरेति । ५ ०तिष्ठन् ।

* The fol. No. 115 ends at मालवं, and प्रस्थिताः is continued at the fol. No. 34.

† कृतदुर्गविरोधचिन्तः will perhaps be a better reading,

मवर्त्तत। एतेषां च नासीरो[१] बिचकबहादुरः अन्यश्चैकः सार्थः स्थितः। नासीरबलस्य हि रावल्-- इति प्रसिद्धिः। सुल्ताबहादुरस्य च हिरावल* इति प्रसिद्धे नासीरबले सय्यिद-अलीखा तथा मिर्जामुकीमः यस्मै तेन खुरासानखांपदवी दत्ता स्थिता एतौ स्थितौ[२]। एवं च (रावल्)हिरावल् इति प्रसिद्धयोर्बलयोर्बहुतरं युद्धमवर्त्तत। ततश्च शत्रोर्हिरावल्-संज्ञकं बलं भग्नं भूत्वा पलायनं चकार। सुल्तांबहादुरश्चैतत् श्रुत्वा[३] परं विषादमगमत्। ततश्च ताजखांसदरखांभ्यामुक्तम्—यत् सम्प्रत्येवास्माकं सैन्यं दुर्गं जित्वा गतमस्ति। सर्वथाभावेन तेन समं योत्स्यते। शैथिल्यं न कर्त्तव्यम्। सर्वथेदानीमेव प्रस्थातव्यम्। विषादश्च न कर्त्तव्य इति। रूमीखां यस्य वशे आग्नेयास्त्रसमुदायः तोबखाना इति प्रसिद्धः स्थितः तेन अन्यैश्च बहुभिर्लोकैस्सुल्तांकेन सममुक्तम्--यदस्माकं संगे बहुन्याग्नेयास्त्राणि सन्ति। किमित्यस्माभिर्निकटे गत्वा युद्धं कर्त्तव्यम्—अपि तु दूरादेवाग्नेयास्त्राणि प्रयोक्तव्यानीति। किंच आरावे इति प्रसिद्धा आग्नेयास्त्ररथास्समन्तात् सज्जाः क्रियन्ताम्। तत्परतश्च परिखा कार्या। दूरादाग्नेयास्त्रप्रयोगैरेव परसैन्यं क्षीणं भविष्यति। शरयुद्धं खड्गयुद्धं च स्वस्थाने वर्त्तत एव। इदमेव स्थिरीकृत्य प्रतिदिनं युयुधुः। परन्तु गूर्जरा एव भग्नाः जायन्ते स्म॥

किञ्च—एतेषां वर्द्धमानलक्ष्मीचिह्नमिदम्—यत् एकस्मिन् दिवसे स्वीयशूरैः[४] सुरापानसभा रचिता। तत्र च प्रायः शतद्वयपरिमिताः शूरा पीत्वा मत्ताश्च भूत्वा भूयसीः शौर्यवार्त्ताश्चक्रुः। तत्र चैको बहुमत्तो वदति स्म-यदास्तामतीतकथया। इदानीमेव शत्रवः सन्निहिताः सन्ति[५]। यस्य शौर्यं तत्प्रकटं भविष्यतीत्युक्त्वा सर्वे समुत्थाय युद्धार्थं निर्ययुः। गूर्जराणां च कश्चित्सेनाध्यक्षः सहस्रचतुष्टयाश्ववारयुतः परिखातो बहिर्निर्गत्य सैन्यरक्षार्थमागतः स्थितः। तेन समं ते युद्धं कचाकचि चक्रुः। ततश्च गूर्जराः प्रपलाय्य स्वसैन्यमध्ये आगताः। तेपि कृतकृत्याः स्वशिविरं ययुः। इमां च वार्त्तां श्रुत्वा सुल्तांबहादुरः परं विषादमगमत्। तद्दिनावधि केपि गूर्जराः परिखातो बहिर्न निर्यान्ति स्म। एतेषां च सैन्यानि इतस्ततो गत्वा तेषामन्नागमनमार्गान् रुरुधुः। ततश्च तत्कटके बहु दुर्भिक्षं जातम्। ततश्च शव्वाल्मासस्य प्रथमतिथौ ईदिदिनमिति प्रसिद्धे मुहम्मदजमामिर्जा पञ्चशतैरश्ववारैः समं परिखातो बहिर्निययौ। ततश्चैतेषामपि

---

* The fol. No. 34 ends at च हि, and रावल is continued at the fol. No. 116.

१ नासीरे। २ स्थिता। ३ शत्वा। ४ स्वीयः शूरैः। ५ सन्निहिताः ति।

बहु सैन्यं[1] गत्वा तेन समं युद्धं चकार । गूर्जराः द्वित्रान् वारान् कियतः शरान् प्रक्षिप्य कपटेन पलायांबभूवुः । यावता एतेषां सैन्यमाग्नेयास्त्रसन्निहितं भवति । ततश्च सन्निहिते एतेषां सैन्ये गूर्जराः आग्नेयास्त्रप्रयोगं चक्रुः । तेन च बहवो लोका निहताः । ततश्च जन्नताशयानीभिरिदमाज्ञप्तम् – यत् इतः सप्तदशे दिने सुमुहूर्त्तः समीचीनोस्ति । तत्र परसैन्योपरि निपत्य युद्धमवश्यं कर्त्तव्यम् । अत्रान्तरे गूर्जरसैन्ये प्रतिदिनं भूयान् दर आविवेश । दुर्भिक्षेण[2] दारिद्र्यं चाविवेश । ततश्च श(ब्बा)ल्मासस्य[3] एकविंशतिमे दिने सुल्तांबहादुरेण दुर्दैवेनेदमुक्तम् – यत् सर्वाणि आग्नेयास्त्राणि औषधैः पूरयित्वा मुच्यन्ताम् । ततश्च तथाकृते सर्वाणि तानि स्फुटन्ति स्म । ततश्च सन्ध्यासमये सुल्तांबहादुरः मीरांमुहम्मदशाहेन पञ्चषैर्निकटवर्त्तिभिश्च समं पटप्राकारस्याद्वारेणैव निर्गत्य आगराभिमुखो भूत्वा यत्कोपि मां मा जानात्विति मण्डपाचलं[1]जगाम । ततश्च सदरखां-इमादुल्लक-नामानौ द्वौ यौ खासखेल् इति प्रसिद्धौ निकटवर्त्तिनौ विंशतिसहस्राश्ववारयुतौ ऋजुमार्गेण मण्डपाचलं जग्मतुः । मुहम्मदजमा च कियद्भिर्लोकैस्समं लाहोरप्रदेशाभिमुखो जगाम । तस्मिन् दिने गूर्जरसैन्ये महत्कोलाहल उदतिष्ठत् । तद्वृत्तान्तश्च कोपि जन्नताशयानीनां न विदितो बभूव । ततश्चैते सन्ध्यामारभ्य त्रिंशत्सहस्राश्ववारैः समं ससन्नाहा एवावातिष्ठन्त । (आश्चर्यकरं च) जयमाशसन्तो बभूवुः । ततश्च प्रहरमात्रे याते दिने वार्त्ता बु(बु)धुः – यत् सुल्तांबहादुरो मण्डपाचलप्रदेशं प्रति प्रपलाय्य गत इति । ततश्चैतेषां शूरैस्तत्सैन्यं लुण्टितम् । तत्र च खुदावंदखानामा सुल्तांबहादुरगुरुः सुल्तांमुजफ्फरस्य च सर्वाध्यक्षः स हस्तगतो बभूव । ततश्च स जन्नताशयानीभिः परमादरेण यथोचितं सत्कृत्य संस्थापितः । यादिगारनासिर् मिर्जा तथा कासिम्सुल्तां तथा मीरहिंदूबेगः-एते महता सैन्येन सहिताः पलायमानसैन्यस्य पश्चात् प्रस्थापिताः[4] ॥

एवमेव ये मन्दमतिसार्थे उपविशन्ति तेषां दिनानि असमीचीनानि आयान्ति ॥

संक्षेपतः पलायमानानां वार्त्ता निरूप्यते ॥

सदरखाँ इमादरमल्लकश्च ततः प्रस्थाय मण्डपाचलदुर्गं प्राप्तौ । जन्नताशयान्योपि स्वसैन्यस्य पश्चादेव नालिसाग्रामं प्राप्ताः दुर्गं(स)मन्तादवतीर्णाः । ततश्च रुमीखां विपक्षसैन्यात्प्रपलाय्यैतेषां सैन्यं प्रत्यागतः । चतुर्दशे च दिवसे सुल्तांबहादुरो बहून्

---

१ सैन्ये । २ दुर्भिक्षेण । ३ शब्दाल० । ४ प्रस्थापितः ।

1 It is Maṇḍū in the trans. but Māṇḍū is the more correct reading.

मार्गान् भ्रान्त्वा चोलीमहेश्वरद्वारपथा[1] मण्डलाचलोपर्यागतः। ततश्चैव सामादिकं चकार – यत् अचिरप्राप्तं चितौडदुर्गं गूर्जरदेशश्च मह्यमस्तु । मण्डपाचल-दुर्गमेतत्पार्श्ववर्ती देशश्च जन्नताशयानीभ्योस्तु । मुल्लामुहम्मदपरगलीकी जन्नताशयानी-दिशि तथा सदरखां च सुल्ताबहादुरदिशि । एवमुभावुपविश्यैवं निर्णीतं चक्रतुः । तस्यामेव किंचिदवशेषायां रजन्यां दुर्गरक्षकेषु श्रान्तेषु सत्सु एतेषां प्रायः शतद्वयपरि-मिताश्ववारा निःश्रेणीभिः तथा रज्जुभिश्च दुर्गोपरि समारुह्य परस्तादवतीर्य तत्कपाटमुद्घाट्य तेनैव यथा स्वस्वान् मध्ये नयन्ति स्म । अन्येपि बहवः शूरास्तेन पथा मध्ये गताः । ततश्च कादिरशाह इति यस्मै पदवी दत्ता स्थिता मण्डपाचलीयो मल्लूखानामा यः मोरचल् इति प्रसिद्धस्य तस्य प्रदेशस्य रक्षकाध्यक्षः तस्मै इयं वार्त्ता प्रविष्टा जाता । ततः स विश्वावित्वा सुल्तानिकटे गतः । सुल्तां च सुखशयित एतच्छब्दश्रवणेन बहिरागत्य तदवस्थ एव त्रिचतुरैर्मनुष्यैस्समं पलायनं चकार । मार्गे च भूपतिरायो यः सलहदीपुत्रस्तस्य च सभ्य(:) स विंशत्यश्ववारैः समं पश्चादागत्य तस्य मिलनं चकार । ततश्च स यदा मैदानदरवाजानिकटे प्रविष्टो जातस्तदा पातिशाहीयाः प्रायः शतद्वयमश्ववाराः तेन समं मिलिताः । ततश्च स प्रथमं युद्धोद्योगवान् भूत्वा कथंचित्तेषु विशीर्णेषु लब्धान्तरो भूत्वा मल्लूखाकेन अन्यैश्च द्वित्रैः समं बहिर्निर्ययौ । ततश्च सोनगिरेरुपर्यागत्य रज्जुभिर्बद्ध्वा कथंचिदश्वानवतार्य स्वयमपि दुःखेनावत्तीर्य गूर्जरदेशं प्रति प्रतस्थौ । तस्यैव दुर्गस्य निकटे कासिमहुसेनखानामा तिष्ठन् स्थितः । तस्य च निकटे बोरीनामा उजबखः स्थितः यः सुल्तांसेवां विमुच्य एतत्सेवां कुर्वन् स्थितः । तेन च स प्रतिबोधितः – यदयं सुल्तांबहादुरो गच्छतीति । परन्तु कासिमहुसेनखांकेनेदं श्रुतमश्रुतं[2] कृतम् - यत्स्थलान्तरं चेत् सर्वथा समीचीनम् । स शत्रुश्च राजा मन्त्रिभोग्यो भवतीति च बीजद्वयेन । एवं च सुल्तां यावता चांपानेरिदुर्गं प्रति प्राप्तस्तावता सार्द्धसहस्रमश्वा-वारास्तस्य निकटे जाताः । ततश्च तद्दुर्गमध्यस्थितं कोशं समीचीनानि च वस्तूनि च दीबानामके बंदर इति प्रसिद्धे स्थलविशेषे प्रेषयामास ॥

इत्येवं जाते एतेषां जयो विस्तरेण कश्चिद् वर्ण्यते ॥

यदा च रात्रिशेषे पातिशाहीयाः शूरा दुर्गान्तःप्रविष्टास्तदा प्रातःपर्यन्तमियं वार्त्ता

१ द्वारप'''पथा । २ श्रुतमश्रुतं ।

बहिः केनापि न श्रुता[1] । घटिकाद्वयं च दिने जाते इयं वार्त्ता जन्नताशयानीभिः श्रुता[1] । सत्वरं च ढिल्लीद्वारेण मध्ये प्रविष्टाः । सदरखा च स्वगृहद्वारि युद्धं कुर्वन्नेव स्थितः । यदा च स बहुधा क्षतोपि युद्ध्यन्नेव स्थितस्तदा तदीयैर्लोकैः[2] बल्गायां गृहीत्वा सोनगिरि-प्रदेशं नीतः । बहवश्च लोकाः तेन समं गताः । सुल्तांआलमनामापि तत्रैव गतः । सर्वे च तत्र गत्वा गृहीतदुर्गा बभूवुः । दिनत्रयं च तन्नगरं लुण्टितम् । ततश्च पातिशाहेन लोका लुण्टनात् निवारिताः । ततश्च विश्वासयोग्या मनुष्या सदरखां-सुल्तां-आलमयोर्निकटे प्रस्थापिताः । तैश्च तौ बहुधा विश्वासं प्रापय्य पातिशाहनिकटे[3] आनीतौ । ततश्च बहुधा कृतविकारः सुलताआलमस्तत्पादयो(ः) सविधे शिरश्छेदं कृत्वा विमुक्तः । सदरखां च प्रसादेनागृहीतः । जये जाते दिनत्रयानन्तरं दुर्गादवतीर्य दशसहस्राश्ववारै-स्सममतित्वरया गूर्जरप्रदेशं प्रचलिताः । कटकं च शनैःशनैरायात्विति समाज्ञापितम् ॥

यदा चैते चांपानेरिदुर्गं प्राप्तास्तदा पीपलीदरवाजानामकद्वारनिकटे क्रोशत्रयपरिधि-मति इमादुल्मुलुकस्य तडागनिकटे स्वसैन्यस्य तरतीवतं सन्निवेशमकुर्वन् । यदा च (सु)ल्तांबहादुरेणेयं वार्त्ता श्रुता[1] तदा दुर्गस्य दार्ढ्यं[4] चकार । शकरतलाब इति प्रसिद्ध-तडागनिकटवर्त्तिद्वारेण निर्गत्य च खंभाइतप्रदेशं जगाम । तन्नगरे च अग्निं दापयामास । जन्नताशयान्यश्च तन्नगरमध्ये आगत्य अग्निनिर्वापणस्याज्ञां विधाय अमीरहिंदूबेगं कियद्भि-र्लोकैस्समं तत्र संस्थाप्य स्वयं सहस्राश्ववारैस्सममतित्वरया[5] सुल्तांबहादुरस्य पृष्ठतोन्वगुः[6] । सुल्ता च खंभाइतं प्राप्य दीपप्रदेशाभिमुखो[7] बभूव । गुराव इति प्रसिद्धाश्च शतं नौकाः याः फिरंगीदेशग्रहणार्थं रचिताः स्थिताः ताः ज्वालयामास यत् एते ता आरुह्य पृष्ठतो मानुगच्छन्त्विति । यस्मिन्नेव दिने सः दीपप्रदेशाभिमुखो जातस्तस्यैव दिनस्यान्ते जन्नताशयान्यः खंभाइतमागताः । ततश्च तस्य पृष्ठतो लोकान् प्रस्थापयामासुः । यदा च सुल्तां द्वीपान्तः प्रविष्टस्तदा एतदीयाः शूरास्ततः प्रदेशात् बहुधनं गृहीत्वा परावृत्य खंभाइतमागताः । परमेश्वरकृपाकटाक्षेण नवशतोत्तरं द्विचत्वारिंशत्तमे वर्षे गूर्जरदेशमण्डपा-चलयोर्जयो जातः । परमेश्वरपरायणतायाः समीचीनः संकल्पः चिह्नं भवति । तेन सूचिता यस्य परमेश्वरपरायणता तस्य सर्वे मनोरथाः पूर्णाः भवन्ति ॥

अस्मिन्नेव वर्षे शाबानमासस्य प्रथमतिथौ मिर्जाकामरा खंधारदेशं गतः । ततश्च शाह(त)मासृयभ्रात्रा साममिर्जाकेन सह युद्धं कृत्वा तं जितवान् ॥

१ श्रुता । २ तदीयेर्लोकै० । ३ निवटे । ४. दाढ्यं । ५. अतित्वरया । ६ पृष्ठतोन्वयुः । ७ ०मुखौ ।

अत्रायं संक्षेपः ॥

साममिर्जा भूयोभिर्लोकैस्समं खंधारमाजगाम। खोजहकलबेगेन च खंधारदुर्गं दृढं कृत्वाष्टौ मासान् संरक्षितम्। अत्रान्तरे मिर्जाकामरा समीचीनकटकेन समं लाहोरात् खंधारं प्राप्तः। ततश्च मिर्जाकामरासाममिर्जाकयोर्युद्धं बभूव। अगजेवारखां यो महान् सेनाध्यक्षः साममिर्जाकस्य सकलकार्यकर्त्ता अतालिक इति प्रसिद्धः स युद्धे जीवन्नेव धृत्वा निहतः। बहवश्चान्येपि तदीयलोकाः निहताः। एवं जयं लब्ध्वा मिर्जाकामरा पुनरपि लाहोरमागतः। मिर्जामुहम्मदजमाकस्यापि जातः कोलाहलः शान्तोभवत् ॥

इदं मया पूर्वं लिखितमस्ति — यत्सुल्ताबहादुरस्य पलायनसमये[1] मिर्जामुहम्मदजमा दुर्वासनया लाहोरं प्रतस्थे। यदा च सिन्धुपर्यन्तमागतस्तदा शाहबेगः अरगूंसुतः सिन्धुदेशाधिकारी शाहहुसेननामा तस्मै स्थलं न ददौ उक्तवांश्च — यत् लाहोरदेशोतिसम्पन्नः। खंधारव्यसनेन मिर्जाकामरा तं परित्यज्य तत्र गतोस्ति। इत्यतः स देशः शून्योस्ति। त्वं तत्र गच्छेति। ततः स तद्वचसा ततो निर्गत्य लाहोरदुर्गमरुणत्। अत्रान्तरे मिर्जाकामरा तत आगतः। आगते च तस्मिन् मिर्जामुहम्मदजमा अतिव्याकुलो भूत्वा मार्गान्तरमपश्यन् गूर्जरदेशमेवागात् ॥

अस्मिन्नेव वर्षे मिर्जाहैदरकुरगां काशगरदेशात् बदख्शामार्गेण[2] लाहोरमागतो मिर्जाकामराकमपश्यत्। वसन्तान्तरे च शाहतहमास्यः स्वयमेव खंधारमाजगाम[3]। ततश्च खोजहकलांबेगः कारखाना इति प्रसिद्धानि सर्वाणि स्थलानि मुद्रितानि कृत्वा तत्कुञ्चिकाः दुर्गकुञ्चिकाश्च[4] शाहनिकटे प्रेषयामास। इदं च संदिदेश -- यत् दुर्गसंरक्षणे मम सामर्थ्यं नास्ति। न वा युद्धकरणे सामर्थ्यमस्ति। यदि च भवच्चरणदर्शनं क्रियते तदापि स्वामिलवणभोजनस्योचितं न भवति। अतो गृहं परिष्कृत्यातिथये समर्प्य स्वयमेकान्तेवस्थानमतिसमीचीनमस्ति — इति संदिश्य स्वयं टट्टामार्गेण उच्चमार्गेण च लाहोरमागतः। मिर्जाकामराकेण च मासपर्यन्तं तस्य प्रणामो निषिद्धः यत् मदागमनपर्यन्तं दुर्गरक्षणं कर्त्तुमशक्तस्त्वमिति। ततश्च मिर्जाकामरा गमनसामग्रीं सम्पाद्य द्वितीयवारं खंधारं गतः। लाहोरे च मिर्जाहैदरकुरगा संस्थापितः। शाहतहमास्यश्च एतत्प्रस्थानात्पूर्वमेव बुदाखां कुचारसंज्ञकं खंधाराधिकारिणं कृत्वा गतः स्थितः। ततश्च मिर्जाकामरा खंधारदुर्गं

१, ० सूय। २ ०देशान् वदख्शागार्गेण। ३ खंधाभ्रर०। ४ दुर्गं कुंचिका०।

रुरोध । रुद्धे च तस्मिन् बुदाखां जीवाभयं प्रार्थयित्वा प्रपलाय्य गतः । ततो मिर्जा दुर्गदार्ढ्यं विधाय लाहोरमाजगाम ॥

प्रकृतमनुसरामः ॥

जन्नताशयान्योल्परिवाराः खंभाइतमागताः स्थिता इति मलिकअह्मदलाडः तथा रुक्कदाउदः एतौ कोलीवारा इति प्रसिद्धभिल्लदेशनिकटे स्थितौ सुल्तांबहादुरस्य च महान्तौ सेनाध्यक्षौ स्थितौ भिल्लान् अन्यांश्च ग्रामीणान् पुरस्कृत्य मन्त्रं चक्रतुः – यत् शत्रवोल्परिवारा इति समीचीनः समयोस्ति इति गत्वा रात्रौ एतदुपरि निपतितव्यमिति । इदं च विचार्य निर्णीतवन्तौ । वर्द्धमानलक्ष्म्या इदं महच्चिह्नमस्ति – यत् इमां वार्तामेका काचिद् वृद्धा बुद्ध्वा पातिशाहशिविरनिकटे आगत्य कंचित् निकटवर्त्तिनमूचे – यदेका आवश्यकी काचिद्वार्तास्ति पातिशाहसमक्षं मया वक्तव्येति । यदा चातिनिर्बन्धेनापि परोक्षं नोवाच तदा तेन सवादिनीति च निर्णीय पातिशाहसमक्षं कृता । ततः सा सर्वं प्रोवाच । ततश्च पातिशाहस्तामुवाच – तव मनसि अस्मद्धितवार्त्ता कथमागतेति । ततः सा उवाच – यत् मम पुत्रो भवल्लोकमध्ये केनचिद् बन्दीकृतोस्ति । इमां च भवत्सेवां विधाय तं मोचयिष्यामीति । यदि च मया मिथ्योक्तं भविष्यति तदा सपुत्राहं शासनार्हेति । ततश्च पातिशाहाज्ञया तत्पुत्रो गवेषयित्वानीतः । सपुत्रायाश्च तस्या रक्षार्थं जनानादिश्य सावधाना भूत्वा युद्धसामग्रीं विधाय स्वयमेकान्तेवस्थिताः । ततश्च रात्रिशेषे पञ्चसहस्रं भिल्ला ग्रामीणाश्च पातिशाहीयशिविरोपरि निपत्य लुण्टितवन्तः । जन्नताशयान्यश्च स्वलोकयुताः कस्मिंश्चिदुच्चप्रदेशेवस्थिताः स्थिताः । जन्नताशयान्यो यानि पुस्तकानि सर्वदा स्वसंगे स्थापितवन्तस्तानि सर्वाणि लुण्टितानि येषां मध्यात् तिमुरनामापुस्तकमेकं मुल्लासुल्तांअलीहस्ताक्षरेण यत्र च चित्रम् अुस्ता(द्)बिहजादेन कृतमस्ति तत् शाहनिंशाहीकस्य पुस्तकमध्ये तिष्ठति ॥

प्रकृतमनुसरामः ॥

स्वल्पेनैव कालेन तेषां शूरैः शरवर्षेण शत्रवः पराङ्मुखीकृताः । सा च वृद्धा स्वापेक्षितमलभत[1] । ततश्चातिरोषेण पातिशाहैराज्ञप्तं यत् – खंभाइतनगरं लुण्टनीयमिति । ततश्च सुल्तांबहादुरोस्मत्पृष्ठतोनुयास्यतीति मनस्यकृत्वैव चांपानेरिंमगमन् । मासचतुष्टयं तद्दुर्गमवरुद्ध्य स्थिताः । इखतियारखांनामा यः तद्देश्यनरपादनगरस्थ-काजीप्रसिद्धयवनधर्मा-

१. ०मलभत् ।

धिकारिपुत्रः सुल्ताबहादुरस्य परमविश्वासपात्रं विज्ञश्च। तेन दुर्गरक्षणे भूयान् यत्नः कृतः। यत्र पदातिरपि गन्तुं न शक्नोति किमुताश्ववारः तादृशेन कण्टकवृक्षसंकुलेन मार्गेण दारुच्छेदकास्तद्विक्रेतारश्च स्वलाभार्थमन्नं[1] घृतं च विक्रेतुं नयन्ति स्म। दुर्गोपरिस्थाश्च लोकाः शिक्यद्वारा द्रव्यं प्रेषयित्वा अन्नमुपरि जगृहुः[2]। दुर्गावरोधे कृते कदाचित्[3] जहावान्यः क्रीडार्थं कटकस्योपरिगमनाय[4] मार्गदर्शनार्थं च ययुः। ततश्च कस्मिंश्चित् हलोलनामकोद्यानमार्गेण गत्वा कस्मिंश्चित् प्रदेशेवस्थिताः पातिशाहा घृतमन्नं च विक्रीणन्तं दारुविक्रेतृसार्थमपश्यन्। ततश्चैतैराज्ञप्तं यत् एते के इति[5] निश्चेतव्यमिति। ततो निश्चीयमाने तैरुक्तम्—वयं काष्ठविक्रेतार इति। यदा च तेषां पार्श्वे काष्ठच्छेदविक्रयसामग्री कापि न दृष्टा तदाज्ञप्तं यावदेते सत्यं न वदन्ति तावन्न मोक्तव्या इति। ततश्च तैः सर्वं यथार्थमेव निवेदितं यत् वयं घृतमन्नं चोपरितनलोकहस्ते विक्रीणीम इति। ततश्चाज्ञप्तं – यदेतेग्रे कर्त्तव्याः तत्स्थलं यथा प्रदर्शयेयुरिति। ततश्च तैः तस्मिन् स्थले प्रदर्शिते जन्नताशयान्योत्युच्चं स्थलं षष्टिः सप्ततिर्वा गजेतिप्रसिद्धपरिमाणेन संमितमतिऋजुकं दृष्टवन्तः। ततश्च तदाज्ञया लोहकीलकान् सप्ततिरशीतिर्वानीय गजपरिमितदेशोपरि वामतो दक्षिणतश्च निचख्नुः। ततश्च (तै)राज्ञप्तम्[6] -- यत् अनेन वर्त्मना भवन्तोत्युच्चमेनं प्रदेशमारुहन्त्विति। ऊनचत्वारिंशन्मनुष्येषु तेन वर्त्मना रूढेषु जन्नताशयानोनां मनस्यागतं यत् स्वयमप्युपरि गन्तव्यमिति। ततश्च बयरमखांकेनोक्तं यत् तावत्पर्यन्तं कालप्रतीक्षा कर्त्तव्या यावदेते उपरि गच्छन्तीति[7]। एवमुक्त्वा च बयरमखां स्वयमग्रे बभूव। ततश्च हजरतिजन्नताशयान्योपि तमनुययुः। एवमुपर्यारूढमनुष्येषु जन्नताशयान्यः एकचत्वारिंशत्तमाः। ततश्च स्वयमुपरि स्थित्वा प्रायः शतत्रयमिताः शूराः उपरि गृहीताः। इदं चाज्ञप्तं यदस्मत्सैन्यं मोचलेतिप्रसिद्धस्थलस्थितदुर्गग्रहणाय परं[8] यत्नमातिष्ठत्विति। दुर्गान्तर्वर्तिनश्च लोका एतेषामुपर्यारोहणवार्त्तायामसावधाना बहिर्वर्त्तिभिर्लोकैस्सममयुध्यन्त। ततश्चैते शतत्रयं युवानो बाणैर्दुर्गान्तर्वर्त्तिनो लोकान् विमुखान् चक्रुः। ततश्च जन्नताशयानोनां स्वयमुपर्यागमनवार्त्तां श्रुत्वा[9] शत्रवो बिलेषु विविशुः। जयभेरीरवश्च महान् बभूव। इखतियारखां च स्वस्थानात् उच्चशिखरमारूढः सन् बन्दिग्राहं गृहीतः। अपरदिने च

१. अन्नघृतं। २. जगृहुं कालं च दुर्गा०। ३. कदाजित्। ४. गमनाय मार्गमन्नं च विक्रीणन्तं दारुविक्रेतृसार्थमपश्यत्। ततश्चैतैराज्ञप्तं—यत् एते के इति निश्चेतव्यमिति। ततो निश्चीयमाने तैरुक्तम्—वयं रिगमनाय''' । ५. इति निश्चैतैराज्ञप्तं यत् एते इति। ६. ततश्चरा आज्ञप्रयत्। ७. गछतीति। ८. ०स्थितं०। ९. शत्वा।

लोकेभ्योभयं दत्त्वा[1] इख्तियारखा आकारितः। स च राज्यचर्चायां शास्त्रेषु चातिप्रवीणः स्थितः। पण्डितसभायां च स्वनिकटे उपवेशनार्थमाज्ञां तस्मै दत्तवन्तः। निकटवर्त्तिमध्य-गणनायां च विषयो जातः॥

गुर्जरदेशश्च महींद्रीनदीपर्यन्तमेतेषां हस्ते जातः। पारे च कस्याप्यधिकारो न स्थितः। तदा तद्देश्यैर्लोकैः सुल्तांबहादुर उक्त्वा प्रेषितः—यदत्र कोप्यधिकारी नास्ति। करग्रहणस्य च समयस्तिष्ठति। यदि कश्चिन्मनुष्यः प्रेष्यते तदा तस्य निकटेस्माभिः करो देय इति। सुल्तांबहादुरेण च यस्मै इयं वार्त्ता उक्ता तेन मौनमेवास्थितम्। ततश्च इमादुल्मुलुकेनेयं वा प्रार्थिता[2]--अनया रीत्या यत्प्रयोजनानुसारेण यावान्देशो यस्मै कस्मैचिन्मया दीयते तत्र प्रष्टव्यं किमपि नेति। इत्युक्त्वा च इमादुल्मुलुकः शतद्वयाश्ववारैः समम् अहम्मदाबादनगराभिमुखं चलितः। मार्गे च विज्ञातेभ्यो लोकेभ्यः समीचीनः देशं ददत् स्थितः[3]। यदा च अहम्मदाबादं प्राप्तः तदा सहस्रदशकमश्ववारा मिलिताः। अश्वद्वयायुतलक्षं गुजरातीद्रव्यं ददौ। अल्पेनैव कालेन त्रिंशत्सहस्रमश्ववारा मिलिताः। मुजाहिदखांनामा जूनागढस्याधिकारी दशसहस्रमश्ववारानादाय तन्मिलनं चकार। तेषु च दिनेषु जन्नताशयान्यः चांपानेरिदुर्गं जित्वा दिने दिने सुखसभारचनं कृत्वा स्थितवन्तः। हौजडौरियेतिप्रसिद्धस्थलनिकटे सर्वदा सुखसभामेव रचयित्वा स्थिताः। राज्यकरणवार्त्तासु इयं वार्त्तातिसमीचीनास्ति यन्निकटवर्त्तिषु परिपाटीनिबन्धः कृत्वा दातव्य इति। समाजे समाजे च कश्चिदध्यक्षः सुबुद्धिः कश्चिद्मध्यस्थः[4] कर्त्तव्यः यद्बुद्ध्या ते सर्वे व्यवहरन्ते। किं च यदा पातिशाहः स्वयं लोकव्यवहारमपश्यन् एकान्तेवतिष्ठेत तदा कृतसमा-जाध्यक्षविश्वासमात्रेण न व्यवहरेदपि तु तत्र तत्र चारान्निवेश्य तद्द्वारा सकलं व्यवहारं जानीयात्। यदि च पातिशाहो नैवं कुर्यात् तदा निकटवर्त्तिनो दुरहंकृता अभिमान-ग्रस्ताश्च दुष्टानि कर्माणि समाचरेयुः। यथात्रैव समये प्रकृतसमीचीनं जातमस्ति। तद्यथा--यदा च तद् दुर्गस्य तद्देशादेर्जयोत्तरं पातिशाहाः सुखसभारचनरसाविष्टा जातास्तदा तेषां निकटवर्त्तिनः किताबदार—सिलहदार—दवातिदारप्रमुखाः एवमन्येपि ये ते सर्वे ऐकमत्येन सकलरामणीयकनिधौ नानाविधकुसुममनोहरे हालोलनामकोद्याने पानभूमिं रचयित्वा सुरापानार्थं प्रीतिमकुर्वन्। ततश्च ते सर्वे सुरां पिबन्तः जफरनामाख्यपुस्तकं

---

१. दत्वा। २. ०नेयं वा प्रा०। ३. ददन्स्थितः। ४. कश्चिदमध्यक्षः।

* The fol. No. 127. breaks at कृतसमा, and जाध्यक्ष० is continued at the folio No 128, bound after the folio numbered as 130 in the MS.

पठन्तश्च स्थिताः। तत्रापि साहिबकिरानीनां प्राथमिकदिनचरित्राणि वाचयन्तः स्थिताः। तद्यथा – कदाचित् साहिबकिरान्यः चत्वारिंशन्मनुष्यपरिवृताः स्थिताः। तेभ्यश्च प्रत्येकं शरौ द्वौ गृहीत्वा तेषां हस्ते प्रत्येकं तान् शरान् मिलितान् दृढं बद्ध्वा दत्तवन्तः यदेतान् भञ्जतेति। ते च भङ्गं कर्तुं न शक्ताः। पुनश्च द्वौ द्वौ शरौ दत्त्वा उक्तवन्तः – यदेतौ भञ्जतेति[1]। तैश्च तौ भग्नौ। ततश्चोक्तवन्तः – यदेतन्निदर्शनेन संहतानां जये कोपि न शक्तः। असंहतानां च जयः सुकर इति। एवं वयमपि चत्वारिंशन्मनुष्या यद्येकवाक्यतया व्यवहरामस्तदा परेषामजेयास्सकलदेशग्रहणे समर्थाश्च भवामः। एवमुक्त्वा तथानुष्ठिते च तैः स्वभुजबलेन सकलमहीमण्डलराज्यं निष्कण्टकं कृतमिति ॥

श्रुत्वा चेमां कथां जन्नताशयानीनां निकटवर्तिनस्ते सर्वेपि सुरापानमत्ता वदन्ति स्म-यद्गण्यमाने वयं शतचतुष्टयपरिमिताः चत्वारिंशन्मनुष्येभ्योधिकास्सर्वथैकमत्यं कृत्वा दक्षिणदेशं गृह्णीम इति। एवमुक्त्वा च प्रस्थिताः। द्वितीयदिने च यस्य यस्याह्वानं कृतं स कोपि न प्राप्तः। ततश्च जन्नताशयानीभिस्तेषां गमनवार्तामुपलभ्य तत्पृष्ठतः सहस्रमश्ववाराः प्रस्थापिताः। स्वल्पेनैव कालेन ते गत्वा तान् बद्ध्वा च राजद्वारमानीतवन्तः। मङ्गलवासरे पातिशाहाः रक्तवासांसि परिधायोपविश्य तान्समाजान् समाजानानीय राजनीत्यनुसारेण तत्तत्कर्मानुसारेण च कांश्चिद् गजपादतले क्षिप्तवन्तः। केषांचिच्छिरश्छेदः[2] कृतः। केषांचित् पाणिपादं छिन्नम्। केचित् कर्णनासाहीनाः कृताः। केषांचिदङ्गुलिच्छेदः[3] कृतः॥

ततश्च तुरूदीबेगखाकं चापानेरिदुर्गे संस्थाप्य स्वयम् अहम्मदाबादं प्रस्थिता महींद्रीनदीतटे निवासमकुर्वन्। अिमादुल्मुल्कोपि धाष्टर्यं कृत्वा अग्रे आजगाम। यस्मिन् दिने एते प्रस्थानं कुर्वन्तः स्थिताः तस्मिन् दिने सोपि प्रस्थानं चकार। मिर्जाअस्करी च एतेषां हरावल् इतिप्रसिद्धः सेनाग्रेसरः स्थितः। स च कियतो निवासान् अग्रे गच्छन् स्थितः। तेन च समम् अिमादुल्मुल्कस्य नरयादगनर – महमूदाबादनगरयोरन्तरा युद्धं बभूव। तत्र च मिर्जाअस्करी संकटे पतितः। ततश्च तत्सहाय्यार्थं यादिगारनासिरमिर्जा तथा कासिमूहुसेनखाँ तथा हिन्दूबेगः*–एते बहुतराश्ववारयुताः आगताः पातिशाहागमनं

---

१ भजंतेति। २ केषां खिछिरःछेदः। ३ अंगुलिछेदः।

* Curiously the folio marked as No. 129 is bound before the folio marked as No. 130, with the folio No. 128 placed in between them. Of these the folio marked as No. 129 ends with तथा का, and there occur these cancelled letters:—सिम् हुसेनखां तथा हिंदूबेगः, and the folio marked as No. 130 begins with मिर्जा तथा कासिमूहुसेनखा....

च शत्रूणां श्रावितम्। ततश्चैतेषामेवंकथनं शत्रूणामेवंश्रवणं यादिगारनासिर्मिर्जाकस्य च जयो जातः शत्रूणांच पराजयो जातः। यादिगारनासिर्मिर्जा सर्वाग्रे स्थित इति युद्धं तेनैव समं बभूव। शत्रूणां मध्ये च आलमखांलोदीकेन तथा कियद्भिरन्यैश्च यत्नोतिसमीचीनः कृतः। अिमादुल्मुल्कश्चाद्धं प्राणं गृहीत्वा गतः। दरवेशमुहम्मदकराशेरः सुजादखांपिता तत्र समरे प्राणान् मुमोच। अत्रान्तरे पातिशाहाः स्वयमागताः। तेन जयोपरि जयो जातः। यदा च पातिशाहाः आगतास्तदा सहस्रत्रयादधिकाः सहस्रचतुष्टयान्न्यूनाश्च शत्रूणां लोका निहताः स्थिताः। ततश्च खुदाबंदखा पृष्टः युद्धं किंचिदवशिष्टं न वा। स चोवाच - यदि स दासः अिमादुलमुल्कोस्मिन् युद्धे भविष्यति तदा युद्धचर्चा समाप्तैव। नोचेत् युद्धान्तरं संभाव्यते। ततस्तस्यावस्थाननिर्णयाय मनुष्याः प्रस्थापिताः। ततश्च तैर्गत्वा रणशिरसि पतितक्षतमनुष्यद्वयात् तस्य युद्धमध्यावस्थानं निर्णीतम्। तत एतैरपि तस्य सत्त्वमुपलब्धम्। दिनान्तरे च पातिशाहाः इतः प्रस्थायाग्रे गत्वा निवासमकुर्वन्। मिर्जाअस्करी चाग्रेग्रे गच्छन् स्थितः। यदा च हौजकांगरीनिकटेवतीर्णाः तदा मिर्जाअस्करीकेन विज्ञप्तिः कृता -- यदि सैन्यं नगरमध्ये प्रविष्टं भविष्यति तदा प्रजानां भूयसी पीडा भविष्यति। तत एतैराज्ञप्तं मिर्जास्करीकं तल्लोकांश्च विहाय कोपि मा प्रविशत्विति। ततश्च प्रतिगोपुरं मनुष्याः स्थापिताः। ततो निर्गत्य यदा सरकीजनिकटेवतीर्णाः तदा तृतीयदिने नगरदर्शनार्थं गताः। ततश्च गूर्जरदेशग्रहणार्थं मनः कृत्वा सामग्रीसम्पादनं कृतवन्तः। हिंदूबेगश्च बहुतरलोकैः समं यत्र यत्र सहायोपेक्षितस्तत्र साहाय्यं कर्त्तुमवस्थापितः। पट्टनं च यादिगारनासिर्मिर्जाकाय प्रसादीकृतम्। कासिमहुसेनसुल्तांकाय च जूत तथा नवसारी तथा सुरतिबंदरं च प्रसादीकृतम्। दोस्तबेगइश्कागाकेन खंभायितं बरौदं च प्राप्तम्। महमूदाबादनगरी च मीरबुचुक्बहादुराय दत्ता॥

एवं यदा गूर्जरदेशकार्यं निर्व्यूढं तदा दीपबंदरप्रदेशं गताः। यदा च पातिशाहा अहम्मदाबादनगरात् त्रिंशत्क्रोशोपरि वर्त्तमाने दंदूकस्थले स्थितास्तदा आगरास्थितैः शुभाशंसकैर्विज्ञप्तिपत्राणि प्रेषितानि - यत् पातिशाहासान्निध्येन दुष्टैः शिर उत्थापितमस्तीति। मालवतोपि समाचार[1] आगतः यत् सिकंदरखा-मल्लखां -- नामानौ मेहतरिजंबूरोपरि आगताविति। मेहतरिजंबूरश्च द्रव्यं गृहीत्वा उज्जयिनीमागतः। अन्येपि ये सैनिका अस्मिन्

---

१. समारार।

प्रदेशे स्थले स्थले स्थितास्ते सर्वेप्युज्जयिनीमागताः। प्रतिपक्षैश्चागत्य दुर्गमवरुद्धम्। दरवेशअलीकिताबदार उज्जयिन्यधिकारी आग्नेयास्त्रेण निहतः। अन्यैश्च दुर्गमध्यस्थितैर्जीवाभयं प्रार्थितम्। ततश्च पातिशाहबुद्धाविदमागतं यदितः परावृत्य मालवमध्ये कियत्कालं स्थित्वा मिर्जाअस्करीकायान्येभ्यश्च सेनाध्यक्षेभ्यः गूर्जरदेशं दत्त्वा स्वयं मण्डपाचले स्थातव्यमिति।* एवं कृते च मालवदेशो निष्कण्टकः स्यात् नूतनलब्धश्च गूर्जरदेशो वशे स्यात्। इत्यादिप्रयोजनवशात् परावृत्य खंभायितमागताः। ततो बरौदं भरौजं चागताः[1]। ततश्च सुरतिं परावृत्य तेन पथा आसेरिंबुरहाणपुरं चागताः। दिनसप्तकं च तत्र स्थित्वा प्रयाणमादिष्टम्। आसेरिदुर्गनिकटेन चागत्य मण्डपाचले निवासः कृतः। शत्रवश्चैतेषामागमनवार्त्ताश्रवणमात्रेण यत्र तत्र गताः। एतेषां च मालवदेशशोभा सुखकरी बभूव। स्वनिकटवर्त्तिभ्यश्च वेतनदेशस्तत्रैव दत्तः। एवं सुखेन समयमतिवाहयांबभूवुः॥

---

* Here ends the folio No. 131. After स्थातव्यम् occurs a mark||*||. The editor does not understand its meaning.

१. चागतः।

(Chapter XXIV)

अथ मिर्जाअस्करीकस्य दुर्वासनया गूर्जरदेशत्यागो वर्ण्यते ॥

यो हि महान्[1] भूत्वा महाभाग्यमाहात्म्यमबुद्ध्वातितृष्णया बहुतरलाभोद्योगं करोति स कुठारेण वाश्या निजपादतक्षणं करोति । अत्र निदर्शनं मिर्जाअस्करीकस्य गूर्जरदेश्यानामध्यक्षाणां[2] च चरित्रम् । यथा—एते हि अल्पयैव बुद्ध्या दुष्टं भावं मनसि धृतवन्तः । प्रथमत एव परस्परं च वैमत्यमुत्पादितवन्तः । यथा मासत्रयमध्य एतद्वैमत्यमुत्पादितम्[3] । खानजहाशीराजी तथा सफरनामकः यः रूमीखा इति प्रसिद्धः सुरतिदुर्गं येन कृतमस्ति एताभ्यां नबसारीदेशो यः कासिम(हु)सेनखांउजवख्-सुहृदः अब्दुल्लाहखांकस्य हस्ते स्थितः स गृहीतः । अब्दुल्लाहखां च ततः भरौजनगरमागतः । एतेष्वेव दिनेषु सुरतिबंदरमपि ताभ्यां गृहीतम् । खानजहांखुश्री स्थलमार्गेण भरौजमागतः । रूमीखां च जलमार्गेण गुरावजंगी इति प्रसिद्धयुद्धक्षमनौकासु नानाविधानि आग्नेयास्त्राणि संस्थाप्य भरौजमायातः । कासिमहुसेनखां चातिव्याकुलो भूत्वा चांपानेरिमायातः । ततश्च अहम्मदाबादनगरे[4] मिर्जाअस्करी -- हिंदूबेगयोर्निकटे गतः कुमकसाहाय्यं प्रार्थयितुम् । सय्यिदइसहाकेन येन सुल्तांबहादुरात् शिताबखांपदवी प्राप्ता स्थिता तेन खंभायितनगरं गृहीतम् । यादिगारनासिरमिर्जा च पट्टणात् मिर्जाअस्करीसमाह्वानेन अहम्मदाबादं गतः । दरियाखां -- मुहाफिज्खांकौ रायसेनिदुर्गतो निर्गत्य दीपं प्रति (सु)ल्ताबहादुरनिक(टे) गच्छन्तौ पट्टणं शून्यं दृष्ट्वा तत्रैव स्थितौ । एतेषां चैकमत्याभावेन[5] एतेषां वृत्तमीदृशं जातं यत् जन्फ़रनामा यादिगारनासिरमिर्जासेवकः शतत्रयाश्ववारयुतः पृथग्भूय सुल्ताबहादुरनिकटे गतः । गत्वा च सुल्ताबहादुरागमने यत्नवानभूत् । तस्य शुभाशंसकैश्च तावत्पर्यन्तं लिखनानि प्रेषितानि यावता सुल्तां अहम्मदाबादाभिमुखो जातः शीघ्रमेव च सरकीचमागत्यावतीर्णः । मिर्जाअस्करी तथा यादिगारनासिरमिर्जा तथा हिंदूबेगः तथा कासिमहुसेनखां एते प्रायशो विंशतिसहस्राश्ववारयुताः सुल्ताकस्य तुल्यकक्षतया[6] असावल्पृष्टतो फिकिरिम् अवतीर्णाः[7] । दिनत्रयं च तथैव तत्र स्थिताः । यतश्च जहांबानी-

---

१ योहिमवान् । २ गूर्जरदेश्यनाध्यक्षाणां । ३ ०मध्यएद्वैतमुत्पादितं । ४ ०सगरे । ५ ०भावैना । ६ तुल्यकक्ष । ७ ०पृष्टतोफिकिरिऽवतीर्णः ।

भिस्समं शुद्धान्तःकरणा न स्थिता अतो युद्धमकृत्वैव चांपारानेरिदुर्गं गताः। अनेन च कार्य्येण तेषां भूयसी हानिर्बभूव। उचितमेवैतत् यस्य हि लवणं भुज्यते तस्यानिष्टकर्तुः असमीचीनं भवतीति ॥

प्रकृतमनुसरामः ॥

सुल्तांबहादुरो विचारसहस्रव्याकुलोपि तेषां गमनानन्तरं चलितः। सय्यिदमुबारखबुखारीकः सुल्तांबहादुरस्य हिरावल् इति प्रसिद्धः[1] सेनाग्रयायी स्थितः। स पातिशाहीयसैन्यस्य निकटं प्राप्तः। ततश्च यादिगारनासिरमिर्जाकस्य च दावल् इतिप्रसिद्धेन सेनापृष्ठवर्त्तिना परावृत्त्य सुल्तांकस्य सेनाग्रयायिना हिरावला भूयांसो निहताः। मिर्जाकस्य हस्ते सुल्ताकस्य सेनाग्रयायी बहुधा क्षतः सन् पतितः। शत्रुश्च महमूदावादं गतः। मिर्जा च स्वयं परावृत्य स्वसैन्यमध्ये आगतः। ततश्च शीघ्रमेव शून्यान्तःकरणत्वात् महींद्रीमवतीर्य पारे गतः। भूयांसश्च तत्सैनिकाः नदीमध्ये मग्नाः। सुल्तांबहादुरोपि नदीपर्यन्तमाग(तः) स्थितः। तुरुदीबेगखां चापानेरिमागतस्य मिर्जाकस्योपचर्यां कृत्वा स्वस्थानमगमत् ॥

द्वितीयदिने च सर्वेपि मिर्जाकाः दुष्टान्तःकरणा भूत्वा तुरुदीबेगखाकमुक्त्वा प्रेषितवन्तः — यदस्मत्सैन्यम् अनुपपत्त्या ऊनमस्तीत्यतः[2] चांपानेरिदुर्गस्थितकोशात् किंचिद् द्रव्यं साहाय्यत्वेन प्रेषणीयम् येन कियत्कालं विश्रम्य शत्रूणामुपरि गच्छामः। मण्डपाचले च पातिशाहाः तिष्ठन्ति। दिनषट्केन च मनुष्यस्तत्र याति। तद्धस्तेन तत्र विज्ञप्तिपत्राण्यपि प्रेषयाम इति। तुरुदीबेगखाकेन चेयं वार्त्ता नानुमता। ततश्च मिर्जाकैः तद्वारणे[3] यत्न आरब्धः — यत्सर्वं कोशं गृह्णीम इति। राज्यलक्ष्मीश्च मिर्जाअस्करीकस्य भवतु इति। सुल्तांबहादुरोपि चेत् क्रोडीकर्तुं शक्यते[4] तदातिसमीचीनम्। यदि चायं कोशो न प्राप्यते सुल्तांबहादुरोपि वशो न भवति। तदा जहांबानोषु मालवे सुखेन तिष्ठत्सु शून्यमागराप्रदेशमेव गच्छाम इति। तुरुदीबेगखां च दुर्गादवतीर्य मिर्जाकानां मिलनार्थं चलितः स्थितः मध्येमार्गं चेमां वार्त्तामुपलभ्य त्वरया दुर्गमेवागात्। एकं च मनुष्यं मिर्जानिकटे प्रेषयामास — यद्भवतामत्रावस्थानमुचितं न भवतीति। ततश्च

---

१ असिद्धः। २ ०पत्त्या दून०। ३ ०कैः स्तद्वारणे। ४ शक्नाते।

मिर्जाकैरुक्त्वा प्रेषितम् – यत् वयं गच्छाम एव । तुभ्यं किंचित् संदेष्टव्यमस्ति । त्वमत्रा-याहि । अस्मत्तो विदायमधिगम्य पुनर्याहीति । ततश्च तुरुदीबेगखांकेन यथोचितं प्रत्युत्तरं दत्तम् । ततश्च मिर्जाकैः दुर्वासनया प्रस्थानं कृत्वा करजीघट्टेनागराप्रदेशं प्रति चलितम् । यावत्पर्यन्तं च पातिशाहीयसैन्यं चांपानेरिप्रदेशे स्थितं तावत् सुल्ताबहादुरः चांपानेरितः पञ्चदशक्रोशोपरिस्थितमहींद्रीज़लमुत्तर्तुं नाशकत् । यदा च मिर्जाकानां वैमत्यमागरा-गमनं चाश्रृणोत्[1] तदा महींद्रीमुत्तीर्य चांपानेरिमागतः । तुरुदीबेगखानो यद्यपि दुर्गं दृढं स्थितं तत्र सामग्री च भूयसी स्थिता तथापि मिर्जाकानां तं दुष्टं समाचारं निवेदयितुं पातिशाहनिकटे मण्डपाचलमागत्य ताः सर्वा वार्त्ताः निवेदयामास । ततश्च जहाबान्योपि मिर्जाकाः आगराप्रदेशं त्वरया यास्यन्तीति मनसि कृत्वा चितौडदुर्गपथा त्वरया प्रस्थान-मरोचयन् । अत्रान्तरे च तान् सर्वान् चितौडदुर्गस्य पार्श्ववर्त्तिन्येव देशे प्राप्तवन्तः । ततश्च[2] मिर्जाका अन्यथानुपपत्त्या तच्चरणदर्शनमकुर्वन् । पातिशाहा अपि कृपालुतया तदपराधमगणयित्वैव बहुधा प्रसादमकुर्वन् ॥

पातिशाहागमने च निमित्तान्तरमेतत् – मुहम्मदसुल्तामिर्जा तत्सुतश्च तुलुग्मिर्जा पातिशाहाज्ञातो विमुखौ भूत्वा व्यूथ्यौ जातौ स्थितौ यथापूर्वमपि कथितमस्ति । एतेष्वपि दिनेषु पुनरपि कोलाहलः कृतः । बिलिग्रामप्रदेशं च लुण्टयित्वा कान्यकुब्जप्रदेशं गतौ । षुसरौकोकुलताशपुत्राः[3] ये तत्र स्थिताः तैर्जीवाभयं प्रार्थयित्वा कान्यकुब्जं ताभ्यां दत्तम् । ततः आगरास्थितो मिर्जाहिंदालः[4] तेषां निग्रहाय प्रस्थितः । गङ्गा-मुत्तीर्य बिल्ग्रामप्रदेशे सैन्यद्वयं सम्मुखं[5] जातम् । भूयसि युद्धे जाते मिर्जाहिंदालस्य जयो जातः । पातिशाहीयं च सैन्यं तेषां पृष्ठतो गत्वा अयोध्यामागतम् । तत्र च तुलुग्बेगमिर्जा ससुतस्समरोद्योगं चकार । अत्रान्तरे च गूर्जरदेशात् पातिशाहानामागमन-वार्त्ता प्राप्ता । ततश्च शत्रवः समरं कृत्वा शीर्णा बभूवुः । मिर्जाहिंदालोपि जयं लब्ध्वा परावृत्य जन्नताशयानीनां सेवार्थमगच्छत् । यदा च जन्नताशयान्य आगरामागतास्तदा विजागिरिदुर्गाधिपः भूपालरायः मण्डपाचलं शून्यं विलोक्य धाष्टर्येनाक्रान्तवान् । त(तश्च)[4] कादिरशाहोपि मण्डपाचलमागतः । ततः पश्चात् मीरामुहम्मदफारूकी बुरहाणपुरात् मण्ड-

१ चाश्रुणोत् । २ ततःश्च । ३ ०कोकुलताश्नपुत्राये । ४ हिदाल । ५ सन्मुखं ।

4. Some space is left blank.

पाचलमायातः । सुलतांबहादुरोपि प्रायशः चतुर्दशदिनपर्यन्तं चापानेरिमध्ये स्थित्वा दीपमेवागमत् । स च जन्नताशयानीभ्यो विमुखः स्थितः इति यदेव कार्यं लाभार्थमारब्धवान् तद्विपरीतप्रयोजनकमभवत् । यद्यथा - यदा हि एतेभ्यः पराजयं लब्ध्वा[1] पलायनमकरोत् तदा बिज्रीफिरंगाय बंदराधिपानामधिपायोपायनानि दत्त्वा स्वीयान् मनुष्यान् प्रस्थापयामास संदिदेश च यदि भवतामाज्ञा तदा मया तत्रागन्तव्यमिति । अत्रान्तरे च मिर्जाअस्करी गूर्जरदेशं त्यक्त्वा गतः सुलतां च दीपमागतः[2] । तदा बिजरीनामा युद्धनौका जंगीगुराव इति प्रसिद्धास्संगे गृहीत्वा जलमार्गेण दीपमागतः[3] । सर्वेषां च चरित्रं तस्य मनस्यागतम् । यदा च बिजरी एवं विचारयामास – यत्साम्प्रतं सुल्तांकस्य साहाय्यापेक्षा नास्ति । कदाचिच्च मय्येव दौष्ट्यमाचरिष्यति । ततश्च स्वस्यासुस्थतां प्रकाशयित्वा संदिदेश – भवदाकारितोहमागत इति । यदा च सुस्थो भविष्यामि तदा भवत्सेवां करिष्यामीति । ततश्च नवशतोत्तरं चत्वारिंशत्तमे वर्षे तृतीयायां रमजानमासस्य (?)तिथौ दिनावसानसमये सुल्तांबहादुरः गुरावेति प्रसिद्धा नौका आरुह्य बिजरीकस्य सुखप्रश्नार्थं गतः । गमनमात्रेणैव[4] तस्य व्याजं बुद्ध्वा पश्चात्तापवान् भूत्वास्मद्धस्ते आगतोस्मि[5] । अस्मात् कियन्ति बंदराणि चेत् गृह्यन्ते तदा स्थलं भवति । तदानीं च बिजरी मध्येमार्गं गत्वा विज्ञापयामास -- यत् सुल्तांका यदि कियत्कालं विलम्बन्ते तदा मयानीतान्युपायनानि तद्दृष्टिगोचराणि करिष्यामीति । सुल्ताकश्च पश्चादुपायनानि प्रेषयध्वमित्युक्त्वा निजनौकां प्रस्थितः* । काजीफरंगश्च सुल्तांमार्गे स्थित्वोवाच – अत्रैव स्थेयमिति । सुल्ताबहादुरेण च खड्गमुत्कृष्य[6] स द्विधा छिन्नः । ततश्च सुल्ता एतेषां नौकायाः[7] उत्सृज्य[8] निजनौकामुपगतः । फिरंगीभिश्च निकटे आगत्य सुल्ता वेष्टितः । ततश्च युद्धमवर्त्तत । सुल्तांको रूमीखांश्च द्वावपि जलमध्ये पतितौ । तत्र रूमीखां केनचित् परिचितेन फिरंगीकेन निजनौकामारोहितः । सुल्ता तन्निकटवर्तिनश्च सर्वे जलमध्ये निमग्नाः । तदनन्तरं च गूर्जरदेशे दक्षिणदेशे च कियद्वारं तत्प्रकटनप्रवाद उत्थितः । एकदा च दक्षिणदेशे कश्चित्पुरुषः आगतः । लोकैरुक्तम् -- अयं सुल्तांबहादुर इति । इदं च निजामुलमूल्कनाङ्गीकृत्य तेन समं चौगानबाजी इति प्रसिद्धा कन्दुकक्रीडा कृता । लोकेषु च तत्पृष्ठतो बहुतरेषु मिलितेषु

१. पराजयलघाघा । २. दीवपमागत० । ३. दीपवमागतः । ४. ममनमात्रेण । ५. आगतास्ति । ६. उत्कृष्य । ७. नौकाम् इति साधीयान् पाठः । ८. उत्सृत्य ।

* The fol. No. 137 ends with प्रस्थितः ।, काजीफरंगश्च is continued at the fol. No. 213.

निजामुल्मुल्केन तद्वधार्थमुद्योगे कृते स रात्रौ तच्छिविरात् प्रपलाय्यान्तर्हितो जातः । लोकमध्ये च तेन स हत इति प्रवादो बभूव । एकदा च गूर्जरदेशीयमहदन्तःपातिना मीरअबूतुराबेनेदमुक्तम्-यत् तेषु दिनेषु सुल्ताबहादुरगुरुः मुल्लाकुतुप्दीशीराजी दक्षिण-देशे स्थितः । तेन सशपथमुक्तं[1] यद्दक्षिणदेशे प्रकटीभूतो यः स सुल्तांबहादुरः सर्वथा भव-तीति । यतः तस्य मम च पराविज्ञाता या या वार्त्ताः पूर्वं जाताः स्थिताः तानि चिह्नानि सर्वाणि तेनोक्तानीति । परमेश्वरप्रपञ्चे इदमसंभावितं नास्ति ॥

यदा च सुल्ताबहादुरो निमग्नो लोकाश्च तदीया मृतास्तदा मुहम्मदजमामिर्जा नीलानि परिधानानि कृत्वा लोकान् प्रतार्य्य* गूर्जरदेश्यकोशान् वशे चकार । केचिच्च कोशाः फिरंगीभिर्नीताः । केचिच्च लोकैर्लुण्टिताः । मुहम्मदजमामिर्जा सुल्तांमात्रा समं पुत्र इति सम्बन्धं दृढं कृत्वा फिरंगीभिस्समं सुल्तांबहादुरवधविवादं दावा कुर्वन् स्थितः‡ । कदाचिच्च तेभ्यो द्रव्यं गुप्तं प्रेषयित्वा मन्नाम्ना य(व)नप्रसिद्धः खुतुबा राजशुभाशंसनात्मा पठनीय इति यत्नं कुर्वन् स्थितः । ततश्च मस्जिदसफाकोमध्ये कियन्ति दिनानि तन्नाम्ना खुतुबा पठितः । कियन्ति दिनानि च लविन्दत्वेन× तत्रैव स्थितः । तावच्च अिमादुल्मुल्केन तदुपरि कटकमानीय ततो दूरीकृतः । ततश्च सोन्यत्र स्थानमलभ-मानो जन्नताशयानीनां निकटे आगतः । एतस्य वार्त्ता चावसरे कथयिष्यते ॥

यदा च हजरतिजन्नताशयान्यः आगरामागतास्तदा यैः पूर्वं शिर उत्थापितं स्थितं ते सर्वेपि एतेभ्यः कटकं दत्त्वा स्वप्राणरक्षणं कृतवन्तः । एतेषां च सर्वे देशा निष्कण्टका बभूवुः ॥

---

१. शपथ० । * The fol No. 213 b ends at प्रतार्य, and गूर्जर.........is continued at the folio No. 138.

‡ The relevant original passage has been translated as:—he called himself the son of Sultān Bahādur's mother, and sometimes demanded from Firanghis satisfaction for the murder.........,

× adventurer.

(Chapter XXV)

अथ हजरतिजन्नताशयानीनां बंगालदेशं प्रति प्रस्थानं तद्देशं च जित्वा परावृत्त्यागरायामागमनम् आन्तरालिककथाश्च काश्चिन्निरूप्यन्ते ।

जन्नताशयानीनां मनसि स्थितं यत्पुनरपि गूर्जरदेशं गत्वा तत्र विश्वसनीयान् समर्थांश्च सेनाध्यक्षान् संस्थाप्य ततो निश्चिन्ततां सम्पाद्य पश्चादागरायामागन्तव्यमिति । परन्तु एतावन्मध्य एव पूर्वदिशि[1] शेरखाकेन द्वन्द्वमुत्थापितमिति बंगालदेशं प्रति प्रस्थानमकारि । इदं च विचार्य निर्णीतं यत् शेरखांकं विजित्य बंगालदेशं वशे कुर्म इति ।*

शरखां च सूरोपनामकप्रतिष्ठानेभ्यस्तिष्ठति । एतस्य प्राचीनं नाम फरीद् इति । पिता चास्य हसननामकः । एतस्य पिता इबराहिमशबराखेलनामा । अयञ्च इबराहिमः अश्ववाणिज्यं सवदागरी इति प्रसिद्धं कुर्वन् स्थितः । सवदागरेषु तथा प्रसिद्धोपि न स्थितः । नारनौलपार्श्ववर्त्तिशमलाग्रामो जन्मभूमिरेतस्य वतन इति प्रसिद्धा स्थिता । एतत्पुत्रश्च हसनः उदितभाग्यवत्तया सवदागरीं त्यक्त्वा शूरवृत्तिं सिपाहीगिरी इति प्रसिद्धां कुर्वन् स्थितः । इदानीञ्च शाहनिशाहीकस्य समक्षसेवां कुर्वतो रायसलस्य पितामहरायमल्लसेवा(म)यं कुर्वाणः स्थितः । अयञ्चेतो निर्गत्य सहस्रांवदेश्यजूना-स्थले सिकंदरलोदीकसेनाध्यक्षनसीरखानूहानीकस्य सेवको बभूव । स्वतुल्यसेवकेषु मध्ये कार्यकरणेन स्वात्मानमग्रेसरं चकार । नसीरखांमरणानन्तरं तद्भ्रातुर्दौलतीखाकस्य सेवां कृतवान् । ततश्च सुल्तासिकंदरलोदीसेवकस्य बब्बनूनाम्नः सेवको जातः । तत्र च कदाचिदस्य संपद्वृद्धिरभवत् । तत्कार्याणि सर्वाणि एतद्यत्नतो जायमानानि स्थितानि । एतत्पुत्रश्च फरीदः स्ववित्तमननुरुद्ध्य व्ययकरणेन पितुर्विषादमुत्पाद्य ताजखांलोदीनिकटे स्थितः । कियत्कालं चायोध्यायां कासिमहुसेनखांउजबखस्य सेवको जातः । कियत्कालञ्च सुल्तांजुनैदबरलाससेवको बभूव । कदाचिच्च सुल्ताजुनैदबरलासः प्रतिष्ठानद्वयसहितमेनं फरीदं किञ्चित्कार्यवशतः फिरदौसमकानीनां सविधे नीत्वा गतः स्थितः । तदानीञ्चैनं

---

* The fol. No. 138 ends at कुर्मं इति ।, and शरखां च.........is continued at the fol. No. 29.

१. ०दिशिशि ।

फरीदं लक्ष्यीकृत्य फिरदौसमकान्य ऊचुः—अये जुनैदबरलास।* एतस्य प्रतिष्ठानस्य अक्षिभ्यामिदं[1] ज्ञायते यदितोसमीचीनं कार्यमुत्पत्स्यते इति। अतोयं नियन्त्रणीय इति। एतौ च द्वौ प्रतिष्ठानौ संपद्वृद्धिनयनयोग्याविति। फरीदश्च दृष्ट्यैव[2] तेषां दुष्टं भावमुपलभ्य तेषां नियन्त्रणाज्ञातः पूर्वमेव ततोपसृतोभवत्। अत्रान्तरे चास्य पिता हसनो मृतः। श्रुत्वा[3] चेमां वार्त्ताम् अयं द्रुतं[4] तत्र गत्वा पितुर्द्रव्यं प्राप्तवान्। ततश्च रोहितासदुर्गपार्श्ववर्त्तिजूनादेशगहनमध्ये चौर्येण पान्थपाटच्चरत्वेन च कालमतिवाहयांबभूव। अल्पेनैव कालेन सरहंग इति प्रसिद्धसकलमाण्डलिकचोरेभ्योग्रेसरो बभूव। यद्यथा कदाचित् गूर्जराधिपसुल्तांबहादुरः तस्मै सवदागरद्वारा मार्गशम्बलं प्रेषयित्वा निजनिकटे आह्वयामास। स च तदेव द्रव्यं व्ययार्थं कृत्वा देशलुण्टने महानगरलुण्टने च उद्युक्तो बभूव। ततश्च स्वल्पेनैव कालेन लबिन्दा भूयांसोन्ये च तत्पार्श्ववर्त्तिनोभवन्। अत्रान्तरे च विहारदेशाधिकारिणि नूहानीसेनाध्यक्षे कस्मिंश्चिन्मृते तत्पदरक्षणं कर्त्तुमशक्तेषु तदीयेषु अयं शेरखांनामा बहुभिः स्वीयैः लबिन्दैः परिवृतः अतित्वरया धावित्वा तत्रत्यं सकलं कोशमुपादाय निजावासमायातः सरयूनिकटवर्त्तिनः तुलुगबेगमिर्जाकिस्योपरि अकस्मादेव निपपात। कपटेन च तदपेक्षया बलवानभूत्। ततो निर्गत्य वाराणसीं लुण्टितवान्। ततश्च लोकेषु बहुलेषु जातेषु कोशे चातिवृद्धिं प्राप्ते पट्नानगरं गत्वा तं सर्वं देशमाक्रान्तवान्। बंगालाधिपदेशसीमायां सूर्यकुण्डे बहुतरसैन्येन समं गत्वा तेन समं युद्धं लब्धवान्। तानि स्थलान्यपि वशे चकार। एकवर्षपर्यन्तं बंगालाधिपेन नसीबशाहेन समं युद्ध्यमान एव कालं यापयामास। कियत्कालं च गौडं रुद्ध्वा स्थितः॥

अत्यद्भुतमिदं यत् शेरखांकेन उत्कलेशस्य निकटे स्थितोतिप्रसिद्धो दैवज्ञः स्वग्रहावलोकनाय प्रार्थितः। उत्कलेशेन च स न[5] प्रेषितः। परन्तु तेनेदं लिखित्वा प्रेषितं वर्षपर्यन्तं गौ(ड)देशो भवद्धस्ते नायास्यति पश्चाच्चामुकतिथौ त्वद्धस्ते आयास्यति। त्वदुत्तरणसमये च मुहूर्त्तमात्रं गङ्गापद्भ्यामुत्तरणयोग्या भविष्यति। ततश्च दैवयोगेन सर्वं तथैव जातम्॥

एतेषु दिनेषु जन्नताशयान्यो मालवगूर्जरदेशग्रहणार्थं प्रस्थिताः स्थिता इति शेरखांकेन पूर्वदेशे स्वाच्छन्द्येन शत्रुतोचितो व्यवहारः कृतः॥

---

*The fol. No. 29 ends as बरलास, and एतस्य........is continued at the fol. No. 139

१. अक्षिभ्यम्। २. दृष्ट्वैव। ३. शृत्वा। ४. दृतं। ५. स० न।

प्राथमिको व्यवहारः शेरखांकस्य संक्षेपतोयम् । अन्तिमश्च जन्नताशयानीनां चरितवर्णने कश्चित् कथयिष्यते ॥

यो हि स्वरूपाननुसारेण शिर उत्थापयति तस्यापि दरो भवत्विति । यदा च पूर्वदिग्गमनं[1] मनसि निर्णीतं तदा फिरदौसमकानीनां सेनाध्यक्षान्तर्गतः मीरफकीरअलीनामा ढिल्लीं प्रस्थापितः । मोरमुहम्मदबख्शी आगरायां संस्थापितः । यादिगारनासिरमिर्जा यः पितृव्यपुत्रः क(ा)लपीदेशाधिकारी च स एव तत्र प्रस्थापितः । तथा नूरदीमुहम्मदमिर्जा यः गुलरंगबेगिमनाम्न्याः शाहनशाही(क)भगिन्याः पतिः सुलतांसिलेमाबेगिमनाम्न्याः पिता स कान्यकुब्जप्रदेशं प्रस्थापितः । एवंक्रमेण हजरतिजन्नताशयान्यो देशसमाधानं कृत्वा सान्तःपुरा नावमारुह्य पूर्वदिशं प्रतस्थुः । मिर्जाअस्करी तथा मिर्जाहिंदालोपि सहैव स्थितः । सेनाध्येक्षेषु च इबराहिमबेगजाबुक् तथा जहांगीरकुलीबेग् तथा खुसरौबेग्कोकुल्ताश् तथा तुरदेबेगखा निकुत्बेग् तथा तुरदीबेगइटावह तथा बयरामखां तथा कासिमहुसेनखाउज्वख् तथा बुचक्बेग् तथा जाहिदबेग् तथा दोस्तबेग् तथा बेगमीरक् तथा हाजोमुहम्मदबाबाकश्कह:[2] तथा याकूपबेग् तथा निहाल्बेग् तथा रोशनबेग् तथा मोगलबेग् एते तथान्येपि सेनाध्यक्षाः भूयांसः सार्थे स्थिताः । सैन्यं च जलमार्गेण स्थलमार्गेण च गच्छत् स्थितम् । स्वयं च नौकामारुह्य कदाचिच्चाश्वमारुह्य देशग्रहणरीतिचिन्तां कुर्वन्तः शेरखानिवासस्थलं चरणाद्रिदुर्गं प्रति प्रस्थिताः । मिर्जामुहम्मदजमा च भाग्यवत्तया गूर्जरदेशात् चरणाद्रिदुर्गनिकटे एतेषां सेवामकरोत् ॥

मिर्जामुहम्मदजमाकागमनस्य काचिदियं वार्त्ता निरूप्यते ॥

एतदागमनात्पूर्वमेव जन्नताशयानीनां भगिन्या मअसूमसुल्ताबेगिमनाम्न्या आगरायामेवैतदपराधाः क्षमापिताः स्थिताः । जन्नताशयानीभिश्च कृपालुतया तदपराधान् क्षान्त्वा स आयातु इत्यप्युक्तं स्थितम् । यदा च मिर्जा निकटे आगतः तदा तदानयनाय समीचीनाः समीचीनाः सेनाध्यक्षाः प्रस्थापिताः । यदा चैकदिनसाध्ये मार्गे स्थिताः (त)दा मिर्जाअस्करी तथा मिर्जाहिंदाल एतौ अग्रे प्रत्युद्गतौ । आज्ञानुरोधेन च मिर्जाअस्करीकेन च वक्षःपर्यन्तम् अर्द्धः प्रणामः कृतः । मिर्जाहिंदालेन च सम्पूर्णः प्रणामः कृतः । ततश्चैते सर्वे तं मिर्जाकम् अतिमाहात्म्येन पातिशाहीयसैन्यपर्यन्तमानीतवन्तः । तस्मिन् दिने च

---

१. ० दिग्जमनं । २. ० कश्वहः ।

स्वशिविर एव स्थातव्यमित्याज्ञा जाता। द्वितीयदिने च स आगत्य हजरतिजन्नताशयानीनां[1] सेवामकरोत्। पातिशाहैश्च तस्य भूयाननुग्रहः कृतः। एकस्मिन्नेव दिने वारद्वयं सरपाउ इति प्रसिद्धानि वस्त्राणि अश्वः खड्गश्च दत्तानि। उचितं चैतत् यतः जगदीशप्रपञ्चे ये महान्तः तेपराधान् सामीचीन्यकरणेन 'क्रीणन्ति[2] इति। जगदीशस्य कारखाना इति प्रसिद्धेषु कार्यगृहेषु एवमेवास्ति यत् यथापराधबाहुल्यं[3] तथा दानबाहुल्यम्। पातिशाहाः तत्प्रतिनिधयः इति एतेष्वपि इदमस्ति। यदि कश्चिदेकः स्वापराधैर्लज्जालुरवशश्च स्वनिकटे आयाति तदा तदपराधान् क्षमन्त इति। एतेषां वचनानां चायं भा(वः)-हजरतिजन्नताशयानीनामेतेन बहवोपराधाः कृताः स्थिताः। तदुचितदण्डस्थले एतैः नवाजिश् इति प्रसिद्धोनुग्रह एव कृत इति। नमो जगदीश्वराय स्तुत्यश्च स एव यदस्मत्कालीनस्यास्य शाहनशाहीकस्य स्वरूपे एताः सर्वा वार्त्तास्तिष्ठन्ति। किं बहुना। परोपकारितया पञ्चानां महाभूतानामयं षष्ठ इति। यथास्मत्पातिशाहः दण्डार्हाणां शासने उपेक्षां करोति तथा आदममारभ्य कोपि पातिशाहो न दृष्टः। यथाहमकबरनामामध्ये किञ्चित् स्वल्पमेतच्चरित्रवर्णने लिखिष्ये*। भद्रं भवत्वस्य भो जगदीश। एताः वार्त्ताः सर्वदास्मिंस्तिष्ठन्तु॥

प्रकृतमनुसरामः॥

शेरखांकः एतेषामागमनं श्रुत्वा कुतुब्खांनामानं निजतनयं चरणाड्रिमध्येवस्थाप्य दुर्गदार्ढ्यं च विधाय स्वयं बंगालदेशं प्रतस्थे। गत्वा च युद्धेन तं देशं वशे चकार। यदा च जन्नताशयान्यः चरणाड्रिदुर्गं गताः तदा तद्दुर्गग्रहणे मनोकुर्वन्। ततश्च रूमीखांनामा दुर्गग्रहणोपायेषु अद्वितीयो 'मंदसूरजयोत्तरं सुल्तांबहादुरात् पृथग्भूय पातिशाहसेवकमध्ये आगत(ः)। सः सावातनामकैर्दुर्गग्रहणोपायैराग्नेयास्त्रैश्च तद् दुर्गं जग्राह। ततश्च शेरखांसुतः कुतुब्खानामा पलायनं चकार। अन्ये च लोका जीवाभयं प्रार्थयित्वा बहिर्निर्गताः। तद् दुर्गं च पातिशाहहस्ते आगतम्। ये च तद्दुर्गात् जीवाभयं प्रार्थयित्वा बहिर्निर्गतास्ते लोकाः प्रायः सहस्रद्वयपरिमिता रूमीखांवचः प्रामाण्येनागताः स्थिताः। तेषां च हस्तच्छेदं मुअय्यदबेगदुलदेनामा स्वयं समादिदेश। लोकेषु पातिशाहेनैव हस्तच्छेदः समादिष्टः इति वार्त्तामुपास्थापयत्। अत्यन्तमनुचितो व्यवहारस्तेन

---

१. जन्नताशयानीना। २. क्रीणन्त इति। ३ यथायथाऽपराधबाहुल्यं।

*The relevant line has been translated as-
"In this book a fine instance will be given out of many."

कृतः। पातिशाहैश्च मलामति इति प्रसिद्धा त्वत्तोयमनुचितो व्यवहारोजातोस्तीत्यादि बहुधा शिक्षा कृता। रूमीखांकस्य भूयसी संपद्वृद्धिः नवाजिश् इति प्रसिद्धा कृता। पातिशाहनिकटे च भूयसी तस्य विश्वसनीयता जाता। ततश्च तत्कार्यकरणफलत्वेन तदेव दुर्गं रूमीखांकायैव दत्तम्। ततश्च रूमीखां कियत्कालमिहलोके स्थित्वा विषप्रयोगेण[1] परलोकं जगाम॥

ततश्च जन्नताशयान्यः एतस्मात्कार्यान्निश्चिन्ता भूत्वा बंगालाभिमुखं प्रस्थातुं मनो- कुर्वन्। बंगालेश्वरश्च नसीबशाहः सक्षतस्सन् शेरखांभयेन शरणार्थी दादिरख्वाह इति प्रसिद्धः समाजगाम। ततश्च नसीबशाहागमनमेव एतेषां गमनं त्वरयामास। एतैश्चास्मै भूयसीं कृपां विधाय बहु दत्तम्। यदा च बंगालगमनमावश्यकत्वेन निर्णीतम् तदा यवनपुरं तत्पार्श्ववर्त्तिदेशश्च मीरहिंदूबेगाय महते सेनाध्यक्षाय दत्तः। चरणाडिदेशश्च बेगमीरकाय प्रसादीकृतः। ततश्चैतद्देशसमाधानं कृत्वा जलमार्गेण स्थलमार्गेण च बंगालं चलिताः। यदा च पट्टणानगरं प्राप्तास्तदा लोकैर्विज्ञप्तिः कृता—यद् वर्षा सन्निहितेति कियत्कालमत्रावस्थेयम्[2]। वर्षाकाले तद्देशमध्ये गमनं महाविषम्। कटकमपि बहुदुःखि[3] भविष्यति। बंगालेश्वरेण च स्वकार्यानुरोधेन विज्ञप्तिः कृता--यत् शेरखां अद्यापि बंगालमध्ये बद्धमूलो जातो नास्तीति शीघ्रं गन्तव्यम् यत् तस्य पलायनं तद्वारणं वा सुकरम्। ततश्च तत्सन्तोषार्थं प्रस्थानमादिष्टम्। भागलपुरे च सैन्यं द्विधा विभज्य स्थापितम्। तत्र मिर्जाहिंदालः पञ्चषसहस्राश्ववारैः समं गङ्गामुत्तीर्य पारे प्रस्थापितः। तेनैव पथा त्वया गन्तव्यमित्यादिष्टं च। यदा च जन्नताशयान्यो मुंगेरिपर्यन्तं गतास्तदा इयं वार्त्तागता—यत् शेरखांसुतो जलालखांनामा यः पितुरनन्तरं सलेमखांपदवीं प्राप्तः स्थितः स खवासखांकं संगे कृत्वा तथा बरमजीदं तथा सरमस्तखांकं तथा हैबतिखांनियाजीकं तथा पाहाडखांकं संगे कृत्वा प्रायः पञ्चदशसहस्राश्ववारयुतः आगत्य बंगालगोपुरतुल्यं गढीनामकं प्रदेशं दृढं कृत्वा तत्र द्वन्द्वमुत्पादितवानिति॥

इदं चात्र तत्त्वम्। शेरखाकः पातिशाहैः समं युद्धं न करिष्यामीति निर्णीय झाडखण्डपन्थानम- ग्रहीत्। इदं च विचारितवान्—यत् हजरतिजन्नताशयानीषु बंगालं गतेषु विहारप्रदेशं गत्वा तत्र द्वन्द्वमुत्थापयामि। बंगालकोशांश्च कुत्रचिन्निवेशयिष्यामीति। जलालखांकं तत्सार्थव-

---

१ ०प्रयोगेन। २ कियत्कालः मत्रास्थेयां। ३ ०दुःखी।

त्तिनश्च लोकान् संदिदेश – यत् सर्वैर्भवद्भिस्तावत् गढीमध्ये स्थातव्यं यावत् पातिशाहीया लोका आयान्ति। तैश्च समं सर्वथा युद्धधाष्ट्र्यं न कर्त्तव्यम्। मयि च शेरपुरं प्राप्ते त्वरया मन्निकटे आगन्तव्यमिति। जन्नताशयानीभिश्च भागलपुरात् इबराहिमबेगचापुक् तथा जहांगीरकुलीबेगः तथा बयरमबेगः तथा निहालबेगः तथा रोशनबेगः तथा गुर्गिअलीबेगः तथा बचुकहबहादुरः एते तथान्येपि बहवो लोकाः प्रायः पञ्चषसहस्राश्ववारपरिमिताः अग्रे प्रस्थापिताः। यदा च पातिशाहीयं सैन्यं गढीपर्यन्तमागतं तदा जलालखांपितुर्वचनमवमत्य[1] कटकबन्धं कृत्वा एतेषामुपरि निपपात। एतैश्च सम्यक् संवरणं कृतं न स्थितम्। समरसामग्रीं संपादयद्भिरेव स्थितम्। युद्धेच्छा च न स्थिता। इत्यादिभिर्निमित्तैः बयरामखांकेन बहुवारं तदुपरि निपत्य युद्धे कृतेपि विपक्षप्राचुर्येण सहायालाभेन च तथा जयो न प्राप्तः। अलीखामहाबनी तथा हैदरबख्शी एतौ कियन्तोन्येपि समरशिरसि प्राणान् मुमुचुः यान् शहीदाः जाता इति यवना वदन्ति। यदा च जन्नताशयानीभिरियं वार्त्तोपलब्धा तदा त्वरया प्रस्थानमकारि। अत्रान्तरे च या स्वार्थं समुद्रसमा नौका संपादिता स्थिता सा खलग्रामे निममज्ज। यदा च पातिशाहाः पाठाणनिकटे प्राप्तास्तदा दुर्दैवात्ते[2] पलायांबभूवुः। ततश्च जन्नताशयान्यो मिर्जाहिंदालेन विज्ञापिते सति त्वया वेतनत्वेन नूतनलब्धे तिरुहितदेशे पुरनियादेशे च गत्वा सामग्रीं सम्पाद्य तेनैव पथा बंगालमध्ये आगन्तव्यमिति तस्य विदायं कृतवन्तः। स्वयं च प्रत्यहं गच्छन्त एव स्थिताः। ततश्च जगदीशानुग्रहेण नवशतोत्तरं पञ्चचत्वारिंशत्तमे वर्षे बंगालदेशस्य जयो बभूव। शेरखां च सकलप्रतिष्ठानैस्समं बंगालदेश्यसत्कोशानादाय* झाडखण्डपथा रोहितासपार्श्ववर्त्तिनं देशं प्राप्तः कपटेन च रोहितासं वशे चकार॥

रोहितास(ग्र)हणस्य संक्षेपत इयं वार्त्ता॥

यदा शेरखां दुर्गनिकटे आगतस्तदा रोहितासाधिपाय राज्ञे चिन्तामणिब्राह्मणाय मनुष्यान् प्रेषयामास संदिदेश च - यत्त्वया बहवो मह्यमुपकाराः कृताः सन्ति। इदानीं च दुर्दिनानि मह्यमापतितानीत्यतः सद्वंशप्रतिष्ठानुरोधात् मदवरोधाच्च बालकानामवस्थित्यर्थं दुर्गमध्ये स्थलं प्रयच्छेति। ततश्च स राजा शुद्धान्तःकरणतया एतस्य भूपस्यार्त्ततया च झटति

---

१ ०वचनभत्रमन्य। २ दुर्दैवात्ते।

*Translation :—Choicest treasures of Bengal.

तत्संदिष्टमङ्गीचकार । ततश्च शेरखां षट्शतं दोला आनाय्य तत्र च प्रत्येकं ससन्नाहं शूरद्वयमुपवेश्य दोलापार्श्वयोश्च दासीद्वयं निवेश्य दुर्गमध्ये प्रविश्य तद् दुर्गं जग्राह । ततश्च तत्र स्वावरोधमवस्थाप्य स्वयं बंगालदेशमार्गावरोधं चकार ॥

हजरतिजन्नताशयान्यश्च बंगालदेशशोभया वशीकृतमानसास्तत्रैव कालमतिवाहयांबभूवुः । एतदीयाः सैनिका अपि तद्देशस्य निष्कण्टकतयात्यन्तानवधानतारसमग्ना बभूवुः । अत्रान्तरे च मिर्जाहिंदालः सकपटलोकैकवाक्यतया विनैव विदायं दुष्टभावेन प्रबले वर्षर्तौ आगराभिमुखं प्रतस्थे । तत्प्रेषितानि बहून्याज्ञापत्राणि निष्प्रयोजनानि विधायागरामागत्य द्वन्द्व-कोलाहलसामग्रीं[1] सम्पादयामास राज्यलक्ष्मीभ(ा)रं च स्वोपरि निवेशयितुमियेष । ततश्च शेरखां तं कालं समीचीनं मत्वा वाराणसीमुपरुरोध । अल्पेनैव कालेन तां गृहीत्वा मीरफुजैली-नामकं तत्रत्याधिकारिणं निहत्य स्वयं जवनपुरं जगाम । तत्र च बाबाबेगजलाइरः शाहिमखां-पिता मीरहिंदूबेगमरणोत्तरमधिकारी स्थितः । स तद्दार्ढ्ये परं यत्नमकरोत् । यूसुफबेगः इबराहिमबेगचापुक्सुतः अयोध्यातो बंगालं प्रति प्रतिष्ठमानः[2] आगत्य एतस्य साहाय्य-मकरोत् । प्रत्यहं च तन्नगरपरिसरेरिवार्त्तोपलम्भार्थं पर्य्यटन् आगतैः शत्रुभिः समं युद्धं करिष्य इत्यपीयेष । इमामस्य वार्त्तां श्रुत्वा जलालखां सहस्रत्रयाश्ववारयुतोतित्वरया समाजगाम । यूसुफ्बेगश्च प्रतिसैन्यस्य श्यामिकां दृष्ट्वा समरसामग्रीं सम्पादयामास । ततश्च प्रतिसैन्यब-हुलतया निकटवर्त्तिभिर्बहुधा निषिद्धोपि यूसुफ्बेगो रणाग्नौ प्राणान् जुहाव । दिनान्तरे च शत्रवो जवनपुरं रुरुधुः । बाबाबेगजलाइरश्च तत्संरक्षणे परं यत्नं चकार । मिर्जाकेभ्यश्चेमां वार्त्तां लिलेख । मध्ये मध्ये च हजरतिजन्नताशयानीभ्योपि विज्ञप्तिपत्राण्यप्रेषयत् । अत्रान्तरे च ढिल्लीतः मीरफकीरअली आगरामागत्य मिर्जाहिंदालं बहुधा शिक्षयित्वा यमुनामतीत्य पारेकरोत् । मुहम्मदबख्शीकं चादिदेश -यदेतत्कालोचितसामग्रीं सम्पाद्य मिर्जा झटिति यवनपुरं प्रापणीय इति । ततश्च मीरफकीरअली कालपीं प्रति यादिगारनासिरमिर्जासैन्यो-द्योगाय जगामः । कडानिकटे* च मिर्जाका ऐकमत्यं विधायाग्रे चलिताः । खुसरौबेगकोकुल-ताश् तथा हाजीमुहम्मदबाबाकश्कहः तथा जाहिद्बेगः तथा मिर्जानजरः एतेन्येपि केचन दुष्टवासनया हजरतिजन्नताशयानीभ्यः प्रपलाय्य कान्यकुब्जावस्थापितमिर्जानूरदीमुहम्मद-निकटे आगताः । मिर्जानूरदीकेन च एतेषामागमनं मिर्जाहिंदालाय निवेदितं विज्ञापितं च

---

१. ०सामग्री । २. प्रस्थितिष्ठमानः ।

* A place near Allahabad.

यदेतेषामाश्वासनपत्राणि प्रस्थापनीयानीति । ततश्च मिर्जाहिंदालेनातिविश्वसनीयमुहम्मदगाजीतोगबाजः आश्वासनपत्राणि दत्त्वा प्रस्थापितः । यादिगारनासिरमिर्जाकं प्रति मीरफकीरअलीकं च प्रतिसेनाध्यक्षाणामागमनसमाचारावेदकपत्राणि प्रस्थापितानि । ते च सेनाध्यक्षा मिर्जानूरदीतः प्रत्युत्तरमप्रतीक्ष्यैव जाहिदबेगवेतनदेशं कोलनामकं जग्मुः । मुहम्मदगाजी चेमां वार्तां श्रुत्वा तत्रैव तेषां निकटे* जगाम । ततश्च तैः सत्यमुक्तम् - यत् अस्माभिः पातिशाहचरणदर्शनतो वैमुख्यमङ्गीकृतमस्ति । यदि भवता स्वनाम्ना खुतुबासंज्ञकं राजशुभाशंसनं पठित्वा स्वातन्त्र्येण राज्यं क्रियते तदास्माभिरतिसमीचीनानि कार्याणि कृत्वा प्रदर्श्यन्ते । नोचेत् मिर्जाकामरानिकटे गम्यते । मुहम्मदगाजीतोगबायेन चागत्य रहसि तत्संदेशमुक्त्वा मिर्जाहिंदालो विज्ञापितः - यदत्र भवत इदमुचितं यत् स्वनाम्ना खुतुबा पाठनीयोथवा यथाकथंचिदेते सेनाध्यक्षा नियन्त्रणीया इति । ततश्च सर्वदा राज्यमभीप्सता मिर्जाकेनैते[१] सेनाध्यक्षाः नानाविधप्रत्याशाभिरानाय्याश्वासिताः । मनःस्थिता च वार्त्ता दृढीकृता ॥

ततश्च जन्नताशयानीभिर्वाराणसीजवनपुरवार्त्ता मिर्जाहिंदालवैमुख्यवार्त्तां[२] चोपलभ्य हिंदुस्थानशयेखेभ्योतिमहान् शयेखफूलोतित्वरया प्रस्थापितः । यदा आगरां गत्वा नानाशिक्षाभिः प्रबोध्य मिर्जाहिंदालः प्रतिष्ठानपराजयार्थं प्रस्थापनीय इति । यावदे(ते) सेनाध्यक्षा मिर्जाहिंदालमपथे प्रेरयन्ति[३] तावदेव शयेखफूलः प्राप्तः प्राप्तं । च तं[४] मिर्जाहिंदालः प्रत्युद्गम्यातिप्रतिष्ठया निजगृहान् प्रापयामास । शयेखफूलश्च तं नानोपदेशैः प्रबोध्य प्रतिष्ठानपराजये दृढनिश्चयं चकार । द्वितीयदिने च शयेखफूलो मुहम्मदबख्शीकमाहूय प्रस्थानसमरयोः सामग्रीमश्वगजोष्ट्रादिरूपां रचयितुमुद्योजयामास । स च विज्ञापयामास – सैनिकेभ्यो दातुं कोशं विहायान्या सामग्री सर्वा सम्पन्नैवास्ति तथापि पुनरपि संपादयामीति । एतस्या वार्त्ताया दिनचतुष्टये पञ्चके वातीते कान्यकुब्जात् मिर्जानूरदी अतित्वरया आजगाम । एवं मन्ये – यत् तैः सेनाध्यक्षैः मिर्जानूरदीकेन समम् एकवाक्यता कृता स्थितेत्यतः तदागमनेन पूर्वनिश्चयो दृढो बभूव । पुनरपि मुहम्मदगाजीतोगबायः सेनाध्यक्षाणां निकटे प्रस्थापितः । तैश्च पुनरपि तदेव प्रत्युत्तरं दत्तम् । इदं च विशिष्योक्तम्—यत् अस्मद्वचोङ्गीकारस्येदमेव चिह्नम् यत् सर्वजनसमक्षं शयेखफूलस्य शिरश्छेदः[५] क्रियते । वयं च तदैव प्रतीमो[६]

१. मिर्जाकनैते । २. वार्त्ता । ३. पर्यन्ति । ४. चातं । ५. शिरःछेदः । ६. प्रत्येमः ।

* Notwithstanding the mark *in the Ms. there is no break in it.

यत् त्वमपि पातिशाहात् विमुखोसीति। तदैव च वयं निश्चिन्ततया त्वद्दर्शनं कुर्म इति। अत्रान्तरे च शयेखफूले कटकप्रस्थानसामग्रीं सम्पादयति मुहम्मदगाजीमिर्जानिकटे आजगाम। ततश्च मिर्जानूरदीकैकवाक्यतया मिर्जाहिंदालेन प्रागुक्तवार्त्तायां निर्णीतायां मिर्जाज्ञया मिर्जानूरदीकः शयेखफूलं स्वगृहाद् बद्ध्वा नीत्वा यमुनामुत्तार्य पातिशाहीयोद्यान-सैकतेस्य शिरश्चिच्छेद। ततश्च तैः सेनाध्यक्षैः मिर्जादर्शनं कृत्वा कुमुहूर्त्ते खुतुबा पठितः अग्रे च प्रस्थानमकारि। दिलदारआगाचहनाम्न्या च मिर्जाहिंदालजनन्या अन्याभिश्च मातृभिर्या या निषेधशिक्षाः कृतास्ताः निष्फला अभवन्॥

यदा च खुतुबा स्वनाम्ना[1] पाठितस्तदा मातुर्निकट आगतः। आगत्य च मातरं नीलनिचोलां दृष्ट्वा पप्रच्छ – सुखसमये किमित्येतादृशी तिष्ठसीति। सा चोवाच - यदहं तव मरणकालीनपरिधानवत्यस्मि यतस्त्वम् ऋजुमार्गं विहाय दुर्मन्त्रिमन्त्रेण कुपथे प्रयासीति। ततश्च मुहम्मदबख्शी आगत्योवाच – शयेखफूलो हत एव मां किमिति मुञ्चथ। ततो मिर्जा तमाश्वास्य संश्चकार[2]। इमां च सकलवार्त्तां यादिगारनासिरमिर्जा तथा मीरफकीरअली एतौ श्रुत्वा[3] कालपीतो ग्वालेरिमार्गेण ढिल्लीं जग्मतुः। गत्वा च तद्दुर्गदार्ढ्ये यत्नं चक्रतुः। मिर्जा च फिरोजाबादनिकटवर्त्तिहमीदपुरं प्राप्त इमां वार्त्तामश्रृणोत्[4]। श्रुत्वा चेमां वार्त्तां मिर्जा तथा सेनाध्यक्षाश्च ढिल्ल्या अवश्यग्राह्यतां निर्णीय तदभिमुखं प्रतस्थुः। इतस्ततो बहवः सामन्ता आगत्य मिर्जामिलनमकुर्वन्। ततश्च मिर्जा दैनंदिन-गमनेन ढिल्लीं प्राप्यावरुरोध। यादिगारनासिरमिर्जा तथा मीरफकूरअली च दुर्ग-संरक्षणे यथोचितं यत्नमकुर्वाताम्। अपरं च मिर्जा कामराकायेमं समाचारं विलिख्य श्रीमदागमनेन कार्यनिर्वाहो भवितेति व्यजिज्ञपताम्। मिर्जाकामराके च सोनपथं प्राप्ते मिर्जाहिंदालो भग्नमनोरथो भूत्वा आगरामाजगाम। ततश्च मिर्जाकामराके ढिल्ली-निकटं प्राप्ते यादिगारनासिरमिर्जाकं दुर्गमध्ये तद्रक्षणार्थमवस्थाप्य मीरफकूरअली दुर्गतो बहिर्निर्गत्य मिर्जाकामरादर्शनमकरोत्। बहुधा सूक्तिभिः प्रबोध्य आगराप्रदेशं प्रस्था-पयामास। मिर्जाहिंदालश्च आगरायामवस्थातुमशक्तः अलवरप्रदेशं जगाम। मिर्जाकामरा च आगरामागत्य मिर्जाहिंदालमातरमभ्युपेत्य मिर्जाहिंदालमाश्वास्यानयनपत्रं प्रेषयेति व्यजि(ज्ञ)पत्। तया च स अलवरत आहूय गले सारसनं दत्त्वा मिर्जाकामराकेन समं

१. नाम्न्या। २. सञ्चकार। ३. श्रुत्वा। ४. ०मश्रुणोत्।

मेलितः । मिर्जाकामराकेन च स यथोचितं सत्कृतः* । दिनान्तरे च कृतापराधानां सेनाध्यक्षाणामपराधान् क्षान्त्वा तेषां प्रणामो गृहीतः । ततश्च मिर्जाकौ सेनाध्यक्षाश्चै-कवाक्यतया यमुनामतीत्य शेरखांपराजयाय प्रतस्थुः । भाग्यविपर्ययेण चेदं कार्यमेतेभ्यो न निष्पन्नम् ॥

प्रकृतमनुसरामः ॥

यदा च जगदीशानुग्रहेण बंगालदेशो जन्नताशयानीनां हस्ते पतितस्तदा तत्रैव राजधानीमकुर्वन् । सेनाध्यक्षा अपि जागीरीति प्रसिद्धान् समीचीनान् वेतनदेशान् प्राप्य सुखमग्ना बभूवुः । अरकानदौलति इति प्रसिद्धा निकटवर्त्तिनोपि देशचर्चां विस्मृतवन्तः । दुष्टाश्च स्थले[1] शिर उत्थापितवन्तः । सत्या च वार्त्ता[2] तत्कटके कापि न प्रविष्टा अभवत् । योपि कश्चित् निकटवर्त्ती सत्यां काञ्चित् वार्त्तां जानन् स्थितस्तामपि जन्नताशयानीनां सविधे वक्तुं न शशाक । तादृशी रीतिरुत्पन्ना स्थिता यदनपेक्षितां वार्त्तां कोपि वदन्न स्थितः । यदा चेयं द्वन्द्ववार्त्ता जन्नताशयानीनां कर्णपथमागता तदा निकटवर्त्तिन आहूय प्रस्थानमरोचयन् । यद्यपि वर्षा भूयसी स्थिता तथापि कार्यगौरवेण प्रस्थिताः । बंगालदेशं जाहिदबेगाय दातुमारब्धवत्स्वपि सोल्पभाग्यवत्तया ततः प्रपलाय्य मिर्जाहिंदालनिकटे आगतः स्थितः । ततश्च जहांगीरकुलीबेगाय बंगालदेशस्य सकला-धिकारं दत्त्वा तत्संगे बहून् लोकाय संस्थाप्य (त)तो वर्षामध्ये प्रस्थिताः ॥

शेरखां च बंगालादेतदागमनवार्त्ताम् आगरातश्च मिर्जाकयोरागमनवार्त्तां श्रुत्वा जवनपुरं परित्यज्य रोहितासमगमत् । स्वमध्ये चेदं निर्णीतवान्-यदि पातिशाहो मदुपर्या-याति तदाहं युद्धमकृत्वैव झाडखण्डपथा बंगालं गमिष्यामि । यदि च ऋजुमार्गेण आगरां यास्यति तदा तत्पृष्ठतो गत्वा रात्रौ तदुपरि निपतिष्ये । यदा च पातिशाहा नरहनं प्राप्तास्तदा शेरखां तेषां कटकस्याल्पतां विसामग्रीकतां चालोक्य तदभिमुखं प्रस्थाय कालं प्रतीक्षमाणः स्थितः ॥

---

* Translation :—That matron (*Kadbānū*), the pavilion of chastity, brought M. Hindāl from Alwar and introduced him to M. Kāmran with his shroud (*fūța*) round his neck.

१ स्थलेर । २ सत्यां च वार्त्तां ।

शेरखांवार्त्तां च कोपि जानन्न स्थितः। अन्निअलीकरावल्बेगी गत्वा तद्वार्त्तां तथ्यामानयामास मिर्जामुहम्मदजमाकस्यैकवाक्यतया च पातिशाहान् श्रावयामास। पातिशाहाश्च गङ्गामुत्तीर्य आगरां प्रस्थिता अपि तस्य निकटागमनवार्त्तामुपलभ्यातिरोषेण तदभिमुखं प्रतस्थुः। यद्यपि लोकैर्विसामग्रीकतया अश्वानां कर्दममध्यागमनेन अबलतया च बहुधा निषिद्धास्तथापि तद्वचो नाकर्ण्य तदभिमुखं जग्मुरेव ॥

अग्रे बहुतरसमीचीनफलस्य दातव्यतया जगदीश एतान् दुःखमध्ये मज्जयामास। अतएवैते विश्ववशीकरणयोग्यसैन्यसमाजेपि अत्यल्पनिर्बुद्धिप्रतिष्ठानसैन्यतः तां दशां प्राप्ताः। अंतएव निजमन्त्रिमन्त्रव्यतिरेकेणापि तदुपरि प्रस्थिताः भोजपुरनिकटे च शेरखांकेन समं संगतवन्तः। कर्मनाशा चोभयकटकमध्यवर्त्तिनी स्थिता। एते च सेतुं बद्ध्वा तामुत्तीर्य पारे गताः। यद्यप्येतेषां कटकमल्पं विसामग्रीकं च स्थितं तथापि प्रत्यहं करावल्संज्ञकयोर्नासीरवलयोर्युद्धे प्रवृत्ते एतेषामेव नासीरबलस्य जयो बभूव। बहुदिन-पर्यन्तं चैवं जायमानं स्थितम्। समस्तद्वीपग्रहणसमर्था अप्येतेषां भ्रातरो विचारं कुर्वाणा एव नैतान् प्राप्ताः। एतत्कार्यकरणयशो न तैः प्राप्तम्। एतैश्च बहूनि शिक्षापत्राणि प्रेषितानि। परन्तु तैः दुष्टान्तःकरणतया नाङ्गीकृतानि। शेरखांकश्च रोवाहबाजी इति प्रसिद्धानि नैकान्तिकानि चरितानि कुर्वन् स्थितः। तद्यथा—कदाचित् समोचोनान् महतो[1] मनुष्यान् प्रस्थाप्य[2] सामवार्त्तां चकार। स्वयं च समरसामग्रीं सम्पादयामास। कदाचिच्च स आग्नेयास्त्राणि निधाय तत्र च पदातिबहुलान् जनान् संस्थाप्य स्वयं वसतिद्वयं त्रयं वा परावृत्य ययौ। एतेपि तदीयकपटवृत्तान्तानभिज्ञतया वसतिद्वयं परावृत्ताः। परमेश्वरस्या-भीष्टतया भाविनोर्थस्य गौरवेण चैतेषां लोकाः संरक्षणे असावधाना बभूवुः। तदानीं च मुहम्मदजमामिर्जाकस्य चतुष्क्यां शेरखां अर्द्धरात्रे निर्गत्यातित्वरितगमनेनागत्य प्रभाते स्वसैन्यं त्रेधा विभज्य तत्रैकत्र स्वयं स्थितः। परत्र च स्वसुतो जलालखांकः स्थापितः। अपरत्र च खबासखांकः। एवं क्रमेण निपत्य पल्ल्ययनमपि कर्तुमशक्तान् एतत्सैनिकान् व्याकुलीचकार। जन्नताशयान्यश्चेमां वार्त्तां श्रुत्वा कान्दशीका भूत्वा उपायतन्तुभ्रष्टा बभूवुः। प्रस्थानसमये चैतेषां बाबाजलायिरः तथा तुरुदीबेगः कुच्बेगीय एतौ प्राप्तौ आज्ञप्तौ च-यत् युवां त्वरितं गत्वा पटगृहाभ्यन्तरतो हाजीबेगिमसंज्ञकां पत्नीमानयतमिति। एतौ च गत्वैव पटगृहद्वारि प्राणैर्वियोगमलभेताम्[3]। अपि च मीरपहलवानबदख्शी

१. महतौ। २. परस्थाप्य। ३. प्राणैर्वियोगमलभतं।

बहुतरैर्लोकैः परिवृतः पटगृहप्राकारपरितोमरनारीणामतिथिर्बभूव। तदानीं च जगदीशकृपया तत्पातिव्रत्येन च तत्पटगृहमध्ये समागन्तुं कस्यापि शक्तिर्न बभूव। ततश्च शेरखां स्वयमागत्य पटान्तरितामविचलितधर्मां यथोचितं संभाव्य तां प्रस्थापयामास ॥

जन्नताशयान्यश्च गङ्गामुत्तरितुं सेतुसंमुखं प्रस्थिताः तं सेतुं मध्ये त्रुटितमपश्यन्। ततश्चाश्वमारुह्यैव गङ्गोत्तरणे सयत्ना दैवयोगेनाश्वतो निपेतुः। ततश्च जीवनादृष्टयोगात् कश्चित् सक्कानामको जलवाहकः प्राप्तः। तत्साहाय्येन च कथं कथमप्युत्तीर्य पारमागताः। ततश्चैतैः स सक्का इति प्रसिद्धो जलवाहको नाम पृष्टो निजाम इति नामाकथयत्। ततश्चैतैरुक्तम्—यत्त्वं निजामअवलिया इति प्रसिद्धो निजामयोगी असि इत्युक्त्वा च तेन समं प्रतिज्ञां कृतवन्तः—यदस्मासु कुशलेन सिंहासनमारूढेषु दिनार्धराज्यलक्ष्मीभाजनं त्वं भविष्यसीति। अयं च वृत्तान्तो नवशतोत्तरं षट्चत्वारिंशत्तमे वर्षे सफरमासस्य नवमतिथौ गङ्गातटे चौसाघट्टे बभूव। मिर्जामुहम्मदजमा तथा मुल्लामुहम्मदपरगली तथा मुल्लाकासिमअलीसद्र् तथा मुल्लाजलालठट्ठ एतेन्ये च पण्डिता बहवश्च सेनाध्यक्षाः गङ्गामध्ये निममज्जुः। ततश्च जन्नताशयान्यः स्वयं मिर्जाअस्करीसहिताः परिमेयपुरस्सरा आगरामागताः। ततश्च मिर्जाकामराचरणदर्शनमकरोत्। कियत्सु दिनेष्वतीतेषु मिर्जाहिंदालो मिर्जाकामराकस्य स्वमातुश्च आज्ञावशतः तावैव[1] द्वारीकृत्य अलवरत आगत्यैतेषां चरणपङ्कजमपश्यत्। एतेपि तदपराधान् अनुक्त्वैव स्नेहादराभ्यां तं दृष्टवन्तः। एते चावश्यभाविन्या भूताया वार्त्तायाः प्रतीकारार्थं यतत्सु नानादेशेभ्यः सैनिकेष्वागच्छत्सु स निजामसक्का समागच्छत्। ततश्चैतैः तं दूरादेव दृष्ट्वादरेण संभाव्य शून्यीकृते सिंहासने समुपवेश्य अर्द्धदिनपर्यन्तं राज्यलक्ष्मीभाजनं कृत्वा अनुचिताज्ञादानेषु चास्वातन्त्र्यं[2] विधाय स्वप्रतिज्ञाभारो निर्व्यूढः। ततश्च स निजकुलेन समं परामुन्नतिं नीतः। दिनार्द्धं च तदाज्ञा सर्वैरनुमता सर्वत्र च तदाज्ञानुसारेणैव व्यवहारो जातः। इदमद्भुतं दृष्ट्वा मिर्जाकामराकः प्रहृष्टमना अभवत्।

ततश्चैतदवस्थोत्तरं[3] शेरखांको बंगालं प्रति प्रस्थाय विहारनगरं प्राप्य स्थित्वा च तत्र जलालखांकं निजतनयं बहुभिर्लोकैः परिवृतामग्रे प्रस्थापयामास। स च गत्वा जहांगीरकुलीबेगेन समं युयुधे[4]। जहांगीरकुलीबेगोपि परमयत्नवानपि जगदीशस्यान्यादृशेच्छावशतोन्यथैव फलमवाप। (स) सुखमग्नतया तत्रत्येषु सेनाध्यक्षेषु साहाय्यमकुर्वत्सु

१ तेनैव। २ चास्वतंत्रं। ३ ०श्चै तदवस्पोत्तरं ४ युयुद्धे।

पदस्थैर्यमलभमानो भौमिकान्* शरणमागतः । तेषां चासत्यप्रतिज्ञतया बहुभिर्लोकैः समं निधनमगमत् । ततश्च शेरखां बंगालदेशान्निश्चिन्तो[१] भूत्वा यवनपुरप्रदेशमागत्य तं देशं वशे चकार । कुतुब्खांनामा च तस्य कनीयान् तनयो बहुभिर्लोकैः समं कालपीप्रदेशं इटावाप्रदेशं चागत्य तत्र द्वन्द्वमुत्पादयामास । यदा चेयं वार्त्ता जन्नताशयानीभिः प्राप्ता तदा यादिगारनासिरमिर्जा तथा कासिमहुसेनखांउज्वख्-एतयोरेव स वेतनदेशः स्थितः तथा सिकन्दरसुलतां यः मिर्जाकामरादिशि केषांचित् कालपीप्रदेशानां संरक्षणं कुर्वन् स्थितः एते त्रयोपि तत्प्रदेशे प्रस्थापिताः । एतैश्च तत्र गत्वा सम्यक्तया समरं विधाय ते सर्वे विजिताः । कुतुब्खांकश्च निहतः ॥

हजरतिजन्नताशयान्यश्च बहुकालम् आगरायां स्थित्वा कटकसमाधानं निजवधूनां मनः समाधानं कुर्वन्तः स्थिताः । तदा च मिर्जाकामराकस्य भूयस्यः शिक्षाः कृताः परन्तु फलं किमपि नाभवत् । तादृशे विषमे समये विपक्षस्यापि सतो बाह्यप्रीतिरक्षणं कृत्वा सहावस्थानमुचितम् किमुत काबुलदेशात् दावरजिमीपर्यन्तं समानापर्यन्तं च वश्यदेशस्य । परन्तु यथा तेन ज्येष्ठभ्रात्रा गुरुसमेन समं व्यवहृतम् तथा फलमपि प्राप्तम् । यद्यपि तस्य बहून्यस्वास्थ्यान्युत्पन्नानि तथापि पश्चात्तापमप्राप्यैव एते स्वस्मिन् स्निग्धा न कृताः ॥

प्रथमतः खोजहकलांबेगं बहुतरसैन्येन समं लाहोरं प्रस्थाप्य पश्चात् निजवंशात् मुखं परावृत्य स्वयमपि प्रस्थितः । हजरतिजन्नताशयानीभिः बहुधा प्रत्यहं स्वीयलोकान् स्थापयेत्युक्तोपि एतदीयान् लोकान् दुर्मन्त्रयित्वा गृहीत्वा च गतः मिर्जाहैदर्नामा मुहम्मदहुसेनकुरुगांसुतः फिरदौसमकानीनां भागिनेयः मिर्जाकामराकेन समम् आगरामागत्य सेवां कृत्वा परां सम्पदं प्राप्य स्थितः । सोपि मिर्जाकामराकेन स्वास्थ्यं प्रकाशयित्वा सह नेतुमपेक्षितः । तेनापि स्वगमनं मनसि निर्णीय विदाययत्न आरब्धः । तदा च जन्नताशयानीभिराज्ञप्तम् – यदि सम्बन्धः पुरस्क्रियते तदावयोर्द्वयोरपि स सम एव । यदि च सौजन्यं तदास्माभिरेव समं साम्प्रतं तत्प्रकटीकृतमस्ति । यदि च नाम ख्यापनीयमस्ति तदा तस्यात्रैवावसरः यतो वयं शत्रूणामुपरि प्रतिष्ठमानाः स्मः । यच्च मिर्जाकामराकस्यास्वास्थ्यानुरोधेन तेन सह गमनम् तत्रापि न भवान् वैद्यः । यच्च मिर्जाकामराकेन लाहोरग्रहणं मनसि कृतमस्ति तदपि न किञ्चित् । यतो अस्माकं

* Translation:—Zamīndārān (landlords).

१. निश्चिंते ।

जये जाते कथं वा मुखं प्रदर्शयिष्यते। वैपरीत्ये तु कथं भवतां हिंदुस्तानमध्येवस्थानं भविष्यति। येन चायं विचारो मिर्जाकस्योपदिष्टोस्ति स प्रायशो वातुलोस्ति[१]। कपटेन वा तदनिष्टं मनसि कृत्य[२] एवमादिष्टे च मिर्जाहैदरः भाग्यवत्तया जन्नताशयानीभिः समं प्रस्थातुं मनश्चक्रे। मिर्जाकामराकोपि सहस्रत्रयमश्ववाराणां गुगूदलं मिर्जाअब्दुल्लाह-संज्ञम् अध्यक्षं कृत्वा एतैः समं प्रस्थापयामास स्वयं च सह न ययौ ॥

१ स प्रायशो वातुलोस्ति स प्रायशो वातुलोस्ति। २ मनसिकृत्यः।

(Chapter XXVI)

अथ हजरतिजन्नताशयानीनां पूर्वदिशि शेरखांजयार्थं गमनं परावृत्तिसमयवार्त्ताश्च निरूप्यन्ते ।

परमेश्वरस्य द्वारि अन्यादृशे कार्ये सति अन्यादृशे मनुष्यापेक्षिते सति अन्यथाभावे परमेश्वरस्य शुकुरसंज्ञको नमस्कार एव कर्त्तुमुचितः न तु तस्य निन्दादि । अतएव प्रकृतेपि परमेश्वरस्यान्यथैवाभीष्टत्वात् एतादृशयोरप्यनयोर्भ्रात्रोः परस्परमैकत्यमभज्यत । हजरतिजन्नताशयान्योपि स्वल्पेनैव सैन्येन समं बहुसैन्यपरिवृतशत्रूणामुपरि प्रस्थिताः ॥

यदा चैते भोजपुरं प्राप्ताः तदा शेरखांको गङ्गापारे समुपविवेश । हजरतिजन्नताशयान्यः स्वल्पैरेव जनैः समं पारेगमनं मनसि चक्रुः । ततो भोजपुरनिकटे सेतुं स्वल्पेनैव कालेन बबन्धुः । ततश्च प्रायशः सार्द्धशतं शूरैर्यक्जुवान इति प्रसिद्धैरेकाकिभिरश्ववारैः विनैव पल्ययनमश्वारूढैः समं गङ्गामुत्तीर्य बहुतरं युद्धं कृत्वा तान् पराजित्य परावृत्ताः । प्रतिष्ठानैश्च गिर्द्बाजनामा हस्ती चौसाघट्टीययुद्धे एतदीय एव प्राप्तः स्थितः स सेतुभङ्गार्थं प्रस्थापिताः । तेन च हस्तिना सेतुपर्यन्तमागत्य स सेतुर्भग्नः कृतः । ततः स हस्ती भग्नास्थिपञ्जरो ममार । शत्रुसैन्यं च पलायनं चकार । एतेषां च शूरा युवानः कुशलेन परावृत्यागताः । ततश्चैते गङ्गातटेनैव कान्यकुब्जं प्रति गमनं समीचीनमिति निश्चित्य शनैः प्रतिदिनं जग्मुः । मध्येमार्गं च शत्रुनौका दृक्पथमागताः । ततश्च पातिशाहीयमहाग्नेयास्त्रप्रयोगेण तेषां महती नौका भग्ना कृता । मासपर्य्यन्तं कान्यकुब्जनिकटे सैन्यद्वयं समकक्षतयावस्थितं स्थितम् । मुहम्मदसुल्तांमिर्जा तथा तत्सुतौ तुलुग्मिर्जा-शाहमिर्जानामानौ यौ मातृक्रमेण सुल्तांहुसेनमिर्जांकं प्राप्तौ पितृक्रमेण च साहिबकिरानीकं प्राप्तौ फिरदौसमकानीभिश्च परामुन्नतिं नीतौ फिरदौसमकानीमरणोत्तरं जन्नताशयानीभिः समं विपक्षतां कुर्वाणौ स्थितौ यथा मया पूर्वमपि लिखितमस्ति । एते स्वामिद्रोहेण मनोरथानप्राप्य पुनरपि जन्नताशयानीनां सेवार्थमागताः । एतैश्च ते स्वमाहात्म्यानुरोधेन तदपराधान् कृतानकृतान् गणयित्वा संपद्वृद्धिं नीताः । जन्मप्रभृति दुष्टास्ते तादृशेपि समये स्वयं प्रपलायिता अन्यानपि सह नीतवन्तः । अन्येपि बहवो लोका दुष्टा-

न्तःकरणाः पलायनं चक्रुः । तदेतैर्निर्णीतम् - यत् वयं गङ्गामुत्तीर्य युद्धयामहे यद्भावि तद्भवतु । यदि चात्र शैथिल्यं क्रियते तदा लोकेषु प्रतिदिनमपयातेषु सैन्यक्षैण्यं भविष्यति इति निर्णीय सेतुं बबन्धुः । बद्ध्वा च सेतुमुत्तीर्य सैन्यावासस्थले परिखां कृत्वा स्थले स्थले चाग्नेयास्त्ररथान् संस्थाप्य सैन्यभूभागं रक्षणार्थं विभज्य लोकेभ्यो ददुः । शेरखांकोपि स्वसैन्यावासं[1] परितः परिखां चकार । कटकबहिर्निर्गतानां लोकानां प्रत्यहं समरो बभूव । अत्रान्तरे च श्रावणमासे समागते वर्षाजलप्लाविते सैन्यावासस्थले स्थातुमशक्नुवद्भि-र्जन्नताशयानीभिरादिष्टम् - यदुच्चं निवासार्थं स्थलं विचार्य सर्वेपि सैनिकाः सन्नह्य २ ब्यूहं रचयित्वा स्थिता भवन्तु । ततो विचारितस्थले कटकसंनिवेशः क्रियताम् । यदि च शेरखां युद्धोद्यतो भविष्यति तदा योद्धव्यम् । नोचेत् सेनानिवेशमात्रं कर्त्तव्यमिति । नवशतोत्तरं सप्तचत्वारिंशत्तमे वर्षे मुहर्रममासस्य दशम्यां तिथौ अनेनैवोद्देशेन प्रस्थानमकुर्वन् व्यूहं च रचितवन्तः । मुहम्मदखांरूमी तथा अुस्ताअलीकुलीपुत्राः तथा अुस्ताअहम्मदरूमी तथा सनखुल्फातिः य एते आग्नेयास्त्रसम्बन्धिकार्यस्य तोबखाना इति प्रसिद्धस्याध्यक्षाः स्थितास्तै रथा महाग्नेयास्त्राणि च यथोचितं संनिवेशितानि । ततश्च कटकमध्यप्रदेशे गोल इति प्रसिद्धे[2] स्वयमभूवन् । गोलाग्रतो मिर्जाहिंदालः कटकदक्षिणपार्श्वे बरंगार इति प्रसिद्धे मिर्जाअस्करी कटकवामप्रदेशे जुंगार इति प्रसिद्धे[3] यादिगारनासिरमिर्जा बभूव ॥

मिर्जाहैदरेण स्वकृताख्यायिकायां तारीखरसीदीसमाख्यायामिदं[4] लिखितमस्ति— यदहं तस्मिन् समये वामप्रदेशे स्थितः । परन्तु मम दक्षिणस्कन्धः तेषां वामस्कन्धेन संघर्षणं प्राप्तः स्थितः । ममापि वामप्रदेशे सप्तविंशतिः सेनाध्यक्षाः तोगा इति प्रसिद्धराजचिह्नधराः स्थिताः इति । शेरखांकेनापि स्वसेना पञ्चधा विभक्ता । तत्रातिमहान्तौ द्वौ विभागौ परिखातो बहिरवस्थापितौ । त्रयोश्चसेनानिवेशा[5] एतत्कटकाभिमुखं प्रस्थापिताः । जलालखां तथा सरमस्तखां तथा सर्वेपि न्याजीवंश्याः मिर्जाहिंदालाभिमुखं प्रस्थिताः । मुवारिजूखां तथा बहादुरखां तथा रायहुसेनजलवानी तथा एकः किरानीसार्थ एते यादिगारनासिरमिर्जाभिमुखं प्रस्थिताः । खवासखां तथा बरमजिद् अन्येपि बहवो लोकाः मिर्जाअस्करीसंमुखमागताः । तत्रादौ मिर्जाहिंदालजलालखांकयोः कचाकचि युद्धं बभूव । ततो जलालखां वाहात् पपात । पातिशाहीयैश्च व्यूहवामभागस्थितैर्लोकैः

---

१. ०वास० । २. यसिद्धे । ३. कटकवामप्रदेशे जुंगारेतिप्रदक्षिणपार्श्वे बरंगारेति प्रसिद्धे मिर्जाअस्करी कटकवामप्रदेशे जुंगारेति प्रसिद्धे । ४. ०समाखयाया इदं । ५. त्रयाश्वसेनानिलेशा ।

स्वप्रतिद्वन्द्विभिर्लोकैस्समं युद्धं कृत्वा तान् पराजित्य विपक्षव्यूहमध्यभागे निपत्य युद्धं कृतम् । ततश्च शेरखांकः इमं वृत्तान्तं दृष्ट्वा महता सैन्येन समं खवासखानीयैश्च लोकैस्समं सर्वसाधारणेन मिर्जाअस्करीकोपरि निपपात । ततः प्रतिष्ठानबलाधिक्यं दृष्ट्वा एतदीयाः सेनाध्यक्षाः इतस्ततः पलायांबभूवुः । हजरतिजन्नताशयान्यश्च वारद्वयं शत्रूणामुपरि निपेतुः वारद्वयं चायुद्ध्यन्त एकस्यां शक्तौ भग्नायां शक्त्यन्तरं जगृहुः तस्यामपि भग्नायां यावच्छक्ति शस्त्रान्तरेण युयुधुः । एतेषां बन्धुभिश्च तत्समयोचितः कोपि व्यवहारो न कृतः । सेनाध्यक्षैरपि युद्धभूमौ पदं स्थिरं न कृतम् । स्वस्वामिनस्तादृशी अवस्था प्रमाणीकृता । एतैर्हि स्वल्पेन वाङ्मानसविसंवादिना सैन्येन समं यद्युद्धोद्योगः कृतस्तेनेदं ज्ञायते यदेतेषां तादृशजीवनान्मरणमेव प्रियमासीदिति । तेनैते स्वयमेव सर्वभावेन युयुधुः । ततश्चैतेषां कश्चिदेकः शुभाशंसक आगत्य बहुधा प्रार्थयित्वा जीवन्नरो भद्रशतानि पश्येत् इत्यादि प्रबोध्य समरतो निवृत्तांश्चकार । एतस्य शाहनिशाहकस्योत्पत्तिदिनानां संनिहिततया जगदीश्वरेणैतेषामिदमद्भुतं किंचिन्नयनगोचरीकृतम् ॥

प्रकृतमनुसरामः ॥

प्रायशः क्रोशत्रयोपरि गङ्गातटात् समरो बभूव । ततश्चैतेषां सेनाध्यक्षा विनैव युद्धं प्रपलाय्य गङ्गातटं प्राप्ताः । ततश्चास्यैव पलायनस्य स्वामिद्रोहस्य च फलं गङ्गामध्ये निमज्जनमेव लेभिरे । ततश्चैते जन्नताशयान्यः सावधाना भूत्वा मत्तेभमारुह्य गङ्गामुत्तीर्णाः यदा च तटं प्राप्तास्तदा उपर्यारोहणपथमलभमाना[१] व्याकुलतामासादयन्तो निमग्नावशिष्टेन केनचित् सैनिकेनोपरि गत्वा हस्तावलम्बं दत्त्वा उपरि नीताः । एतैश्च तन्नाम तन्निवासभूश्च पृष्टा । तेन चोत्तरितम्--मम नाम शम्सुद्दीमुहम्मदः । गजनीदेशश्च निवासभूः । मिर्जाकामराकस्य च सेवकान्तर्गतोस्मीति । ततश्चैतैः स बहुधाश्वासितो यत्तुभ्यं भूयसीं सम्पदं दास्यामीति । अत्रान्तरे मिर्जाकामरासेवको मुकद्दमबेगनामातिप्रतिष्ठित एनान् पातिशाहा इति परिचिन्वन् निजमश्वमेतेषामारोहणार्थमुपायनीचकार । एतैश्च तेन समं समीचीनाः संपद्दानप्रतिज्ञाः कृत्वा आगराभिमुखं प्रस्थानमकारि । मध्येमार्गं मिर्जाका आगत्य सह प्रतस्थुः भूदूगांवसंज्ञकनगरोपान्तमागताश्च । ततः तद्ग्रामस्था लोका एतदीयलोकेभ्योन्नादिकमविक्रीणन्तो ग्रामगतान्[२] लोकान् निजघ्नुः । श्रुत्वा[३] चेमां वार्तां जन्नताशयान्यः तेषां निग्रहाय मिर्जाअस्करीकं तथा यादिगारनासिर-

१. ०पथमलभन्तो । २. कागतान् । ३. शृत्वा ।

मिर्जाकं तथा मिर्जाहिंदालं प्रस्थापयामासुः। विपक्षा[1] अपि प्रायशः त्रिंशत्सहस्र-परिमितान् अश्ववारान्[2] पदातींश्च मिलित्वा स्थिताः। तत्र च पातिशाहाज्ञया यादिगार-नासिरमिर्जाकः तथा मिर्जाहिंदालश्च प्रस्थानमरोचयेताम्। मिर्जाअस्करीके चाप्रतिष्ठति यादिगारनासिरमिर्जा तस्मै पञ्चषान् कषाय्वातान् (?) कृत्वा अनयैव बुद्ध्या इमां दशां प्राप्ताः स्थ इत्यादि दुरुक्तीः श्रावयित्वा मिर्जाहिंदालेन समं प्रस्थितः। ततश्च तौ द्वावपि तैर्ग्रामीणैस्समं बहु युद्धं कृत्वा सुबहून् तान् जघ्नतुः। हत्वा च तान् परावृत्त्यागतौ। तत एतैर्मिर्जाअस्करीकसमक्षम् आनाय्य त्वया यन्न गतं तदसमीचीनं कृतमित्यादि बहुधा शिक्षितः। स्वयं चातित्वरितगमनेन आगरां प्राप्ताः दिनान्तरे च सय्यिदरफी अस्य महति सय्यिदकुले प्रसूतस्य शस्त्रेतिप्रवीणस्य सकलपातिशाहमान्यस्य निकटे गत्वा तेन समं मन्त्रं कृत्वा इदमुक्तवन्तः -- यदस्माकं पंचाबगमनमावश्यकम्। यदि च मिर्जाकामराको बन्धुव्यवहारोचितमाचरिष्यति तदास्या दुरवस्थायाः प्रतीकारो भविष्यति इत्यादि विचिन्त्य लाहोरं प्रस्थिताः। मिर्जाअस्करी शंभलं गतः। मिर्जाहिंदालश्च अलवरं गतः। एतस्मिन्नेव वर्षे मुहर्रममासस्याष्टादश्यां तिथौ ढिल्लीनगरे कासिम-हुसेनसुल्तां तथा बेगमीरकश्चैकवाक्यतया एतेषां चरणदर्शनमकुर्वाताम्। भूयांसश्च लोका एतेषां सेवायामागताः। एतन्मासस्य विंशति(मे) दिने अग्रे प्रस्थिताः। ततः रुहतकनगरे मिर्जाहिंदालमिर्जाहैदराख्यौ मिलितौ। ततस्त्रयोविंशतिमे दिने तत्रैव स्थिताः। ततः तद्ग्रामस्थैर्भयात्[3] नगरद्वाराणि मुद्रितानि। ततः स्वल्पतरजनेन नगरद्वाराण्युद्घाट्य तत्रस्थेभ्यो लोकेभ्यः शासनं कृतम्। ततः सफराख्यमासस्य सप्तदशे दिवसे सिंहनदं* प्राप्ताः। ततः तस्य विंशतिमे दिवसे मीरफकीरअलीनामा सेनाध्यक्षः सिद्धिं गतः। ततः लाहोरे मिर्जाकामरा अग्रे आगत्य मिलितः। ततः एते खोजादोस्तमुनशीकस्योद्याने स्थिताः। मिर्जाहिंदालस्तु खोजागाजीकस्योद्याने स्थितः। एतस्मिन्नेवावसरे मिर्जाअस्करी संभलादागत्य अमीरवलीबेगगृहे स्थितः। एतस्मिन्ने-वावसरे शमसुद्दीमुहंमदाख्यो महाभाग्यवान्[4] येन हस्तं दत्त्वा जन्नताशयान्यो निष्कासिताः। तस्य भूयानादरः[5] कृतः। नवशतोत्तरं सप्त चत्वारिंशत्संवत्सरे रबीउल्अबलाख्य-मा(स)स्य प्रथमे दिवसे सर्वे भ्रातरः सर्वे च सेनाध्यक्षाः एकत्र मिलिताः। यद्यपि

१. पिपक्षा। २. परिमिता अश्ववारान्। ३. ततस्तद्ग्राम०। ४. महाभाग्यवान।

५. भूयानाहरः।

*Translation—Sihrind.

एतावत्यो दुःखावस्थाः एतैरनुभूताः तथाप्येतेषां स्वेष्टसिद्धौ कोपि जनो नासीत् । कियद्वारमेतैर्मन्त्रः कृतः स न स्थिरो जातः । ततः सर्वैर्भ्रातृभिः सेनाध्यक्षैश्च महद्भिर्जन्नताशयानीसविधे एकवाक्यतापत्रं सर्वेषां च मुद्रासहितमन्येषां साक्ष्यादिसहितं कृतम् । ततः एक(वा)क्यता संपन्ना । ततः मन्त्र आरब्धः ॥

ततः जन्नताशयानीभिरुक्तम्—एकवाक्यताकरणे* सर्वेपि दुःखं प्राप्नुवन्तीति सर्वैर्ज्ञायते। यथा सुलतांहुसेनमिर्जाकस्याष्टादशपुत्राः समीचीनाः स्थिताः । तेषां राज्यं परस्परैकवाक्यताभङ्गेन शाहीबेगखांनेनापहृतम् । सर्वैर्लोकैश्चैकं पुत्रं विहाय सर्वेपि कुपुत्रा इति निन्दिताः । अन्यच्च । फिरदौसमकानीभिः अतिदुःखेनातियत्नेन च हिंदुस्थानं गृहीतम् । तद्यदि अतिनीचहस्ते पतति तदा अतिमहान्तो लोका भवदीयां निन्दां करिष्यन्तीति। इतः परं भवद्भिः स्वहृदये सम्यग् विचार्य (यथा) लोकः[1] परमेश्वरश्च संतुष्टो भवति तथा यतनीयम् ॥

ततः एकवाक्यतां त्यक्त्वा सर्वेपि स्वहृदयस्थां वार्त्तामब्रुवन्। ततः मिर्जाकामराकेणोक्तम् – मन्मनस्येवमायाति । पातिशाहैः मिर्जाकैश्च एकत्र स्वल्पलोकरहितैः पर्वतदेशे गूढे स्थातव्यम् । मया च काबुलदेशे समीचीनस्थलं सर्वमवरोधम् (अव)स्थाप्य भवत्सविधे समागन्तव्यम् । मिर्जाहिंदालयादिगारनासिरमिर्जाभ्यामिदमुक्तम् — इदानीं प्रतिष्ठानैः समं नास्माकं युद्धकालः समीचीनः । इदमेव यत् प्रथमं भःखरदेशं गृह्णीमः । तद्बलेन गूर्जरदेशं गृह्णीमः। देशद्वये गृहीते स्वीयलोकेभ्यः वेतनादि[2] दत्त्वा प्रतिष्ठानेभ्यः स्वीयो देशो ग्राह्यः । मिर्जाहैय्यदरेणोक्तम् – सहरिंदपर्वतमारभ्य सारंगपर्वतपर्यन्तं मध्यप्रदेशे सर्वैर्मिर्जाकैः स्थातव्यम्। अहं प्रतिभूः भवामि। मया च स्वल्पबलेन मासद्वयमध्ये काश्मीरदेशो ग्राह्यः । तत्र च स्वीया लोकाः स्थापनीयाः । शेरखांकस्य काश्मीरदेशागमने मासचतुष्टयमपेक्षितम् । तदीयमहाग्नेयास्त्राणां पर्वतमध्ये तथा प्रभावो न चलति। ततस्तदीयसैन्यनाशो भवितेति। इत्येवं तेषां सभासदां[3] वाक्चेतसोरैक्याभावेनापर्यवसन्न एव विचार आसीत् ॥

---

* This has to be separated as एकवाक्यताया अकरणे ।

१. लोके । २. तेतनादि । ३. सभासदा ।

ततः सर्वे समुत्थिताः । हजरतिजहांवानीकैः मिर्जाकामरा भूयान् शिक्षितोपि स्वहृदयान्यथाभावं [1] न त्यक्तवान् । तस्य मनस्येवमासीत् — सर्वे नष्टा भवन्तु । मया काबुलदेशं गत्वा स्थातव्यम् । मुखोपरि[2] वदति स्म - यत् भवद्भिः सह मया गन्तव्यम् । भवच्छत्रवो नाशनीयाः हृदये चातिकपटः आसीत् । तच्च कपटमेवम् - मिर्जाकामराकेण काजीअब्दुल्लहाख्यसदरः शेरखानिकटे आच्छन्नवेषेण[3] प्रेषितः । तेन सह स्नेहनियमौ कर्तुं पत्रं च प्रेषितम् । यत् पंजावदेशः ममैव च तिष्ठति[4] । भवद्भिरपि चेन्ममैव स्थाप्यते तदात्यविलम्बेन भवत्समीहितं कार्यं मयापि सम्पादनीयम् ॥

एतदनन्तरं शेरषाढिल्लीपर्यन्तमागत्य अग्रे नागतः । शेरखाकेनापि मनसि ज्ञातं यन्ममायं भाग्यस्योत्कर्षः[5] । लाहोरे सैन्यसमूहं ज्ञात्वा मनसि भयं स्थितम् । एतन्मध्ये अब्दुल्लाहसदरः शेरखांनिकटे समागतः । तेनाप्यसावाहृतः । एकवाक्यताभङ्गसुखवार्त्तां श्रुत्वा तदीयपत्रार्थं च ज्ञात्वा तदभिलषितमुत्तरं दत्तम् । सदरेणाप्युक्तम् - भवन्तः तद्देशे चलन्त्विति । तच्छ्रुत्वा शेरखांकेन तेन सह परकीयसकलतत्त्वज्ञानार्थं चरः प्रेषितः । ततः लाहोरस्योद्याने मिर्जाकामरा तस्य मिलितः । जन्नताशयान्योप्याकारिताः । ततः पुनरपि सदरः शेरखां - निकटे प्रेषितः । स च सुलतानपुरनदीतीरे मिलितः । तेन च शेरखां उद्योजितः । एतन्मध्ये मुजफ्फरतुरुकमाख्येनागत्योक्तम् यत् शेरखां नदीमुत्तीर्य समागतः । तेन च मम भ्रातृपुत्रः* जलीदहबेगाख्यो मारितः ॥

ततः जमादिल्आखिरमासस्यान्तिमदिवसे जन्नताशयान्यः समिर्जाका लाहोरनदीमुत्तीर्य चन्द्रभागासमीपे† गताः । ततः जन्नताशयानीभिः अग्रे मिर्जाहैदराख्यः बहून् लोकान् दत्त्वा काश्मीरग्रहणार्थं प्रेषितः । पूर्वं यदा मिर्ज्जाकामरा खंधारदेशे साममिर्जाकेन समं युद्धार्थं गतः स्थितः तदा मिर्जाहैदराख्यं लाहोरे स्थापयामास । स्वस्वामिविरोधं कृत्वा स खोजा-आजी-अब्दालमाकिरी-रेकीचकाख्यं एतेन्ये च बहवः सेनाधिपाः काश्मीरदेशस्थाः मिर्जाहैदर-स्नेहवशादागताः । मिर्ज्जाकामरातः सैन्यं सहायं लब्ध्वा काश्मीरदेशो ग्राह्य इति बुद्ध्या

१. हजरतिजहांवानीकैः मिर्ज्जाकामरा भूयान् शिक्षितोपि स्ववानीकैः मिर्ज्जाकामरा भूशान् शिक्षितोपि स्वहृदयान्यथाभावं । २. मुखौपरि । ३. अछिन्नवेषेण । ४. चेतिष्ठति । ५. भाग्यसोत्कर्षः ।

* The folio No. 166 ends at भातृ, and पुत्रः is continued at the folio No. 169. † Translation Cināb.

समागताः[1] तेषामर्थे च मिर्जाहैदरेण भूयान् यत्नः कृतः। तथापि फलं न निष्पन्नम्। यदा मिर्जाहिंदालेन कुतुबानामकं शुभाशंसनं स्वनाम्ना पाठितम् मिर्जाकामरा च आगरायामागतः तदापि मिर्जाहैदरेण बाबाचुचुकं सैन्याधिपं कृत्वा सैन्यं सहाये दत्तम्। तेन च बाबाचुचुकेन शैथिल्यं तावत्पर्यन्तं कृतं यावत् चौसाग्रामे जन्नताशयानोनामवस्था लोकैः श्रूयते। तत एतदवस्थाश्रवणोत्तरकालं काश्मीरदेशग्रहणं त्यक्तम्। ततः काश्मीरदेशस्थसेनाधिपाः नवपर्वतमध्यस्थनवहराराजौरीनामकग्रामे मिर्जाहैदरा(य) पत्राणि काश्मिरदेशो ग्राह्य इत्यर्थकानि प्रेषयन्तः स्थिताः कालं प्रतीक्ष्य स्थिताः। शहराराततस्तानि पत्राणि जन्नताशयानीनां निकटे मिर्जाहैदरेण प्रदर्श्य यथा तेषां तत्रोत्कण्ठा भवति तथा कृतं स्थितम्। अनेन कारणेन मिर्जाहैदराख्यः काश्मीरे प्रेषितः। ततः जन्नताशयानीभिर्मिर्जाहैदराय[2] आज्ञप्तम् - भवतां काश्मीरदेशस्थ आग्नेयास्त्रप्रेरकः सिकंदरनामा च यदा मिलिष्यति सकलसेनाधिपाधिपश्च खोजाकलाबेगाख्यः यदा भवत्साहाय्यमाचरिष्यति तदा अहं वक्तव्यः मया चागन्तव्यम्। ततः यदा चन्द्रभागासमीपं जन्नताशयानीभिर्गतं तदा मिर्जाकामरा मिर्जाअस्करी एतौ खोजा अब्दुल्लाह(क) - खोजाखांबदं महमूदाभ्यां सहितौ काबुलदेशं गतौ। मुहम्मदसुलतां - मिर्जा - तुलुकमिर्जा - शाहमिर्जाख्य(ा): परस्परविरोधवार्त्तां श्रुत्वा मुलतांनदेशादागत्य सिन्धुतीरे मिर्जाकामराकाय मिलिताः। रजबमासस्य प्रथमदिवसे नवशतोत्तरसप्तचत्वारिंशत्संवत्सरे काश्मीरे गन्तुकामा अपि जन्नताशयान्यो[3] मिर्जाहिंदाल - यादिगारनासिरमिजां - कासिमहुसेनसुलतांप्रभृतिभिः सिन्धुतीरे नीताः। यः खोंजाकलाबेगः स्वीयत्वेनाभिमतः सोपि सालकोटादागत्य मिर्जाकामराकाय मिलितः। आग्नेयास्त्रप्रेरकः सिकंदरोपि सारङ्गपर्वते गतः। एतन्मास्येव पातिशाहोपि मिर्जोक्त्या सिन्धुतीरे चलितः। कियद्वत्सरानन्तरं मिर्जाहिंदाल - यादिगारनासिरमिर्जा-बेगमीरक - भेदेन पृथक् तौ[4] जातौ। मिर्जाकाः सर्वेपि विंशतिदिनपर्यन्तं कान्दिशीका[5] इवासन्। ततः जन्नताशयान्यो दस्ताख्यमार्गेण भक्खर(दे)शे गन्तुकामा मार्गमजानन्तो येन केनापि मार्गेण भ(क्ख)रदेशे गन्तुकामाः येन केनापि मार्गेण गतवन्तो[6] जलान्नादि न लेभिरे। परमेश्वरे भारं दत्त्वा चलन्तः[7]

१. समागता। २. हैंदरयात् ज्ञप्त। ३. काश्मीरे तुकामापि जन्नतशयान्योः। ४. पृथगूवौ। ५. कादिकाशीका। ६. दस्ताख्यमार्गेण भाक्खशेगंतुकाना: मार्गमजानंतो येन केनापिमार्गेण भरदेशेतुकामामाः मार्गमजानंतो येन केनापि मार्गेण गतवंतो। ७. चलंताः।

* The folio No. 168 ends at चलंता:, and स्थिता: is continued at the folio No 170

स्थिताः । तावत्पर्यन्तं गताः यावद् दुन्दुभिध्वानधारा श्रूयते[1] । ततश्चैवं ज्ञातं मिर्जाहिंदाल-यादिगारनासिरमिर्जाख्यौ आगच्छत इति। ततः जन्नताशयान्यः मीरअबुलबकाख्यं मिर्जाकामरातः पृथग्भूता एतद्यात्रायामेव मिलितम् मिर्जाहिंदालादीनां शिक्षार्थं प्रेषयन्ति स्म । तेन च शिक्षयित्वा तावानीतौ । ततः एकवाक्यतया सर्वेपि भक्खरदेशं चलिताः । खवासखां वहुसैन्यसमूहोपेतः आगच्छन्[2] स्थितस्तथापि युद्धं (ते) न कुर्वन्ति स्म । शाबान-मासस्य विंशतिदिनोत्तरदिवसेषु उच्चाख्यमहानगरं प्राप्ताः । तत्र च सय्यिदअमीरमुहंमद-बाकिराख्यः सकलसय्यिदेषु पण्डितेषु च महान् सिद्धिं गतः । तत्रैव महानगरे निखातः । तैर्यद्यपि शोकः प्राप्तः तथापि स्वबुद्ध्या तूर्ष्णीं स्थितः । तत एव वशूलंगाख्यः कश्चित् सौमिकवरस्तस्मै बेगमुहम्मदबकाउलकिंचिवेगयोर्हस्ते परमानसंज्ञकमाज्ञापत्रं शिरोवेष्टना-दिवस्त्राणि च प्रेषितानि खानजहाँ इति नाम च स्थापितम् । तोगनागराख्यं दुन्दुभिशक्ति-विशेषदानं च प्रतिज्ञातम् । उक्तं च - अस्मत्सैन्यस्य अन्नादिकं प्रेषणीयम्[3] । स च तत्स-र्वमग्रे आगत्य बहुमानपुरस्सरं गृहीत्वा तदाज्ञां[4] सर्वामकरोत् । तेनाप्यतेषां[5] योग्यमुपायनं बहु प्रेषितम् । नानाविधवस्तुविक्रेतारोन्नादिविक्रेतारश्च प्रेषिताः । नौकाश्च बह्व्यो नदीमुत्तर्तुं प्रेषिताः । ततस्ते नदीमुत्तीर्य भक्खर प्रति चलिताः ॥

नवशतोत्तरसप्तचत्वारिंशत्संवत्सरान्तर्गतरमजानमासस्याष्टाविंशतिमेदिने भःखरनिकट-वर्त्तिलोहरीग्रामे गताः । मार्गभवोत्कटदुःखपरिहारार्थं स्वयं समीचीनवाटिकायां स्थिताः । अ-न्येभ्योपि उद्यानानि विभज्य दत्तवन्तः । मिर्जाहिंदाल-यादिगारनासिरमिर्ज्जाकौ कियद्दिना-नन्तरं नदीपारे गत्वा स्थितौ । सुलतांमहमूदाख्यः भःखरदेशस्थः शाहहसनकस्तेन बेगस्य सेवक(:तेन) देशमुज्जटं कृत्वा दुर्गरक्षणमारब्धम् । एतत्पारस्थाश्च लोकाः[6] दुर्गनिकटवर्तिनो नीत्वा[7] अत्युच्चैस्तरपाषाणैर्बद्ध्वा[8] स्थापिताः । शाहबेगअरउनपुत्रः शाहहसनबेगः यस्मात् फिरदौसमकानीभिः खंधारदेशो बलात् गृहीतः स्थितः सोयम् । तेन च भःखरदेशः ठठादेशश्च गृहीतः स्थितः ॥

ततस्तस्मै फरमानपत्रं प्रेषितम् त्वया दुर्गं दातव्यमिति । तेन चोक्त्वा प्रेषितम् - अहं शाहहसनबेगस्य सेवकः । स यदि भवत्सविधे समायास्यति तदा मया दुर्गं दायव्यमिति ।

---

१. श्रूयते । २. समूहोपेतेष्टे आगछन् । ३. प्रेखणीयम् । ४. तंराज्ञां । ५. तेनोप्येतेषां । ६. लौकाः । ७. दुर्गनिकुटवार्तिपानीत्व । ८. अत्युच्चतर० ।

तदन्नभक्षणानुरूपं[1] तद्धितमित्युक्त्वा प्रेषितम् कर्त्तव्यमेवे(ति)। तदुक्तं सत्यमिति ज्ञात्वा अमीर-ताहिरसदर-मीरसमंदरौ अतिविश्वास्यौ ठट्टादेशे शाहहसनबेगसमीपं प्रेषितौ। ततस्तेनापि अनयोरादरं कृत्वा सिद्धं सिद्धवंशोत्पन्नं शेषमीरकं सह दत्वा योग्यमुपायनं प्रेषितम्। विज्ञप्तिपत्रं च प्रेषितम् - यत् भःखरदेशे द्रव्यमत्यल्पमुत्पद्यते। युक्तं चैतत् कर्त्तुमुचितम् - यत् जाजकांदेशो बह्वन्नपानीयः समृद्धश्च। द्रव्यं च तत्र बहुतरमुत्पद्यते। अतः स एव ग्रहीतुमुचितः। एतस्मिन्नर्थे मयापि सेवार्थं समागन्तव्यम्। मम भाग्यं यत् भवद्भिरत्रागतम्। यथा यथा मन्मनोभयं गमिष्यति तथा तथा श्रीमच्चरणसविधे समागन्तव्यम्[2]। मय्यागते च गूर्जरदेशोपि ग्राह्यः। सर्वं[3] हिंदुस्थानमपि पश्चाद् ग्राह्यमिति। सर्वश्चेदमतिकपटेनोक्त्वा प्रेषितम्। ततः मिर्जाहिंदालः पातरग्रामे प्रेषितः। स्वयं च तत्रैव लोहंरीग्रामे षण्मास-पर्यन्तं स्थिताः - ठट्टाधिपतिनास्मत्सेवा कर्तव्येति। ततो मिर्जाहिंदालसमीपे स्वयमपि नागताः॥

एतावन्मध्ये शाहनिशाहीकोत्पत्तिकालो व्यवधानेन भवितेति तदनुरूपा सामग्री सर्वापि निष्पन्ना। तत्र च मरयंम्मकानी जन्नताशयानीभिर्विवाहिता[4]। तत्र च विवाहे महान् समारम्भ आसीत्। अनेके सन्तुष्टाश्चासन्। खोजाहिजामीकेन एतद्विभूयसी सेवा प्रदर्शिता। ततः स्वसैन्यमध्ये पुनः परावृत्त्य समागताः। तत्र च बहुकालं स्थिताः। तत्रत्यभौमिका-भाग्येन तस्मिन् देशे बहु दुर्भिक्षमासीत्। ततः मिर्जाहिंदालो यादिगारनासिरमिर्जाकपटो-पदेशेन कंधारदेशस्थमिर्जाकामराकाधिकारिकराचखाकस्य त्वया समागन्तव्यमिति संदेशेन च कराचखां कंधारदेशं जगाम। यादिगारनासीराय उक्त्वा प्रेषितम् - यत् इतः कराचखांकोक्त्या[5] चास्माकं कंधारदेशे गमनम्[6]॥

अतः एतद्वृत्तान्तजातं[7] श्रुत्वा नवशतोत्तरमष्टचत्वारिंशत्संवत्सरान्तर्गतजमादिल-अवलाख्यमासस्याष्टादशे[8] दिवसे मङ्गलवासरे जन्नताशयान्यो मीरअबुलबकाख्यस्य गृहे गताः। गत्वा च समीचीनाः वार्त्ताः कृत्वा यादिगारनासीरकपटनिराकरणार्थं तं तन्निकटे प्रेषितवन्तः।* तेन च तत्र गत्वा तथैवाकारि। तेनाप्यङ्गीकृतम् -- मया तथैव कर्त्तव्यमिति। उक्तं च - तदा नदीमुत्तीर्य पादमूलमायास्यामि। सेवामाज्ञां च करिष्यामि। यदि हिंदुस्थान-

१. तदंन्न०। २. समागतव्यं। ३. ग्राह्यः हिं सर्वं। ४. जन्ननाशयानीजन्नता-शयानीभिः। ५. यत् करा इतः चखांकोक्त्या। ६. गमनः। ७. एतं वृत्तांत०। ८. ०दशो दिवसे।

* The folio No. 172 ends at प्रेषितवन्तः, and तेन च तत्र गत्वा occurs at the folio No. 174.

ग्रहणोत्तरं तद्देशतृतीयांशो दीयते यदि च काबुलदेशगमनोत्तरं काबुलदेशस्थगजनीनगरं[1] चरखाख्यग्रामश्च दीयते लोहग(र)ग्रामाश्च ये मन्मात्रे फिरदौसमकानीभिर्दत्ताः स्थिताः ते यदि दीयन्ते तदा मया भवदेकवाक्यतया स्थातव्यम् । ततः बुधवासरे मीरअबुलबकाख्यः तत्कार्यं कृत्वा नद्या उत्तरणसमये भखरदेशस्थैर्लोकैः नानाविधनाराचसमूहैः विद्धः सिद्धिं गतः । ततः जंन्नताशयान्यो दुःखिता जाताः । उक्तं च - भ्रातृणां[2] वैमत्येन शत्रुतया च यत् हिंदुस्थानं गतम् । तेनान्याभिश्चापद्भिर्यद्दुःखं तदपेक्षयाप्येतन्मरणदुःखं मया बहु लब्धमिति । सत्यमेतत्[3] । जन्नताशयानीभिः तन्माहात्म्यं सम्यगवगतं स्थितमिति । जन्नताशयान्योतिसम्यग्बुद्धिमत्तया धैर्यवन्तो बभूवुः । नोचेत् एतत्काले प्रबलधैर्यवतामपि धैर्यच्युतिर्भवति । एतद्वृत्तान्तस्य पञ्चषदिवसानन्तरं यादिगारनासीरमिर्जाको(प)र्य्यागत्य मिलितः । एतदवसरे शेखमीरकस्य ठट्ठाधिपतिसेवकस्य विदायः कृतः । ठट्ठाधिपतिविज्ञप्तं च मया कर्त्तव्यमिति प्रतिज्ञातमुक्तं च - यदि निष्कपटतयास्मत्सविधे समागम्यते तदा मया सर्वं तदुक्तं कर्त्तव्यमिति । ततः भखरदेशं यादिगारनासिरमिर्जाकाय दत्त्वा जमादिल्-मासस्य प्रथमदिवसे[4] ठट्ठादेशं प्रति प्रस्थिताः । स्यहवा(न)दुर्गनिकटे हुजैलबेगो मुनअमखांकस्य भ्राता तुरुकबेगश्च साहिमखांकस्य भ्राता अन्ये च एतादृशाः विंशतिपरिमिताः[5] नौकारूढाः स्थिताः । एतैः सह तदीयाः दुर्गान्निर्गत्य युद्धं चक्रुः । एतेपि नौकात उत्तीर्य तान् निजघ्नुः । तेपि प्रपलाय्य दुर्गे प्रविष्टाः । एतन्मध्येपि केचित् दुर्गसमीपं गताः स्वसाहाय्य-मलभमानाः परावृत्ताः । ततः रजबमासस्य सप्तदशे दिवसे जंन्नताशयान्यः स्यहवानदुर्गं रुरुधुः । एतद्रोधनात् प्रागेव दुर्गस्थैर्दुर्गबाह्यवर्त्त्युद्यानानि गृहाश्च सर्वे नाशिताः । ततः ठट्ठाधिपतिना अन्नाद्याहर्तृवणिङ्मार्गाः सर्वे प्रतिरुद्धाः यथान्नादि नायाति निकटे । ततः बहुकालरोधनेन अन्नाद्यप्राप्त्या च केचित् स्वल्पसत्त्वाः पलायिताः । तथा महतामपि व्याकुलता भवति यथा मीरताहिरसदर -- खोजागयासुद्दीजामी -- मवुलानाअब्दुलबाकी-प्रभृतयः ठट्ठाधिपतिं प्रति गताः । मीरबरकह - मिर्जाहसनौ तथा जफरअली फकरअलीबेगपुत्रः तथा खोजहमुहिब्बअलीबक्सीप्रभृतयः यादिगारनासीरमिर्जासविधे गताः । एतदवसरे जन्नताशयानीभिः श्रुतम् - मुनईमखाफुजैलबेगः अन्ये(पि) तदेकवाक्यतया जिगमिषवः[6] तिष्ठन्तीति । ततो जन्नताशयानीभिः मुनइमखा बद्धः ॥

---

१. काविल ······नोत्तरकाविलस्थ० । २. भ्रातृणां । ३. सत्वमेत[। ४. प्रथमं दि० । ५. किंशति० । ६. जिगिमिषवः ।

* The folio No. 174 ends at मुनअ, and मखांकस्य is continued at the folio No. 173.

इमं वृत्तान्तं स्थापयित्वा यादिगारनासीरवार्त्तोच्यते ॥

तस्य भःखरदेशो दत्तः स्थितः । ततः तेन लोहरीग्रामे स्थितम् । वारद्वयं दुर्गस्था लोका मिर्जोपरि पतिताः । मिर्जोकेनापि युद्धे भूयान् पुरुषार्थ(:) कृतः । मुहम्मदअलीकाबूची शेरदिलश्च उभावपि* मुनइमखांकस्य संबन्धिनौ युद्धे हतौ । ततः तृतीयवारे[१] दुर्गस्थाः अत्युत्साहेनागत्य नदीतीरे मिर्जाकिन[२] समं समरं चक्रुः । ततः मिर्जाकीयैरपि लोकैः अनेके तथा हता यथा तदीयरुधिरधाराभिर्नदीतीरं सकर्दममभवत्[३] । ततस्ते अतित्रासाद् दुर्गादागत्य पूर्ववद् युद्धं न चक्रुः । ततः ठट्ठाधिपतिनातिकपटेन बाबारकुलीमुद्राधरः यादिगारनासिरमिर्जानिकटे प्रेषितः । उक्तं च - अहमतिवृद्धः । मम च प्रतिज्ञापालनं पुत्रवत् यः करोति तथा न कोप्यस्ति । अतस्तदर्थं स्वीया कन्या तव दातव्या कोशश्च दातव्यः । यदि च मया कियत्कालं जीव्यते तदा गुर्जरदेशोपि ग्राह्य इति । तदुक्तं सत्यं ज्ञात्वा अश्ववण:(?) विचारहीनो नातिबुद्धिरप्रतिभोभूत्[४] ॥

ततो जन्नताशयानीभिः स्वसैन्यदुःखं[५] ज्ञात्वा यादिगारनासिरमिर्जाकायोक्त्वा प्रेषितम्-यत् त्वया ठट्ठाधिपतेरुपरि युद्धार्थं प्रस्थातव्यमिति । यथास्मत्सैन्ये[६] अन्नादि समायातीति । तत् श्रुत्वा मनसि व्यू-पि(?)बाह्यतः पटकुटी (?) निःष्काश्य प्रस्थानेस्थिरमना बभूव † । ततो जन्नताशयानीभिः शेखअब्दुलगफुरः दत्तकोशाध्यक्षस्वाम्यः स मिर्जानिकटे प्रेषितः शीघ्रं तदानयनार्थम् ॥

तेनाभाग्यवशात् विपरीतमुक्त्वा यथा पटगृहमपि परावृत्त्यायाति तथा कृतम् । ततः तच्छ्रुत्वा कालप्रातिकूल्यं ज्ञात्वा अन्नाद्यभावेन च सैन्यदुःखं ज्ञात्वा पुनः परावृत्त्य[७] भःखर-देशमाजग्मुः जिल्कादहमासस्य सप्तदशे दिवसे । एतावन्मध्ये अन्यदपि प्रातिकूल्यमाचरितं यादिगारनासिरमिर्जाकिन । अतिमहान्तौ भौमिकौ यौ जन्नताशयानीनां नौकादिदानेन निर-न्तरमानुकूल्यमाचरतः तौ ठट्ठाधिपत्युक्त्या बद्ध्वा प्रेषितौ[८] । तेन च तौ हतौ[९] । तथापि

---

१. ०वारें । २. मिर्जाकेम । ३. ०भवति । ४. नातिसुद्धिः । ५. स्वसैन्यंदुखं । ६. सन्ये । ७. परावत्य । ८. प्रेषितो । ९. हतो ।

* The folio No. 173 ends at उभाव, and पिमुन is continued at the folio No. 175.

† Translation :—Though the Mīrzā had in his heart become alienated, yet he preserved appearances a little by sending out an advance camp But with the same crudity of thought, he delayed and loitered in marching out.

जन्नताशयानीभिस्तत्प्रातिकूल्यं नाचरितम् । यदा जन्नताशयान्यो लोहरीनिकटे समागता-स्तदा मिर्जाकोपि बहुतरं सैन्यं गृहीत्वा युद्धार्थमाजगाम । जन्नताशयानीभिस्तच्छ्रुत्वा प्रस्थानं कृत्वा हासिमबेगः मिर्जाकस्येष्टचिन्तकः प्रेषितः । तेन च तदीयबलात्[1] परावृत्य स्वज्येष्ठैः स्वमान्यैश्च समं साम्यं कर्तुमनुचितमिति अन्यान्यपि वचनान्युक्त्वा लोहरीघट्टे समानीतः । एतन्मध्ये यथा (का)हासिमहुसेनखुलताकः तथा[2] बहवो लोकाः एतेभ्यः पृथग्भूत्वा मिर्जाकाय मिलिताः । ततः सिन्धुसम्बन्धिदेशे मत्प्रयोजननिष्पत्तिरीश्वरस्यानभिप्रेतेति ज्ञात्वा कालप्रातिकूल्यं च ज्ञात्वा स्वीयलोकान् सर्वानपि अधर्मिष्ठान् स्वस्मिन्ननुरक्तान् च ज्ञात्वा अहं निःसंगो भूत्वा क्वचिदटिष्यामि एकान्ते वा स्थास्यामीति मतिं मनसि चक्रुः । अध-र्मिष्ठदर्शनं मा भवतु इति । ततः एतेषामत्यासैरेतत् सदुःखैश्च विज्ञप्तम्— यदेतस्याश्चित्तवृ-त्तेर्निवर्तितव्यम् । एतत्समये च युक्तमिदं यन्मालदेवदेशे गम्यते । तत्रैव विश्रामः कर्त्तव्यः । तेनापि बहूनि सेवापत्राणि प्रेषितानि स्थितानि । अतोस्मत्साहाय्ये तेनाचरितेस्मत्समीहि-तमचिरेण भवितेति । बहुतरसैन्यवांश्च स भवदागमनं महता भाग्येन जातमिति मनसि निधाय भवत्सेवामवश्यं विधास्यति - इति श्रुत्वा चैतदेते तद्वचनमखिलं हृदि निधाय तत्र चिचलिषवो[3] जाताः । अग्रे चाज्ञापत्रमप्रेषयन् । ततः यादिगारनासीराय इबराहिमहस्ते शिक्षार्थमाज्ञापत्रं* प्रेषितम् । कदाचित् स्वकपटं परिहृत्य पश्चात्तापं कृत्वा समीचीनमार्गे समायास्यतीत्येतदर्थम् । परन्तु तद्भाग्यं सुप्तं स्थितम् । अतस्तेनोपदेशमश्रुत्वैव लोहरीग्रामे स्थितम् । ततः जन्नताशयान्यो[4] नवशतोत्तरम् एकोनपञ्चाशत्संवत्सरान्तर्गतमुहर्रम-मासस्यैकविंशतिमे दिने उच्चनगरं प्रति प्रस्थिताः । ततः रबिउल्अवल्मासस्य चतुर्दशे दिवसे मालदेवदेशमध्यगताः । एतन्मासस्याष्टादशे दिवसे देवरावुलदुर्गं प्राप्ताः । ततः विंशतिमे दिवसे वासिलपुरं प्राप्ताः ततः रबीउल्आखिरमासस्य सप्तदशे दिवसे बीकानौर-महानगरं द्वादशक्रोशावशिष्टं यावत् तिष्ठति तावदागताः । एतस्मिन्नवसरे मार्गमध्ये एतेषाम् अमात्याः सम्यग्विचारकाश्च[5] मालदेवस्य कदाचित् कपटमपि संभावितमिति वदन्तः स्थिताः । अतः मीरसमंदरः अतिसावधानः मालदेवसमीपं प्रेषितः । तेन च मालदेवमनोवृत्तं तत्रत्यलोकवृत्तं च ज्ञात्वा जन्नताशयानीसविधे समागतम् उक्तं च - यत् मालदेवो बाह्यतः

१. तरीया—बलात् । २. ० कःस्तथा । ३. चित्रलिपवो । ४. जन्नताशयान्योः । ५. एतेषामत्यात्याः सम्यक्विचारकाश्च ।

* The folio No. 176 ends at शिक्षार्थमाज्ञाप, and त्रं प्रेषितम्......is continued at the folio No. 220.

स्नेहं प्रकटयति । परन्त्वेवं ज्ञायते मिथ्यावादी ह्यसौ भवतीति । ततः सिंगानामा कश्चित् मालदेवस्यामात्यः[१] वणिग्वेशेन महामौल्यहीरकादिक्रयव्याजेन वृत्तान्तं ज्ञातुं तत्सैन्यमध्ये समागतः । तत् सर्वं जन्नताशयानीसविधे लोकैरुक्तम् । तच्छ्रुत्वा जन्नताशयान्यः कापट्येन मालदेवेन अस्मद्वृत्तान्तज्ञानार्थं प्रेषितोऽस्तीति ज्ञात्वा लोकान् प्रत्यूचुः - यदसौ वक्तव्यः- हीरकादि विना खड्गप्रभावं पातिशाहाद्यनुग्रहं वा विना न प्राप्यत इति* । तद्वृत्तान्तोत्तरं सर्वे लोकाः सशङ्काः सन्तो मीरसमंदरबुद्धेः स्तुतिं चक्रुः । ततो जन्नताशयानीभिः पुनरपि मालदेवाभिप्रायः कीदृश इति ज्ञानार्थं सोनीतिरायमल्लनामकः प्रस्थापितः । संकेतश्च तेन सह कृतः । यदि मालदेवस्यास्मासु निष्कपटतास्ति तदा त्वत्प्रेषितसेवकेन पञ्चाङ्गुल्यो धर्त्तव्याः[२] । नो चेदेकैव धर्त्तव्या कनिष्ठिकेति[३] । ततः फुलवदीग्रामः जोधपुरनिकटवर्त्ती मालदेवस्य जन्मभूमिः । ततो वसतित्रयमतीत्य योगीतडागपरिसरे स्थिताः । तत्र च रायमल्लप्रेषित-सेवकेन जन्नताशयानीनां कनिष्ठिकैव धृतेति । तेन ज्ञातमयं सकपट इति प्रकटमपि कप-टमभूत् । तद्यथा - मालदेवेन स्वविनयप्रदर्शनार्थं स्वीया लोकाः जन्नताशयानीसविधे प्रेषिता अन्तः कापट्येनेति ज्ञातम् । ततः फुलवदीग्रामाभिमुखं प्रस्थिताः । अयं मालदेवः प्रथमं निष्कपट स्थितः । इदानीं जन्नताशयान्नः स्वल्पसत्त्वा इति ज्ञात्वा सकपटो जात इति केचि-दूचुः । अन्ये त्वेवमब्रुवन् – अयं सर्वदा सकपट इति । यथातथास्त्वेतत् ॥

परन्तु परमेश्वरप्रातिकूल्येन जन्नताशयानीभिर्यन्मनसि क्रियते तदन्यथैव भवतीति । ततस्तत्कपटज्ञानानन्तरं तुरदीबेगखा मुनइमखां अन्ये च बहव आज्ञप्ताः -- यद्भवन्तो गत्वा तदीयमार्गरोधनं कुर्वन्तु इति । यथा तत्सैन्यमस्मत्सैन्योपरि नायाति तथा कुर्वन्तु इति । यदि च कदाचित् तत्सैन्यमल्पसत्त्वं ज्ञायते तदा हन्तव्यमपि । स्वयं चात्यल्पलोकैः सह अवरोधमादाय चलिताः सेनाध्यक्षश्च । शेखअलीबेगजलाइरः तुरुष्कंबेगः बाबाजलाइरपुत्रः हुजैलबेगः अन्येप्येतादृशाः[४] विंशतिपरिमिताः गृहदासाश्च अन्येपि सेवकाः वेतनग्राहकाः सह स्थिताः । पण्डितेष्वपि मध्ये मुल्लांताजिंदी ज्योतिर्विच्छ्रेष्ठः मुल्लांचांदश्च सह स्थितः ॥

यदा ततः फुलवदीग्राममतीत्य सातलमेरग्रामे समागताः तदा मालदेवीयसैन्यसमूहो कस्मादाविरासीत्[६] । जन्नताशयानीसेनाध्यक्षाश्चान्यमार्गेणान्यत्रैव गताः । ततः जन्नताशयान्यः

---

* The fol. No. 220 ends at प्राप्यतेइ, and ति तद्वृत्तान्तोतरं is continued at the folio No. 177.

१. ०देवस्यात्यः । २. पंचांगुलयोधः । ३. कनिष्ठि० । ४. ज्ञात । ५. अन्ये-प्यैतादृशाः । ६. समूहो अक० ।

तान् दृष्ट्वावरोधान् वाहनेभ्यः उत्तार्य तानि वाहनानि सेवकेभ्यो दत्त्वा सेनां त्रिधा[1] विभज्य स्थिताः। तत्रैकः सेनासन्निवेशाधिपतिः[2] शेखअलीबेगः चतुर्भिर्भ्रातृभिस्सह अग्रे शत्रुसैन्योपरि निपपात। तेन च ते हताः। तान् विजित्य परावृत्य जन्नताशयानीसविधे समागतः। तदीयाश्च लोकाः बहवो हताः। एतेषां जयो जातः। एते च जगदीशस्तुतिं कृत्वा जेसलमेरिग्रामं चलिताः जमादिलअव्वलमासस्य प्रथमे दिवसे जेसलमेरिनगरं प्राप्ताः। तत्रैव च येन्यमार्गेण गताः स्थिताः सेनाध्यक्षास्ते[3] आगत्य मिलिताः। ततः तत्रत्याधिकारिणा रायलोणकणेन स्वाभाग्यवशात् तत्रत्यतडागजलरक्षार्थं स्वीयाः लोकाः प्रेषिता[4] यथा एतैर्जलं न प्राप्यत इति। ततस्तान् हत्वा एतन्मासस्य दशमे दिवसे अमरदुर्गं प्राप्ताः। ततस्तद् दुर्गाधिपतिनारायणप्रसादाख्येन एतेषामागमनं मम भाग्यवश(ात्) सम्पन्नमिति ज्ञात्वा भूयसी सेवा कृता ॥

तत्र चेदमद्भुतमाश्चर्यमभूत् -- यत् अमरकोटं प्रत्यागमनसमये मार्गे सर्वथा जलान्नादिरहिते हजरतिमरयंम्मकान्याः शाहनिशाहकेषु गर्भस्थेषु सत्सु दाडिमीफलबुभुक्षा आसीत्। एतावन्मध्ये कश्चित् पुरुषः कक्षानिक्षिप्तयावनालान्नः*(?) आजगाम। ततो लोकैः स उक्तः -- दाडिमीफलं क्वचिदस्तीति। तेनोत्तरितमन्नमस्तीति। तदेव दातव्यम् - इत्युक्ते तेन दातुमारब्धे तन्मध्यादकस्मात् दाडिमीफलमाविरासीत्। ततः सर्वैरेवं ज्ञातं गर्भस्थः कश्चित् महापुरुषोस्तीति यन्निमित्तमिदमकस्मादाविर्भूतम् ॥

ततः कियन्ति दिनानि तत्रैव स्थितम्। तत्र च तुरदीबेगखान(:) अन्ये[5] च एतेषामेव प्रसादात् बहुधनवन्तो जाता एतादृशि संकटसमये व्ययार्थं याचिताः किंचिदपि न ददतः[6] स्थिताः। तेमरकोटाधिपत्यैकवाक्यतां[7] कृत्वा बद्धाः। ततः एतैरपि स्नेहवशात् स्वव्ययार्थं किंचिद् गृहीत्वा पुनः परावृत्य सर्वं तेभ्यो दत्तम्। ततः शाहनिशाहीकोत्पत्तिकालमव्यवहितं ज्ञात्वा अमरदुर्गे विश्वास्यलोकान् सह दत्त्वा मरयम्मकानीं तत्रावस्थाप्य स्वयं प्रस्थिताः ॥

---

१. त्रिध्वा। २. ०धिपतिः। ३. ०ध्यक्षाःस्ते। ४. प्रेषितां। ५. अंन्ये। ६. ददंतः। ७. अमरकोषधिपत्येक०।

* Translation:—"...when suddenly a man brought a bag (*anbān*) full of millet (*jawār*)...".

(Chapter XXVII)

तत्र च नवशतोत्तरमेकोनपञ्चाशत्संवत्सरान्तर्गतरजबमासस्य पञ्चमे दिवसे आदित्य-वासरे रात्रौ शाहनिशाहीकानामुत्पत्तिर्जाता । सा च पूर्वमुक्तैव । यदुत्पत्तिः संसारसंताप-नाशकसुखहेतुः जन्नताशयानीनां दुःखदवदह्यमानहृदयामृतवर्षिणी दुःखप्रहारस्य व्रणविरो-पणौषधरूपा । अस्त्वेतत्[1] । परन्तु जन्नताशयान्यो वार्ताहारनिवेदितोत्पत्तिवार्तां श्रुत्वा हर्षभरमन्थरस्वान्ताः[2] जगदीशस्तुतिं कृत्वा विवाहवत् सभासदां महासमारम्भं संविधा(य) अनेकान् संतुष्टान् चक्रुः[3] । उक्तं चैतत् पूर्वमेव । अस्त्वेतदपि ॥

अनुरोधतः परार्थत्वा(त्य)क्तस्वार्थवत्तया च असंगितां त्यक्त्वा संसारे ममतां बद्ध्वा मालदेवदेशं प्रति प्रस्थिताः स्थिताः* । तेन च एतेषां भाग्यमाहा(त्म्य)मविज्ञाय विरुद्धमाचरितं स्थितम् । अतस्ततः परावृत्त्य[4] सिन्धुदेशे प्रस्थिताः । ततः तद्देशनिकटगमनोत्तरं तद्देशीयाः अरगूंजातीयाः जूनग्रामे युद्धोद्यता बभूवुः । श्रुत्वा चैतत् जन्नताशयान्यः शेखअलीबेगजलाइरं पितामहादीनामतिहितभूतं अनेकयोधसहितं प्रस्थाप्य स्वयं प्रतस्थुः । शेखअलीबेगेन ज्ञातपार्श्ववर्तिस्वामिना शत्रवः अनेकधा हताः । हत्वा च[5] तान् सर्वेपि तत्रैव स्थिताः । मरयम्मकान्याः दोलापि तत्रैवागता यथापूर्वमुक्तमस्ति । ततः कियद्दिनं समीचीनोद्याने सिन्धुतीरे स्थिताः । वामदक्षिणपार्श्वयोररगूंजातीयाः एतैस्सह युद्धं कृत्वा प्रपलाय्य गच्छन्तश्च स्थिताः । शेखताजिदीलारी एतेषु दिनेषु मृतः । कस्मिंश्चिद्दिने शेखअलीबेग-जलाइर(:)तुरदीबेगखानः[6] अन्ये च बह(व): कस्यचित् ग्रामस्य लुण्टनार्थं चलिताः । तेषामुपरि सुलतांमहमूदः भखरी अन्ये च बहवः आगत्य पतिताः । तत्र युद्धं महदभूत् । तत्र युद्धे तुरदीबेगखानः शिथिलोभूत् । शेखअलीबेगेन च दार्ढ्यमवलम्ब्य बहु युद्धं कृतम् । तत्र चासौ हतः ॥

तन्मरणेन जन्नताशयान्यो दुःखिताः जाताः ततो भःखरं त्यक्त्वा कंधारदेशगमने मनश्चक्रुः । एतदवसरे बयुरमखां नवशतोत्तरपञ्चाशत्तमे वर्षे मोहर्रममासस्य सप्तमे

१. पस्त्वेतत् । २. ०मथरस्वांताः । ३. चक्रः । ४. परवृत्य । ५. हत्वावतान् । ६. तुरहीबेग० ।

* Translation :—He had stayed his desire of retirement for the sake of his loyal companions, and with his far-seeing eyes had set about the ordering of the world of interdependencies, as is the special purpose of the existence of princes, and had proceeded towards Māldēo's country.

दिवसे एकाकी गूर्जरदेशादागत्य मिलितः। एतेषामतिसुखमभूत्। सोपि तस्मिन्नेव युद्धे परैः सह युद्धं चकार। तत एतेषां लोकाः साश्चर्या जाता कोसमत्साहाय्यं करोतीति। जन्नताशयान्यः तच्छ्रुत्वा सन्तुष्टा जाताः। ततः बयरमखांके समागते किंचित् कालं तत्रैव स्थिताः॥

संक्षेपेण बयरमखांचरित्रमुच्यते॥

यदा जन्नताशयानीनां कान्यकुब्जनगरे विरुद्धावस्थाभूत् तदा बयरमखानः शंभलदेशवर्त्तिलखणौरनगरे मित्रसेनराज्ञः शरणं गतः। तत्र च बहुकालं स्थितः। शेरखानेन असौ तत्रास्तीति श्रुत्वा मित्रसेनो याचितः। तेन चाल्पबलेन बयरमखां प्रेषितः मालवमार्गे शेरखांकस्य मिलितः। ततः शेरखां तस्येच्छया[1] मिलितः। तन्मनोवशीकरणार्थं बह्व्यो वार्त्ता उक्तवान्। तन्मध्ये च शेरखांकेनोक्तम्-येन सह स्नेहः तेन सह कापट्यं न कर्त्तव्यमिति। बयरमखांकेनाप्युक्तमेवमेवेति। ततः ब्रध्नपुरनिकटे गत्वातिवैकल्येन अबुलकासिमस्य गोपाचलस्वामिन एकवाक्यतया बयरमखां गूर्जरदेशे चलितः। ततः मार्गमध्ये शेरखांसेनाध्यक्षो बयरमखांपलायनं ज्ञात्वा अबुलकासिमं शरीरगौरवेण भव्यतया च बयरमखांभ्रमेण जग्राह। बयरभखांकेनोक्तम्-नायं बयरमखानः (इति)। अबुलकासिमेनाप्युक्तम् - अहमेव बयरमखानः। अयं तु मत्सेवकः—इति विवदमानयोर्मध्ये[2] अबुलकासिममेव नीतवान्। बयरमखानश्च गूर्जरदेशे गतः। ततः शेरखानोप्यविचार्यैव अबुलकासिमं हतवान्। तदानीं च समये समये शेरखांकेनोक्तम्—यत् बयरमखानो वदन् स्थितः-येन सह स्नेहस्तद्धिते[3] वर्त्तितव्यमिति। तदेवमायातं[4] नास्मदोयोसाविति। ततः गूर्जरदेशीयसुलतांमहमूदेन स्वनिकटेसौ स्थापितोपि न स्थितः। मकानामकतीर्थयात्रामिषेण* तदीयाज्ञां गृहीत्वा सूरतिग्रामे आगतः। ततो हरिद्वारे समागतः। ततो जूनग्रामे आगत्य स्वस्वामिना[5] मिलितः॥

(Chapter XXVIII)

जन्मदिनमारभ्याष्टमे मासि शाहनिशाहीकानां सिद्धयः प्रकटाः आसन्[6]। यथा – सप्तममाससमाप्त्यनन्तरम् अष्टममासारम्भे कस्यांश्चिद् रात्रौ

१. तस्योछाय। २. विवदतोर्मध्ये। ३. स्नेहःस्तद्धिते। ४. तदैवमयातं ५. स्वामिने। ६. प्रकटासन्।

* The fol. No. 181 ends with **यात्रामिषेण,** and **तदीयाज्ञां** is continued at the folio No. 104.

जीजीअनगा स्तनं पाययन्ती स्थिता। धात्र्या माहिमअनगया सह विरोधेनेयं कार्मणं करोति। अत एतस्या एव दुग्धं पिबतीति जन्नताशयानीनिकटे लोकानां निवेदनेन च उद्विग्न-चित्ता स्थिता। एतस्मिन्नवसरे शाहनिशाहीकैरुक्तम् — त्वया स्वमनोदुःखं त्याज्यम्। तव सुखं भविष्यति। त्वन्निकटे सकलपातिशाहसूर्यस्तिष्ठतीति। इयं च मदीया वार्त्ता गूढा स्थापनीया समये प्रकटनीयेति विना समयं गुप्तैव स्थापनीयेति। जीजीअनगापि वदन्ती स्थिता — इदं श्रुत्वा मम महदाश्चर्यमभूत्। मन्मनोदुःखग्रन्थिरपि निवृत्तेति। एकाकिन्या मया दुग्धं पाययन्त्या स्थितमतो दिने दिने मन्मनस्तुष्टिः[1] पुष्टिश्चासीत्। इयं च वार्त्ता तावत्पर्यन्तं गुप्ता कृता यावत्कस्मिंश्चिद् दिवसे शाहनिशाहीकाः पातिशाहपदवीप्राप्त्यनन्तरं पालमननगरपरिसरे मृगयार्थं गताः। तत्र च तैः[2] महानेकः सर्पः मार्गमध्ये पुच्छे[3] धृतः। तच्चरित्रं मज्ज्येष्ठपुत्रेण यूसुफमुहंमदखानेन मन्निकटे कथितम्। तत्कथनोत्तरं पूर्वचरित्रं मया तन्निकटे कथितम्। कथितञ्चैवं बाल्यदशायामेवं कृतम्। इदानीन्तु तारुण्यमस्ति। एतत्करणे नास्माकमाश्चर्यमिति। विश्वास्येभ्यः श्रुतमपि तद्वार्त्ताद्वयं जीजीअनगासकाशात् साक्षादेव श्रुतम्। अतो नासंभावनीयमेतत्। मयाप्यगणिताः* सिद्धयो दृष्टाः। ताः कियत्यो वक्तव्या इति ॥

(Chapter XXIX)

ततः जन्नताशयानीनां कंधारदेशे गत्वा मक्कामुद्दिश्य इराकगमनमुच्यते ॥

तत्र जन्नताशयान्यः संपत्तौ सिन्धुदेशग्रहणे च विरक्ता आसन्[4]। कंधारदेशे गत्वा तत्र च शाहनिशाहीकान् तत्सविधे बहूंश्च लोकान् अवस्थाप्य एकाकिना मया (म)क्कायां गन्तव्यम् ठट्टाधिपतिना साम च कर्त्तव्यमिति विचारे मनश्चक्रुः। ठट्टाधिपतिरिमं विचारं श्रुत्वा ममेदं भाग्यमिति ज्ञात्वा सामाङ्गीकरणपूर्वकं विज्ञप्तिपत्रमप्रेषयत्। जन्नताशयानीभिः तत्पत्रानुरूपं तत्सामाङ्गीकृतमिति ज्ञात्वा ठट्टाधिपतिरुपायनमप्रेषयत्। विनयं चाकरोत् ॥

ततः एतत्संवत्सरान्तर्गतरबीउल्अवल्मासस्य सप्तमे दिवसे सीबीमार्गेण कंधारदेशं चलिताः। ततः मिर्जाअस्करी मिर्जाकामरोक्त्या सीबीग्रामदुर्गं सन्नद्धं चकार स्वयं च

१. तुष्टि। २. वैः। ३. पुछे। ४. असन्।

* The folio No. 104. ends with मयाप्यगणिताः सि, and सिद्धयो......is continued at the folio No. 182.

जन्नताशयान्यो धर्त्तव्या इति बुद्ध्या सैन्यमादायाभिमुखं चलितः। एतदवसरे अमीरअल्लदोसः महापण्डितः कियन्तं कालं मिर्जाकामराकस्य दौत्येन स्थितः। द्वितीयः शेखअब्दुल्ल-वहाबः शेखपुरावंश्यश्च। उभावपि शाहहसनबेगकन्यां[1] मिर्जाकामरार्थमानेतुं गच्छन्तौ स्थितौ जन्नताशयानीनामागमनवार्त्तां श्रुत्वा सीबीदुर्गे स्थितौ। ततो जन्नताशयानीभिः अमीरअलीदोसाय आकारणार्थं फरमानपत्रं प्रेषितम्। तेन स्वाभाग्यवशान्नागतम्। उक्त्वा प्रेषितम्—दुर्गस्थलोकानुरोधात् आगन्तुं न शक्यत इति ॥

ततः कंधारदेशादर्वाक् नवक्रोशावशिष्टे स्यालग्रामे गताः। तत्र च जलालर्दीबेगः[2] मिर्जाकामरासेनाध्यक्षस्तत्प्रदेशप्राप्तवेतनदेशश्च[3] जन्नताशयानीनां वृत्तान्तज्ञानार्थं गुप्तचरा-नप्रेषयत्। तैश्च जन्नताशयानीभिरग्रे जलदर्शनार्थं प्रेषितं सेवकद्वयं धृतम्। तन्मध्यादेकः पलायितः। तेन तदीयस्सर्वोपि वृत्तान्तः जन्नताशयानीसविधे उक्तः। तत् श्रुत्वा कंधारदेशगमनं परित्यज्य मस्तंगदेशं चलिताः। पाइंदमहंम्मदबेसीको विदायमादाय कंधारदेशे चलितः। जन्नताशयानीभिः स्वहस्ताक्षरैः फरमानपत्रं शिक्षार्थं मिर्ज्जाअस्करीकाय तद्धस्ते दत्तम्। तेन च शिक्षामश्रुत्वैव भूयसी दुष्टता कृता। कासिमहुसेनसुलतान-महदीकासिमखानाभ्यां तदीयसेनाध्यक्षाभ्यां भूयान् शिक्षितः--यत् त्वया यदि जन्नताशयानीनामुपरि गम्यते तदा तैः इराकदेशे गन्तव्यम्। तदा स्वप्रतिष्ठाहानिरिति। अबुलखैरेण अन्यैश्च लोकैः तत्सन्तोषाधायकं वचनमुक्त्वा मिर्ज्जा अस्करी यथा प्रस्थानरुचिर्भवति तथा कृतम्। ततः प्रभाते तेन मस्तंगदेशं प्रति प्रस्थितम्। ततः क्रोशद्वयोपरि गत्वा मिर्ज्जाकेण केन मार्गेण गन्तव्यमिति पृष्टे दुबीबहादुरेणोक्तम्—मया मार्गो ज्ञायत इति। तत् श्रुत्वा मिर्ज्जाकेणोक्तम्-त्वमेवाग्रे गच्छ। मार्गप्रदर्शको भव इत्युक्ते ततः तेनोक्तम्—ममाश्वो न समीचीनः इत्युक्ते तुरस्कुबरलासस्य त्वयाश्वो ग्राह्य इति मिर्ज्जाकेणोक्ते तेन तुरस्कुबरलासो याचितः। तेन चाश्वो दत्तः कटुकवचनान्युक्तानि। ततः तुरूस्कुबरलासो हिंदुस्थाने जन्नताशयानीना-मागत्य मिलितः स्थितः। तत्स्नेहवशात् तेन बयरमखांसविधे समागत्य मिर्ज्जा-वृत्तान्तः सर्वोप्युक्तः। तत् श्रुत्वा बयरमखानः जन्नताशयानीसविधे मिर्जावार्त्तां श्रावयित्वा उक्तवान्--यत् नायं युद्धसमयः। यद्भवतां मनसि वर्त्तते तदेव कर्त्तव्यमिति।

---

१. ०कन्या। २. ०वगः। ३. ०ध्यक्षः स्तत्प्र०।

तत् श्रुत्वा जन्नताशयान्यः काबिलकंधारग्रहणे मनः परावृत्त्य दश्तमार्गेण इराकदेशं चलिताः । खोजमअज्जमनदींमकोकुल्ताश् -- मीरगजनबीखोजाअंबरनाजिर -- प्रभृतयः जन्नताशयानीभिराज्ञप्ताः -- यत् शाहनिशाहीकरक्षां परमेश्वरः करिष्यति । भवन्तो मरयम्मकानीं शीघ्रमत्रानयन्तु इति । तत् श्रुत्वा तैश्चलितम् । गत्वा ते मरयंम्मकानीमानयामासुः । ततः कियद्दूरे मार्गे गत्वा रात्रिरासीत् । एतदवसरे बयरमखानेनोक्तम् -- मिर्ज्जाअस्करी धने लुब्धः । एतस्मिन्नवसरे स्वपटगृहे स्थित्वा भवदीयसैन्यसामग्रीभवदीयकोशद्रव्यगणनं कायस्थद्वा(रा) कृत्वा निश्चिन्तो भविष्यति* । तदेतस्मिन् समये तदुपरि गत्वासौ हन्तव्य इत्युक्ते जंन्नताशयानीभिरुक्तम् — मनसि असौ निष्कपटो भवति । अतः विदेशे गच्छद्भिरस्माभिर्नायमुपायोनुसर्त्तव्यः । परमेश्वरे भारं दत्त्वा शाहनिशाहीका अप्यत्रैव स्थापनीया इत्युक्त्वा चलिताः ॥

मिर्ज्जाअस्करी मस्तंगदेशे कपटेनागत्य अबुलहसनबेगसदरं[1] जन्नताशयानीनां वार्त्ताभिर्मार्गप्रतिबन्धार्थं[2] प्रेषयामास । ततोसौ जन्नताशयानीनां प्रस्थानसमये आजगाम । जन्नताशयानीनां परमेश्वरेणैवं[3] प्रेरितम् -- यदसौ वार्त्तामिषेण प्रतिबन्ध(म्) कर्त्तुमागतोस्ति । अतोसौ किमपि न प्रष्टव्य इति । ततस्तद्वार्त्तामश्रुत्वैव त्वरया चलिताः । ततः मिर्जाअस्करिणा स्वयमागत्य अबुलखैर -- शाहबलदौ अग्रे प्रेषितौ । एतत्सैन्यं प्रतिरोद्धव्यं यथा कोपि न चलति । मीरआबुलहसनात् स्वीया वार्त्ता सर्वा ज्ञाता । एतदवसरे तुरदींबेगखानप्रभृतयः मिर्जाकायागत्य मिलिताः । मिर्ज्जाकेण स्वीयलोकसविधे रक्षिताः ॥

मीरगजनबी यदा मिर्जादर्शनार्थमागतस्तदा मिर्जाकेणोक्तम् -- मया पातिशाहदर्शनार्थमागतं स्थितम् । किमिति पातिशाहैः गतमिति । पुनः पृष्टम् -- मिर्ज्जाशाहनिशाही क्वास्तीति । एतैरुक्तम् -- पटगृहेस्तीति । ततो मिर्ज्जाकेणोक्तम् -- उष्ट्रवाह्यां द्राक्षादिभक्ष्यसामग्रीं तस्मै नयन्तु । मयापि मिर्ज्जाशाहनिशाहीगृहे गम्यते । स्वयं च पटगृहे स्थित्वा द्वित्रैः कायस्थैः सह तस्यामेव रात्रौ पातिशाहीयकोशद्रव्याण्यगणयत्[4] लेखितवांश्च । अन्ते तदेव प्रकटमासीत् यत् बयरमखानेनोक्तं स्थितम् । ततो मिर्जाको दुन्दुभिध्वानधारापुरस्सरं जन्नताशयानीसैन्ये

---

१. हसनबेगः सदरं । २. ०प्रतिवर्थं । ३. परमेश्वरेणेवं । ४. पातिशाहीये० ।

* Translation :—That at this time the Mirzā would be secure and at ease, and be sitting in a tent with two or three clerks and looking at the list of the goods and chattels in his Majesty's camp.

आजगाम । आगत्य तेषामेव सभामण्डपद्वारि स्थितः । ततः तत्रत्या लोकाः सर्वे धृताः । तुरदीबेगखांनः शाहबलदसमीपे रक्षितः । एवं स्वीयलोकैस्तत्सैन्यस्थान् ग्राहयित्वा तेषां नानाविधयातनासमूहं कुर्वन् कंधारे चलितः । तुरदीबेगखानाच्च बहुद्रव्यं गृहीतम्[1] । अविलम्बेनैव तेन स्वकर्त्तव्यताफलं लब्धम् ॥

एतादृशस्यैतादृशं दुःखमत्यल्पम् । युज्यते त्वेतस्यानेकदुःखसमुद्रमग्नतैवेति । एतदवसरे महदिदमाश्चर्यमभूत् । यदा मिर्ज्जाकेण एतद्विरुद्धाचरणं कृतं तदैव मीरगजनवीकेन माहिमअनगया च शाहनिशाहीकाः पर्यङ्के कृत्वा मिर्ज्जासविधे आनीताः । ततः मिर्ज्जाकेण भूयान् स्नेहः प्रदर्शितः । तथापि शाहनिशाहीकाः स्वहृदये सन्तुष्टा नासन् । तेषामसन्तोषं दृष्ट्वा मिर्जाकेणोक्तम्--अयन्तु जन्नताशयानीपुत्रो भवति । कथमस्मासु सन्तुष्टो भविष्यतीति । ततो मिर्जाअस्करीकं गलावलम्बिमुद्रायुक्तदोरकं पट्टपुष्पान्वितं शाहनिशाहीकै(:) ग्रहीतुमारब्धम् । तज्ज्ञात्वा मिर्ज्जाकेणोत्तार्य दत्तम् । ततः सुबुद्धिभिः एवं ज्ञातम् – एतेषां वर्द्धमानलक्ष्म्याः सूचकमेतदिति । जगदीशः एतेषां शीघ्रमेवापरिमितां सम्पदं दास्यतीति । ततः मिर्जाकेण सह एतैरपि कंधारे चलितम् । ततः मार्गमध्ये मिर्जाविश्वास्यः कोकीबहादुरः उष्ट्रारूढमीरगजनबीसविधे गत्वा उक्तवान्--यत् असौ मिर्ज्जा मत्सविधे यदि दीयते तदा एतत्पितुर्निकटे नेयः । तत् श्रुत्वा मीरगजनबीकेनोक्तम् – तेषां मन्त्रः सहनयने न स्थितः । तदाज्ञां विना मया न प्रेषयितुं शक्य इति । तत् श्रुत्वा तेनोक्तम् – तर्हि मया जन्नताशयानीनामेतादृशे समये सेवार्थं गम्यते । अन्यच्च मम भाग्यं यदि नास्ति मिर्जानयने तर्हि जन्नताशयानीनां यथा मयि विश्वासो भवति निष्कटताबुद्धिश्च भवति तथा चिह्नं दातव्यम् । तत् श्रुत्वा तेन शाहनिशाहीकमस्तकस्थं बाल्योचितमुष्णीषं प्रदत्तम् । तद्गृहीत्वा च स चलितः ॥

ततः नवशतोत्तरपञ्चाशत्तमसंवत्सरान्तर्गतरमजानमासस्याष्टादशे दिवसे कंधारे आनीय दुर्गान्तवर्त्तिदुर्गमध्यवर्त्तिस्वसविधवर्त्तिगृहे मिर्ज्जाकः शाहनिशाहीकान् स्थापयामास । तत्र च शाहनिशाहीकानां माहिमअनगाजीजी – अनगांखानप्रभृतयः सेवांचक्रुः । सुलतांनिमबेगिमनाम्नीं स्वस्त्रियं मिर्ज्जा अवदत् – मिर्ज्जापालनं त्वयापि कर्त्तव्यमिति । मिर्जाकेणापि प्रतिदिनं भूयान् स्नेहः क्रियते । शाहनिशाहीकानामपि दिनेदिनेऽद्भुतसंपज्ज्ञापकं भाले चिह्नमाविरासीत् ॥

१. गृहीतां ।

यस्य परमेश्वरो रक्षकस्तस्मिन् विरुद्धचित्तवृत्तीनामपि लोकानां सद्वृत्तिरेव भवति। शत्रुरप्यशत्रुर्भवति। यं दृष्ट्वा दूरदर्शिनामपि चित्ते एतच्छिष्यत्वमवलम्बनीयमिति बुद्धिर्भवति। अल्पविचाराणामपि यच्चरितदर्शनं चित्ते तत्त्वप्रकाशकं भवति। अन्यच्च। मत्सविधे शाहनिशाहीकैः रहस्युक्तम्[1] – यत् यदा मासत्रयोत्तरमेकहायनोऽहमासं तदारभ्य स्वीयसमाचाराभिज्ञोऽहमस्मि। तत्र(ापि) पितुः इराकदेशगमनं मम च कंधारदेशस्थितिरिति द्वयं मया निश्चितं ज्ञायते। अन्यच्च। माहिमअनगया अधमखांमात्रा मिर्जाकं प्रत्युक्तम् -- यत् महतामेतादृशी रीतिरस्ति। पित्रा पितृसदृशेन वा स्वमस्तकवेष्टनेन बालः चलनसमये तथा ताड्यते यथासौ पतति। युक्तमेतत्। पातिशाहाः अत्र न सन्ति। भवद्भिरेव एतच्छत्रूणां दृष्टिदोषनिरासार्थमेतत्कर्त्तव्यमिति। तत् श्रुत्वा मिर्जाकेनातित्वरया शिरोवेष्टनेन तथा अहं ताडितः यथा मम पतनं भवति। तच्छिरोवेष्टनहननं पतनं चाद्यापि मया स्मर्यते इति। अन्यच्च— मम मुण्डनार्थं बाबाहसनअब्दालस्य निखननस्थलनिकटे नयनं मुण्डनं चाद्यापि मया स्मर्यत इति। यस्य चित्तमीशेन निर्मलीकृतमस्ति तस्य किं किं न स्फुरति॥

---

१. राहसोक्तम्।

(Chapter XXX)

इदानीमिमं वृत्तान्तमवस्थाप्य शेरखांकस्य चरितं मिर्जाहैदरस्य काश्मीरगमनं मिर्जाकामराकस्य काबिलदेशगमनं मिर्जाहिंदालस्य कंधारदेशगमनं यादिगारनासिरमिर्जाकस्य च भक्खरदेशस्थितिश्चेत्यादिकमवश्यवक्तव्यत्वादुच्यते ॥

शेरखां वितस्तामुत्तीर्य शनैश्चचाल[1]। युद्धसामग्र्यां सत्यामपि पातिशाहीयलोकानां स्वोपरिपतनशङ्कया सशङ्कमना इव भूत्वा अग्रे[2] बहून् लोकान् प्रेषयामास। ततः कियद्दिनानन्तरं कामराप्रभृतीनां भ्रातॄणां परस्परविरोधवार्ता श्रुत्वा लाहोरे गत्वा खुशाबयोरं जगाम। ततः तन्निकटवर्त्तिभेहराग्रामभूमौ किंचित्कालं स्थित्वा यौ सुलतांसारंगगखरसुलतांआदमौ महान्तौ भौमिकौ तयोराकारणार्थं मनुष्यान् अप्रेषयत्। ततस्ताभ्यां फिरदौसमकानीभिः कृतोपकाराभ्यां तत्प्रसादाल्लब्धबहुभाग्याभ्यां तद्वचनं न श्रुतम्। ततः शेरखाँनः हथियाग्रामे गत्वा बहुसैन्यमप्रेषयत्। ततो भौमिकाभ्यां सह तुमुलं युद्धमभूत्। ततस्ताभ्यां बहवः प्रतिष्ठानाः पराजिताः हताः बन्दीकृताः विक्रीताश्च। ततः शेरखां स्वयं तदुपरि गन्तुकामो मन्त्रिभिर्निषिद्धः। निकटदेशवर्त्तिभिः सह युद्धं नोचितम्। किन्तु शनैरेतद्देशो ग्राह्य इति। बहुसैन्यं[3] चात्र स्थापनीयम् येन मुद्गलरोधनं शनैः भौमिकदेशग्रहणं च भवति। दुर्गं चात्र महत् कर्त्तव्यम्। स्वयं च परावृत्त्य हिंदुस्थानपालनं कर्त्तव्यम्। ततः शेरखानः रोहितासदुर्गारम्भं संविधाय परावृत्त्य प्रतिदिनं चचाल। आगरायामागत्य गोपाचले आगतः। ततो मीरअबुलकासिमो गोपाचलस्वामी पर्वतोपरिवर्त्ती अन्नाद्यभावेन निरुद्धो मिलितः। ततः शेरखांको बंगालदेशं विहाय सर्वं हिंदुस्थानं सप्तचत्वारिंश(द्)धा विभज्य सेनाध्यक्षेभ्यो दत्तवान्। दाग इति प्रसिद्धतप्तलोहमुद्राचिह्नान् चाकरोत्। सुल्तांअलावदीन्रीतिं[4] चानुससार। ततो गोपाचलात् शेरखानः रायसेनदुर्गचंदेरीनगरयोरधिपं पूरणमल्लम् अभयदानादिना दुर्गान्निःकाश्य कस्यचिदुक्त्या अहन्[5]। ततः आगरायामागत्यात्यखास्थानतरं(?) बंगालदेशाधिपवत् प्रतिक्रोशं ग्रामान्* चकार।

---

१. चचाल। २. जग्रे। ३. ०सैन्ये। ४. अलावंदीरीतिं। ५. अहनत्।

* Translation:—Thence he came to Āgra and after the manner of the governors (ḥukkām) of Bengal established serais on the road at the distance of every kos.

ततः अजमेरि – नागौरादीनामधिपं मालदेवं प्रति बहुसैन्यमादाय चलितः। ततः कपटेन तं वशीकृत्य रणथंबर – चितौडस्वामिनौ वशीकृत्य धदेराशमार्गेण कालंजरपर्वते समागत्य तं रुरोध। ततः पर्वतं नानाविधैरौषधैः पूरयित्वा ज्वालनसमये नवशतोत्तरद्विपञ्चाशत्तमे वर्षे मोहर्रममासस्य दशमे दिवसे औषधज्वालया स्वयमपि ज्वलितः परलोकं जगाम। यद्यप्यसौ मृतस्तथापि दुर्गं गृहीतम्। पञ्च वर्षाणि दश मासाः त्रयोदशदिनपर्यन्तमधिकारः कृतः। तदनन्तरं तस्य कनिष्ठः पुत्रः जलालखांको राज्येभिषिक्तः। इसलांमशाह इति नाम स्थापितम्। सोपि पितृवत् राज्यं चकार। एतयोर्द्वयोरपि वृद्धिः एतेषां भाग्योदयस्याग्रे खद्योतायितेवासीत्[१]। ततो जगदीशेच्छावशात् कियत्कालं राज्यं कृत्वा भस्मशेषौ[२] जातौ॥

——०:——

१. ०पितैवासीत्। २, मच्छेषौ।

(Chapter XXXI)

मिर्जाहैदरः जन्नताशयानीभ्यो बलं प्राप्य नशहरनगरे गतः। तस्मै काश्मीरस्थाः सेनाध्यक्षा मिलिताः। तैश्च काश्मीरग्रहणमार्गाः प्रदर्शिताः। ततो जगदीशे भारं दत्त्वा चचाल। एतदवसरे पातिशाहसेनायां महद् दुःखमासीत्। खोजांकलांबेगो मिर्जाकामरोक्त्या स्वेच्छया वा मिर्जाकामरासविधे गतः। मिर्जाहैदरीयान् जन्नताशयानीलोकांश्च विहाय नान्ये तेन जग्मुः। परन्तु काश्मीरस्थानां परस्परविरोधेन एतेषामागमने उत्कटेच्छावत्त्वेनातिविकटपुनूचमार्गेण विना* युद्धं काश्मीरं वशीचकार। तेषु दिवसेषु तत्र महानधिकारी कोपि न स्थितः। पूर्वं सेनाध्यक्षैरेवासौ देशो गृहीतः स्थितः। तद्देशीयपातिशाहं नाममात्रेण सिंहासने संस्थाप्य स्वयमेव राज्यं कृत्वा स्थिताः। नाजुकशाह इति तस्य नाम स्थितम्। पातिशाहे परवशे सेनाध्यक्षेषु च परस्परविरुद्धेषु युक्तमेवैतत्। एतेषु दिवसेषु हिमवत्सु वर्षावत्सु च काचीचकः काश्मीरदेशस्थः मिर्ज्जाहैदरं प्रबलं ज्ञात्वा मिर्जाहैदरं नाममात्रेण सिंहासनेवस्थाप्य स्वयमधिकारः कर्त्तव्य इति स्वमनोभिलषितस्यासिद्धिं ज्ञात्वा कपटेन काश्मीरान्निर्गत्य शेरखांनिकटे जगाम। काश्मीरीयमुहम्मदशाहपुत्रस्य इस्माइलस्य भगिनी शेरखाकाय दत्त्वा तेन सह स्नेहं संविधाय अलावलखांहुशेनखांसरवाणी - प्रभृतीनन्यांश्च[1] लोकानादाय काश्मीरे युद्धाय जगाम। तेषु दिवसेषु अब्दालमाकिरी काचीचकपक्षीयो मृतः। ततः मिर्जाहैदरः इन्द्रकोलेतिदृढे दुर्गेवरोधमवस्थाप्य स्वयमपि तत्रैव तस्थौ। काश्मीरस्थाश्च पृथग्भूता जाताः। एतस्य स्वल्पा एव लोका आसन्। मासत्रयं[2] गिरिकन्दरास्वपि स्थितः। तावत्पर्यन्तं यावत् रविउस्सानीमासान्तर्गते सोमवासरे शेरखांनीयैः सह तुमुलं युद्धमभवत्। तत्र मिर्जाहैदरस्य महान् जयोभूत्। प्रतिष्ठानाः काश्मीरस्थाश्च कपटिनः अव्यवस्थिताश्च पञ्चसहस्राश्ववाराधिकपरिमिता अपि पलायिताः। केचिद् धृताः[3] शेषा हताश्च। ततः काश्मीरदेशं निरस्ताशेषप्रतिपक्षं मिर्जाहैदरो गृहीतवान्। द्वितीयवारेयं काश्मीरदेशो गृहीतः ‡यथा तच्चारित्र्य-

---

१. नन्याश्च०। २. ०त्रय। ३. केचिधृताः।

* The fol. No. 189 ends at विना, and युद्धं......is continued at the folio No. 217.

‡ The fol. No. 217 ends with यथा, तच्चारित्र्य......is continued at the folio No. 190.

निवेदकपुस्तकेषु लिखितमस्ति। दशवर्षपर्य्यन्तं काश्मीरदेशं मिर्जा हैदरः यथासन्निवेशमपालयत् पूर्वग्रामटिकां च महानगरमकरोत्। नानाविधाः श्रेण्यश्च* नीताः। (तत्त)न्नगरे नगरे गायनान्यासन्।

मिर्ज्जाहैदरेण तादृशि जये इदं महद् विस्मृतम्—यत् जन्नताशयानीनां कुतुबाख्यं राजशुभाशं(सनं) मुद्रां चाकारयित्वैव काश्मीरदेशीयसेनाध्यक्षवत् तद्देशीयनाजुकशाहस्यैव कुतुपाख्यं राजशुभाशंसनं[1] मुद्रा चेति द्वयं कारितम्। परन्तु काश्मीरदेशीयसेनाध्यक्षानुरोधेनैतत् कृतं न तु जन्नताशयानीष्वभक्त्या। अतएव पुनःकाबिलदेशग्रहणोत्तरं जन्नताशयानीनां प्राबल्यं विज्ञाय तेषामेव राजशासनमुच्चैस्तत्रैवाकरोत्॥

ततः नवशतोत्तराष्टपञ्चाशत्संवत्सरे रात्रौ काश्मीरदेशस्थाः तदुपरि निपत्य तं निजघ्नुः। मिर्ज्जाहैदरो नयं धैर्यं गाम्भीर्यं च विहाय यदा स्वेच्छाचारी अभूत् तदैव काश्मीरस्थैः अतिकपटैः एतदीयलोकान् विभिद्य श्रीनगर-हीरपुरमध्यवर्त्तिखानपुरे रात्रावेवासौ हतः। मिर्ज्जाहैदरीयलोकानामेव शरेणासौ (हतः) इत्यपि केचित्॥

---

* Translation :—Artists and Craftsmen.

१. ०शुभांशनं।

(Chapter XXXII)

मिर्जाहैदरवार्त्तामुक्त्वा मिर्जाकामरावार्त्तोच्यते[1] ॥

जन्नताशयानीभ्यो मिर्जाकामरा पृथग्भूय खुशाबनगरगमनोत्तरमेव लक्ष्म्यां स्वीयत्वाभिमानं कृत्वा स्वनाम्ना कुतुपाख्यं राजराजशासनं कारितवान् । स्वयमदूरदर्शिनां विचारशून्यसंगिनां नेदमाश्चर्यमिति । यः समीचीनभूमौ असद्विचाररूपदुष्टबीजावापं करिष्यति किमसौ तद्बीजाङ्कुरफलं (न) भोक्ष्यत इति । एतादृशानां लक्ष्मीर्न स्थिरा भवति* ॥

इदानीं मुख्या वार्त्तोच्यते ॥

मिर्जा ढिंगोटनगरमार्गेण सिन्धुतीरं[2] प्राप्तः । तत्र उलुकमिर्जा-मुहम्मदसुलतानामानौ मुल्ताने स्थातुमशक्तौ मिलितौ । ततः मिर्जाकामरा बहुकालं तत्रैव स्थित्वा तत्र चान्नाद्यभावं ज्ञात्वा नद्यां सेतुं निबध्य काबिलदेशं जगाम । तत्र च बहु सुखमन्वभूत् । पञ्चाननत्यक्ते हि स्थले मृगाः सुखं स्वपन्तीति जमशेदपातिशाहोक्तिरपि[3] संगच्छते । सैव वार्त्तात्र सम्पन्ना। गजनीनगरं तन्निकटवर्त्तिग्रामांश्च मिर्जाअस्करीकाय ददौ । खोजखांवन्द-महमूदं दौत्येन मिर्जासिलेमानामानं बदक्शानपातिशाहं प्रत्यप्रेषयत् । उक्तं च — मदाज्ञापालनं कुतुपाख्यराजशासनं चाङ्गीकर्त्तव्यमिति । ततस्तेन तन्नाङ्गीकृतम् । ततो मिर्जा क्रुद्धः[4] सैन्यमादाय तदुपरि जगाम । ततः मार्गमध्यवर्त्तिनारीग्रामे[5] तुमुलं युद्धं बभूव । ततः मिर्जासिलेमानः स्वसैन्यमल्पबलं बुद्ध्वा[6] तदाज्ञामङ्गीकृतवान् । ततो मिर्जाकामरा बदक्शानीयान् कांश्चिद् ग्रामान् तस्माद् बलादाहृत्य स्वीयलोकेभ्यो दत्त्वा परावृत्त्य काबिलदेशमाजगाम । एतदवसरे मिर्जाकामरा मिर्जाहिंदालेन कंधारदेशो गृहीत इति श्रुत्वा[7] सैन्यमादाय कंधारे जगाम । ततस्तत्रत्यं दुर्गं षण्मासपर्यन्तं रुरोध । ततो मिर्जाहिंदालोऽन्नाद्यभावेनाभयदानं प्रार्थ्य दुर्गान्निर्गत्य मिलितः । ततस्तस्मात् दुर्गमाहृत्य मिर्जाअस्करीकाय दत्तवान् । ततः मिर्जाहिंदालं सह गृहीत्वा परावृत्त्याजगाम । ततः कियद्दिनं तस्य दुःखं दत्त्वा

---

१. ०वार्तौ० । २. सिंद्धु० । ३. पातशोहाक्ति० । ४.कृद्धः । ५. गार्गमध्य० । ६. बुध्वा । ७. शृत्वा

* The folio No. 190 ends as भव, and ति इदानीं.........is continued at the folio No. 216.

